संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥७॥

हे पयोद ! संतप्तानां त्वं भवान् जलदानेन {शरणं} शरणं ऽसि [त्राणमसि][49] । तस्मात् कारणात्, मे मम विरहार्त्तस्य सन्देशं(शं)[50] वार्तां, प्रियायाः सकाशं हर गृहाण प्रापय त्वा (वा)[51] । कीदृशस्य मे ? [धनपतिक्रोधविश्लेषितस्य][52]–धनपतिक्रोध(धे)[न] विश्लेषितो, [वि]-योजितो, धनपतिक्रोधविश्लेषितस्य ! कुत्र ? म(त्व)या गन्तव्यमित्याह । हे मेघ ! ते त्वया यक्षेश्वराणां यक्षाणां ईश्वराः यक्षेश्वरास्तेषां यक्षेश्वराणाम् । अलका नाम नगरी[53] वसतिं(तिः) स्थानं, गन्तव्या ते इति । कृत्यानां कर्त्तरि [वा] षष्ठी(ष्ठी) वा । कीदृशी अलका ? बाह्यो-द्यानस्थितं(त)हरशिरश्चन्द्रिकाधौतहर्म्या बाह्योद्याने स्थिता(तः) रहितो योऽसौ हरो महेश्वरस्तस्य शिरसि या चन्द्रिका चन्द्रकान्तिः, तया धौतानि धवलितानि हर्म्याणि [धनिनां][54] गृहाणि यस्यां सा ॥७॥

[अत्र गन्तुं प्रोत्तनामुत्पादयन्नाह][55]

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः[56]
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः ।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८॥

हे पयोद ! पथिकवनिताः पान्थस्त्रियः त्वां भवन्तं, प्रेक्षिष्यन्ति(न्ते)[57] अवलोकयिष्यन्ति । काः कर्त्तृपथिकवनिताः, पथिकवनिता किं कुर्वन्त्यः ? प्रत्ययान्निश्चला(या)ओ(दा)[58]श्वसन्त्यः आश्वासनां कुर्वन्त्यः । जलदो[ऽ]यं समुदितोऽद्य नूनंऽ(नम)स्माकं पतिभिः इदानीं साम्प्रतं[59] आगन्तव्यम् । कीदृश(श्यः)[60] पथिकाङ्गना ? उद्गृहीतालकान्ता उद्गृहीता{ऽ}लकानां केशानांऽन्ताः (अन्ताः) प्रान्ताः याभिस्ताः, अंसयमित(त)[61]केशत्वात् विरहिणीति कथनम् । कीदृशं ? त्वां पवनपद्वीम(मं)तरिक्षमारूढं चटितम् । हे मेघ ! त्वयि भवति, सन्नद्धे निकटवर्त्तिनि सति, कोऽन्यो पर(रः)[62] विरहविधुरां, विरहिणी स्त्री विधुरा पीडिता विरहविधुरा तां, जायां भार्यां, उपेक्षेत विरहत्वा (ये)त्[63] । अपि तु न को[ऽ]पि । योऽन्यो जनो(ऽ)हमिव पराधीनवृत्तिर्न स्यात् । पराधीना परायत्ता वृत्तिर्यस्य सः ॥ ८ ॥

इदानीं शुभशकुनबलं द[द]न्नाह[64] ।

मन्दं मन्दं नुदति पवनश्चानुकूलो[65] यथा त्वां
वामश्चायं नदति मधुरं चातकस्तोयगृध्नः* ।

[* 'ते सगर्वः' इति पाठः टीकायां दृश्यते ।]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः**
**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ।।९।।**

हे पयोद ! यथा येन प्रकारेण पवनो वायुर्मन्दं [मन्दं][66] शनैः शनैः, यथा भवत्येवं नुदति वाति प्रेरयति । कीदृशो वायुः ? ते तव अनुकूल(लः) पृष्ठानुगामी च पुनर्वामभागस्थो [ऽ]यं चातकः सारङ्गः, ते तव, मधू(धु)रं सुस्वरं, नदति शब्दायते । कीदृशः चातकः ? सगर्वः पानीयलाभात् । बलाका बिसकण्ठिका, खे आकाशे, भवन्तं त्वाम्, नूनं निश्चितं सेविष्यन्ते । कस्मात् ? गर्भाधानक्षणपरिचयात् । गर्भाधाने क्षणं, क्षणमात्रं [स्तोकं][67] यः परिचयो, गर्भाधानक्षणपरिचयस्तस्मात् । मेघागमे वासां(तासां)[68] गर्भाधानप्रवृत्तिरिति । किं विशिष्टास्ताः ? आबद्धमाला-आबद्धा रचिता माला याभिस्ताः । कीदृशं भवन्तं ? नयनसुभगं, नयनयोर्नेत्रयोः सुभगो नयनसुभगस्ता(स्त)म् ॥ ९ ॥

**तां चावश्यं [69]दिवसगणनातत्परामेकपत्नी—**
**मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।**
**आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां**
**सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ।।१०।**

एतस्मादेव शकुनसद्भावात् । च समुच्चये, अवश्यं निश्चितम् । अव्यापन्नां जीवन्तीं, ताम् । भ्रातृजायां मम भार्यां द्रक्ष्यसि, अवलोकयिष्यसि । कीदृशां(शीं)[70] तां ? दिवसगणनातत्परां, एतावन्ति दिनानि व्यति(ती)तानि[71], एतावन्त्य[व]शिष्यन्ते । पुनः कीदृशीं ? एकपत्नीं सतीम् । कीदृशस्त्वं ? अविहतगतिः-पवनप्रकोपादिभिरस्खलितगमनः । युक्तो(ऽ)यमर्थः । हि यस्मात्कारणात् । प्रायशो बाहुल्येन विप्रयोगे, अङ्गनानां विरहिणीस्त्रीणां, हृदयं आसा(शा)बन्धो[72] रुणद्धि रक्षति यां विनाऽर्थप्राप्तिसम्भावना बाध्यते । अनेन इति बन्धः आशेव बन्धः । कीदृशं हृदयम् ? कुसुमसदृशं पुष्पतुल्यम् । पुनः कीदृशम् ? सद्यःपात(ति)प्रणयि सद्यस्तत्कालं, पातं(ते)[73]पतने, प्रणयः स्नेहो यस्य तत् ॥ १० ॥

**कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रातपत्रां[74]**
**तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।**
**आ कैलासाद्विसकिसलयच्छेदपाथेयवन्तः**
**सम्पत्स्यन्ते नभसि भवता राजहंसाः सहायाः ।।११।।**

हे पयोद ! नभसि गम(ग)ने [आकाशे][75] आकैलासात्कैलासाद्रिं यावत् । राजहंसा मराला, भवतस्तव सहायाः सम्पत्स्यन्ते, भविष्यन्ति । के कर्तारः राजहंसाः[76] ? किं कृत्वा ? तत्ते तव श्रवणसुभगं श्रोत्रमनोहरं, गर्जितं श्रुत्वा[ऽऽ]कर्ण्य च पुनर्यद्गर्जितं [कर्तुं][77] महीं वसुधां, उच्छीलि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(ली)प्रा(न्प्रा)तपत्रां, उद्भूतच्छीलि(ली)प्रा(न्प्रां){ष्प} [स] कुसुमां कर्तुं [विधातुं]प्रभवति[78], करोति[79] शक्नोति । मेघस्तनितेन तान्युद्गच्छन्ति । कीदृशाः राजहंसाः ? मानसोत्काः मानसं सरः प्रत्युत्कण्ठिताः । वर्षाकाले ते[80] तत्र प्रयान्ति । पुनः कीदृशाः राजहंसाः ? बिसकिसलयछे(च्छे)द-पाथेयवन्तः । बिसकिसलयानां छेदाः । पाथेयवन्तः बिसकिसलयानां छेदाः खण्डास्त एव, पाथेयवन्तः । संबलं(?) येषां ते* ॥ ११ ॥

अधुना गमनायोद्यतस्य मेघस्य शिष्या(क्षा)माह[81] ।

**आपृच्छस्व प्रियसखममुं[82] तुङ्गमालिङ्ग्य शैलं**
**वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।**
**काले काले भवति भवतो यस्य संयोगमेत्य**
**स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥१२॥**

हे मेघ ! अमुं शैलं रामगिरिं, आलिंग्य समाश्लिष्यऽऽपृच्छस्व । मुक्तलापय[83]कीदृशं ? अमुं शैलं प्रियसखं प्रिया(य,श्चास)[84] सखा च प्रियसखा स्तं(तम्) । पुनः कीदृशं ? तुङ्गमुच्चैस्तरम् । पुनरपि कीदृशम् ? रघुपतिपदैः श्रीरामपादैः मेखलासु नितम्बभागेषु अङ्कितं मुद्रितम् । कीदृशैः रघुपतिपदैः ? पुंसां पुरुषाणां वन्द्यैः वन्दनीयैः । सखीधर्ममाह । हे मित्र ! काले काले प्रावि(वृ)ट्[85]-समये समये यस्य गिरेः संयोगं मेलापकं प(ए)त्य प्राप्य भव[त]स्तत्र[86] स्नेहव्र(व्य)क्तिर्भवति[87] सम्पद्यते । भवतः किं कुर्वतः ? नेत्रजलं मुञ्चत(तः)[88], संत्यजने (सन्[89] त्यजत्) । कीदृशं बाष्पम् ? {चिरविरहजं} चिरविरहजं चिरविरहान् जातश्चिरविरहजस्तम् । शैला नीरवर्षणेन स्निग्धा जायन्ते इति तात्पर्यम् । आङितारहिस्यं(आङि नुपृच्छ्योरित्यात्मने[90] पदं(?) पृच्छो-(च्छस्व)रिव आत्मनेपदम् । {मूलात्} आपृच्छस्वेति आत्मनेपदं सिद्धम् ॥ १२ ॥

**मार्गं तावच्छृणु[91] कथयतस्त्वत्प्रयाणानुरूपं**
**सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।**
**खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र**
**क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य* ॥१३॥**

हे जलद ! मे [म]म[92] कथयतः सतः पूर्वं तावन्मार्गं शृणु, आकर्णय । अत्र तावच्छब्दः क्रमवान्(च)[93]को ज्ञेय[:] । तदनु पश्चान्मे सन्देसं(शं)[94] श्रोष्यस्याकर्णयिष्यसि । कीदृशं मार्गमित्यानुकूल(ल्य)माह[95] । यत्र मार्गे शिखरेषु पर्वतेषु खिन्नः खिन्नः सन्, त्वं पदं चरणं, न्यस्य संस्थाप्य,[गन्तासि][96] गमिष्यसि । [किं कृत्वा ? च पुनः । क्षीणः क्षीणो वर्षणवशात् कृशतरः सन् । स्रोतसां नदीनां पयो जलं उपभुज्य लात्वा (?) गमिष्यसि ।][97] कीदृशं पयः ? परिलघु परि सामस्त्येन लघु यत्तत्परिलघु, निर्म्म(र्म)लत्वात् लघुतर(रं)[98]न≼दुर्ज्जरम्≽[99] । कीदृशं मार्ग्रं(र्गं)[100]? तत्प्रयाणानुरूपां(पं)[101] भवद्गमनयोग्यम् । कीदृशं सन्देसं(शं)[102]? श्रोत्रप(पे)यं[103], श्रवणाकर्णनयोग्यम् ॥ १३ ॥

---

* Could it be-बिसकिसलयानां छेदाः खण्डाः त एव (पाथेयं) संबलं येषां ते पाथेयवन्तः ।
[* उपभुज्य इति टीकायां दृश्यते ।]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अद्रेः शृङ्गं हरति[104] पवनः किंस्विदित्युन्मुखीभि-**
**र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।**
**स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं**
**दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥१४॥**

हे जीमूत ! अस्मात् स्थानात् उन्मुख[105]उत्तराभिमु[खः]खमन्ति(न्त)रिक्षम्[106] , उन्नता (उत्पत)[107]ऊर्ध्वं गच्छ । कीदृशान्तः(त्) स्थानात् ? सरसनिचुलात्–सरसा निचुलाः वेतसवृक्षाः यत्र तत्सरसनिचुलं, तस्मात् । कीदृशस्त्वं ? मुग्धसिद्धाङ्गनाभिः इति हेतोरुन्मुखीभिः ऊर्ध्वीकृत-वदनाभिः इति । किं स्विदिति वितर्क्के(र्के) । पवनो वायुः, किमद्रेः पर्वतस्य, शृङ्गं शिखरं हरति । त्वं किं कुर्वन् ? पथि मार्ग्रे(र्गे) दिग्गजानां[108]दिक्करि(री)णां स्थूलहस्तावलेपान् पीनपौ(पु)ष्टहस्तसंस्पर्शान्[109] परिहरन् वर्जयन् ॥ १४ ॥

**रत्नच्छायाव्यतिकर इव[110] प्रेक्ष्यमेतत्पुरस्तात्**
**वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य ।**
**येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते**
**बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥१५॥**

हे मेघ ! पश्य पुरस्तादग्रतः, आखण्डलस्य शक्रस्य, तद्धनुःखण्डं प्रभवति समुत्पद्यते । कस्मात् ? वल्मीकाग्रात् । पिपीलिकागृहम् । मृत्सञ्चयविशेषो वल्मीकस्तस्याग्रः; तस्मात् सर्प्प(र्प)-गृहात्[111] वल्मीकाग्रात् शक्रधनुषो वर्षाकाले सम्भव इति वृद्धाः[112] । कीदृशः(शं) धनुःखण्डम् ? रत्नच्छायाव्यतिकर इव प्रेक्ष्यम्, दर्शनीयम् । [113]पञ्चवररत्नदीप्तिवितानमित्यर्थः । हे पयोद ! येन धनुःखण्डेन, ते तव, श्यामं कृष्णवर्णं, वपुः शरीरं, अतितरामित्यर्थं कान्तिं शोभां आपत्स्यते लप्स्यते । {ते} कस्यै(स्ये)व ? विष्णोरिव । यथा विष्णोः नारायणस्य वपु(पुः)[114] बर्हेण मयूरपिच्छेन कान्ति(न्तिं)[115] पुष्णाति । किं विशिष्टेन[116] बर्हेण ? स्फुरितरुचिना देदिप्यमानकान्तिना ।[117] एतावता बर्हधारिणः श्रीकृष्णस्य तुल्यं प्राप्स्यतीत्यर्थः । कस्येव ? यथा गोपालरूपधारिण श्रीविष्णो(ष्णोः) नारायणस्य श्यामवर्णं शरीरं वपुः, बर्हेण मयूरपिच्छेन कान्तिमाप । गोपालाः किल केलिरसात् मयूरपिच्छधारिणो भवन्ति ।[118] कीदृशस्य विष्णोः ? गोपवेशस्य वल्लभरूपस्य ॥ १५ ॥

**त्वय्यायत्तं कृषिफलमिति [119]भ्रूविलासानभिज्ञैः**
**प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।**
**सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं**
**किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥१६॥**

हे मित्र ! किञ्चिन्मनागपि मालं आरुह्य[क्षेत्रोपरि स्थित्वा][120]पश्चादनन्तरं, भूय एव पुनरपि, उत्तरेणोत्तरस्यां दिशि, व्रज गच्छ । ≪मालं ग्रामान्तराटवीनामसंग्रहो(हः) )[121]≫ किं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लक्षणस्त्वं ? जनपदवधूलोचनैरिति हेतोः पीयमानम्(नः) ।[122] अत्यन्तावलोकनं पानमुच्यते इति । इदं कृषिफलं त्वय्यायत्तं भवदायत्तम् । किं लक्षणैस्तैः भ्रूविकारानभिज्ञैः[123] । पुनः किं लक्षणैः ? प्रीतिस्निग्धैः[124] प्रीत्या स्निग्धानि प्रीतिस्निग्धानि, तैः । किं लक्षणं मालम् ? सद्यः शीरोत्कर्षण-सुरभि क्षेत्रं–सद्यस्तत्कालं शीरोत्कर्षण(णे)न[125] [हलकर्षणेन][126] सुरभीणि क्षेत्राणि यत्र तत् ॥ १६ ॥

**त्वामासारप्रशमितवनोपप्लवं[127] साधु मूर्ध्ना**
**वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।**
**न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय**
**प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥१७॥**

हे जीमूत ! आम्रकूटाख्यसानुमान् पर्वतः साधु यथा स्यात् (तथा)[128], [वक्ष्यति इति वहतेर्ऌस्य कत्वं कृते स्यः, सस्य षत्वे व कृते कष संयोगे क्ष(:) । ][129] त्वां भवन्तं, मूर्ध्ना मस्तकेन वक्ष्यति धारयिष्यन्ति(ति) । किं लक्षणं त्वां ? अध्वश्रमपरिगतं मार्ग(र्ग)श्रमोपेतं[130], [मार्गश्रमव्याप्तम्][131] । किं लक्षणं त्वां ? अ(आ)सारप्रस(श)मितवनोपप्लवम्[132]–आसारेण [धारा[133]सम्पातेन]वेग[वद्वृ][134]वर्षणेन प्रस(श)मित(तं) उपशम (मं) नीतो वनोपप्लवो वनदाहो येन स, तम् । युक्तो[ऽ]यमर्थः । क्षुद्रोऽपि लघुरपि, प्रथमसुकृतापेक्षया संश्रयायाश्रयाय, [संश्रयदानार्थं][135] विमुख(खः) पराङ्मुखो न भवति । प्रथमं पूर्वं सुकृतस्योपकारस्य याऽपेक्षा, तया । पूर्वमनेन ममोपकृतं महदिदानीमहमेतस्य(तस्य)[136] प्रत्युपका(क)रो{प}मीति । क्व सति ? [मित्रे प्राप्ते सति][137] उच्चैस्तर आम्रकूटस्तस्य[138] किं पुनर्वाच्यम् ॥ १७ ॥

**छन्नोपान्तः परिणतफलद्योतिभिः[139] काननाम्रै-**
**स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।**
**नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां**
**मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥१८॥**

हे जलद ! अचल ! आम्रकूटो, नूनं निश्चितं, अमरमिथुनप्रेक्षणीयामवस्थां यास्यति गमिष्यति । अमरमिथुनानां देवयुगलानाम् । प्रेक्षणी[यां][140] द्रष्टुं योग्य(ग्यां) ता(ताम्) । क्व सति ? स्निग्धवेणीसवर्णे त्वयि शिखरं शृङ्गमारूढे सति । स्निग्धाऽश्लक्ष्णा या वेणी तत्सवर्णस्तस्मिन् । कीदृशोऽचलः ? काननाम्रैः, काननसहकारैः छन्नोपान्त(न्तः) च्छादितपर्यन्तः । कीदृशैः काननाम्रैः ? परिणतफलद्योतिभिः । परिणतानि परिपक्वानि[142] यानि फलानि तैर्द्योतन्ते परिणतः(त)[143] फलद्योतिनः, स्तैः(तैः) । उत्प्रेक्षते – भुवः पृथिव्याः मध्ये मध्यप्रदेशे श्यामस्तनः [इव][144] । कीदृशः स्तनः ? शेषविस्तारपाण्डुः गौरवर्णशेषः ॥ १८ ॥

**स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं**
**तोयोत्सर्गाद् द्रुततरगतिस्तत्परं वर्त्म तीर्णः ।**
**रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां**
**भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥१९॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हे वयस्य ! हे मित्र ! तत्परं वत्म(र्त्म)तीर्णः[146] सन् रेवां नर्मदां द्रक्ष(क्ष्य)सि [विलोकयिष्यसि][147] । तस्मादाम्रकूटात् परं तत्परं यद्वर्त्म [तत्][148]तीर्णोऽतिक्रान्तः । किं कृत्वा? तस्मिन् आम्रकूटे मुहूर्तं[149]क्षणमात्रं स्थित्वा । कीदृशे तस्मिन्? वनचरवधूभुक्तकुञ्जे वनेचरकान्तासेवितगहने[150] । वनेचर शब्दे सप्तमी लुक् बहुलकात् । कीदृशं(श)स्त्वं? तोयोत्सर्ग(र्गा)त्[151] जलवर्षणात् । {त} द्रुततरगतिः, शीघ्रगमनः, कीदृशीं रेवां [नर्मदां][152]? उपलविषमे शिलाकूटस्थपुटे विन्ध्यपादे विन्ध्याचलाधोभागे विशीर्णां प्रसृताम् । उत्प्रेक्ष्यते । गजस्याङ्गे भूतिमिव शोभामिव । कीदृशी भूतिः?[153] भक्तिच्छेदैर्भक्तिविच्छित्तिभिर्विरचितां कृताम् ॥ १९ ॥

**तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-**
**र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।**
**अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां**
**रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥२०॥**

[अथ त्यक्ततोयस्य प्रतिक्रियामुपदिशन्नाह ।]

रेवायाः नद्याः तोयं नीरमादाय गृहीत्वा त्वमग्रे(ग्र)तो[155] गच्छेर्यायाः । किं लक्षणं तोयं? तिक्तैः कटुकैः वनगजमदैर्वासितं सुरभिकृतम् । पुनः किं लक्षणं [तोयं][156] ? जम्बुकुञ्जप्रतिहतरयम् । [जम्बुकुं] जेषु[157] जम्बुवृक्षवनगह्वरेषु[158] प्रतिहतः, स्खलितो रयो वेगो यस्य तत् ।

किं लक्षणस्त्वं ? वाति(न्त)वृष्टिः कृतवर्षणः । अन्योऽपि कृतवमनः कटुककषायं वस्तु गृह्णाति जलग्रहणेषु[159] गुणमाह । हे घन ! अन्तःसारं जलपरिपूर्णं त्वां अनिलो वायुस्तुलये(यि)तुं कलयितुं[160] न शक्ष्यति, न समर्थो भविष्यति । हि यस्मात्कारणात् सर्वोऽपि जनः रिक्तः शून्यो लघुर्भवति पूर्णता घनाढ्यता गौरवाय भवति । तेन तव जलगुरुत्वेन नाऽनिलात् परिभवप्राप्तिः ॥२०॥

**नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-**
**राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।**
**जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः**
**सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥२१॥**[161]

[मार्गसौकर्योपदेशेन] प्रलोभयन्नाह । सारं श्रेष्ठम् । सर्वजनप्रियं प्रियवचनं लपन्तीति सारङ्गाश्चातकास्ते भवतो मार्गं सूचयिष्यन्ति {कथयिष्यन्ति} स्वजातिषु परस्परं कथयिष्यन्ति । नूनं अनेन मार्गेणास्मत्सुहृज्जीमूतो गतः परं भाग्यहीनैरस्माभिः नावलोकित इति । चिह्नान्युदि(द्दि)श्यन्ते । चातकैरेव जलदान्नीरकणाः पातव्या {नि न} [नान्यत][162] इति तेषां जीमूत एव शरणम् । किं कृत्वा सूचयिष्यन्ति ? चिह्नान्याह । अर्धरूढैः अर्धनिष्पन्नैः केसरैर्मुकुलैर्हरितकपिशं



Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

नीलपिङ्गं नीपं कदम्बं कुसुमं दृष्ट्वा समालोक्य तद्विना जलपातं विना न जायते । न केवलं सारङ्गाश्चातकास्तव मार्गं सूचयिष्यन्ति । च पुनः सारं सलिलं गच्छन्ति, सारङ्गा गजास्ते मार्गं सूचयति(न्ति) । किं कृत्वा ज्ञास्यन्ते ? लक्षणान्याह । कच्छं[163] कच्छमनुलक्ष्यीकृत्यानुकच्छमनुनीरं प्रथममुकुला उत्पन्नाद्यकोरकाः कन्दली[164] वनस्पतिविशेषात् दृष्ट्वा ते तव[165] मार्गं सूचयिष्यन्ति अयमर्थो न सुन्दरतरः । यतस्ते गजाः पीवरकाया कर्दमाकुलायां सि(शि)लायां, गन्तुमपि न पारयन्त्यतो जीमूतावतारसमया(य) स्तेषां[166] न सुखदः । च पुनः सारं सत्वरं [शीघ्रं][167] गच्छन्तीति सारङ्गा हरिणास्ते पन्थानं मार्गं सूचयिष्यन्ति । किं कृत्वा? दग्धारण्येषु ग्रीष्मादावप्लुष्टकाननेषु । उर्व्याः पृथिव्याः । अधिकसुरभि गन्धमाघ्राय सुंघित्वा[168] अधिकश्चासौ सुरभि अधिकसुरभिस्तम् । जलकणपतनात्तत्र सौरभ्याविर्भावः । अयमर्थो[ऽ]पि विपश्चितां चेतसि न चमत्करोति । यतो हरिणानां मेघेन सह मैत्रीभावो न । अतश्चातका एव सर्वान् भावान् विदित्वा ते मार्गं सूचयिष्यन्ति । कीदृशस्य ते ? जललवमुचः जललवान् मुञ्चतीति जललवमुक् तस्य ॥२१॥

**अम्भोबिन्दुग्रहणरभसान् चातकान्वीक्षमाणाः**
**श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।**
**त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः**
**सोत्कण्ठानि प्रियसहचरीसम्भ्रमालिङ्गितानि ॥२२॥**[169]

सिद्धा [गगनचर][170]देवविशेषाः । प्रियसहचरी सम्भ्रमालिङ्ग्य(ङ्गि)तानि । सोत्कण्ठा{युक्ताय}नि [उत्कण्ठायुक्तानि][171] मानयिष्यन्ति अङ्गीकरिष्यन्ति । किं कृत्वा ? स्तनितसमये गर्ज्जारवसमये[172] त्वां भवन्तं, आसाद्य प्राप्य । सिद्धाः किं कुर्वाणः ? अम्भोबिन्दुग्रहणरभसान् चातकान् वीक्षमाणाः । अम्भोबिन्दूनां ग्रहणे रभसा [व्यग्रा][173] उत्ताला अम्भोबिन्दुग्रहणरभसास्तान् । सिद्धाः [पुनः कथंभूता[174]], किं कुर्वन्तः ? बलाका बिसकण्ठिका निर्दिशन्तो दर्शयन्तः । कया ? परिगणनया । परिसामस्त्येन गणना, तया, एक-द्वि-त्रि-संख्यया । कीदृशा बलाका ? श्रेणीभूताः [[175]अश्रेणयः श्रेणयो जाताः इति श्रेणीभूताः] पङ्क्तिबद्धाः ॥२२॥

**उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः**
**कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।**
**शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः**
**प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत् ॥ २३**

हे सखे ! मत्प्रियार्थमस्मद्दयितार्थं, द्रुतमपि शीघ्रमपि[176] जिगमिषोस्तव पर्वते पर्वते कालक्षेपं विलम्बं उत्पश्यामि अवलोकयामि । कीदृशे पर्वते पर्वते? ककुभसुरभौ अर्जुनवृक्षसुगन्धि[नि][177]। भवान् त्वम् । कथमपि केनाप्युपायेन । आशुः शीघ्रं, गन्तुं व्यवसे(स्ये)त् उपायं कुर्यात् । कीदृशो भवान् ? [178]शुक्लापाङ्गैर्मयूरैः प्रत्युद्यातः प्रत्युद्गतः । किं कृत्वा? केका मयूरवाणी । [179]स्वागतीकृत्य वचनैः कुशलप्रश्नैं कृत्वा । कीदृशैस्तैः ? सजलनयनैर्नेत्रोदकयुक्तैः ॥२३॥

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥२४॥[180]

हे जीमूत ! दशार्णा दशार्णदेशाः, कतिपयदिनस्थायिहंसाः संपत्स्यन्ते । कतिपयदिनानि स्थायिनो हंसा येषु ते । जलदर्शने मानसे(सं) गमनात् । क्व सति? त्वयि[181] भवति, आसन्ने निकटवर्तिनि सति {सति} । कीदृशाः दशार्णाः ? शु(सू)चिभिन्नैर्विकस्वरैः केतकैः केतककुसुमैः, पाण्डुच्छायोपवनवृतयः पाण्डुच्छाया गौरकान्तिः उपवनवृत्तिरुद्यानकण्ठो येषां ते । सितत्वा[त्][182] केतकानाम् । पुनः कीदृशा दशार्णाः? गृहबलिभुजां चटकानां काकानां[183] वा नीडारम्भैरालयोद्या-(द्य)मैः[184] आकुलग्रामचैत्याः; आकुलानि व्याप्तानि ग्रामचैत्यानि, ग्रामपादपा वृक्षाः, येषु ते । पुनरपि कीदृशाः? परिणतफलश्यामजम्बूवनान्ताः परिणतफलैः परिपक्वफलैः , श्यामजम्बूवनान्ताः येषु ते ॥२४॥

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मा-
त्सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥ २५॥[185]

हे जलद ![186] तेषां दशार्णानां विदिशालक्षणां विदिसे(शे)ति लक्षणं नाम यस्याः सा, तां राजधानीं गत्वा कामुकत्वस्य कामी(मि)[187]जनस्याऽविकलं संपूर्णं फलं सद्यस्तत्कालं लब्धा लप्स्यसि(से) । कुत इत्याह ? यद्यस्मात्कारणात्{कारणात्} चे(वे)त्रवत्या[188] नद्यास्तदेवंविधं पयः पास्यसि । कीदृशं पयः? तीरोपात(न्त)[189]स्तनितसुभगं, तीरोपान्ते स्तनितेन विहगकूजितेन, सुभगं रम्यं , यत्तत् । पुनः कीदृशं ? स्वादु मिष्टम् । तत्पयः किमिव ? मुखमिव यथा कश्चित्कामी कस्याश्चित्कामिन्याः रतिकूजितेन रम्यं सभ्रूभङ्गं कटका(टाक्षा?)न्वितं [190] मुखं पीत्वा कामुक-जनानां सम्पूर्णफलं प्राप्नोति, तथा भवान्न(न)पीत्यर्थः.[191] ॥२५॥

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥२६॥[192]

हे पयोद ! तत्र विदिशायां नीचैराख्यं गिरिमचलं विश्रामहेतोर्निवासार्थमधिवसेराश्रयेः । कीदृशं नीचैराख्यं गिरि(रिं)? प्रौढपुष्पैः विकसितकुसुमैः कदम्बैः नीपवृक्षैः त्वदीयसंपर्कः मित्रस्य मेलापकस्त्वसं(त्सं)[193]पर्कस्तस्मात् त्वत्सम्पर्कात् । उत्प्रेक्ष्यते, पुलकितमिव[194] [रोमाञ्चितमिव] ।

Jain Education International  For Personal & Private Use Only  www.jainelibrary.org

विकसितस्य नीपस्य रोमशता[नि][195] सम्पद्यन्ते । यो गिरिः नागराणां नागरिकलोकानां उद्दामानि प्रौढानि यौवनानि प्रथयति प्रख्यापयति । कैः शिलावेश्मि(श्म)भिः[196] । कीदृशैः? पण्यस्त्रीरति-परिमलोद्गारिभिः । पण्यस्त्री[रति]परिमलं [197] वेश्यासुरतां(ता)मोदं [198] उद्गिरिति(रन्ति)[199] यानि तानि तैः ॥२६॥

**विश्रान्तः सन्व्रज *नगनदीनीरजातानि सिञ्च-**
**न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।**
**गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां**
**छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ॥२७॥[200]**

**'वननदीतीरजातानि' इति टीकायां दृश्यते ।**

हे सखे ! तत्र गिरौ विश्रान्तस्सन्नग्रतो व्रज याहि[201] त्वम् । त्वं किं कुर्वन्? उद्यानाना-मुपवनानां यूथिकाजालकानि यूथिकाकोरकान् । सिञ्चन् उक्षन् । कीदृशानि तानि? वननदीतीर-जानाति(तानि)[202] काननसरित्तटोत्पन्नानि । कीदृशस्त्वं ? छायादानात् पुष्पलावीमुखानां क्षणप-रिचितः । पुष्पाणि लुनन्तीति पुष्पलाव्यस्तासां मुखानि । तेषां किंलक्षणानां मुखानां[203]? क्लान्तानि म्लानानि कर्णोत्पलानि येषां तानि, तेषाम् । कया ? गण्डस्वेदापनयनरुजा गण्डयोर्य(योः)[204] स्वेदो घर्मस्तस्यापनया(य,नेनोत्पुंसनेन या रुग् तया ॥२७॥

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**
**सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।**
**विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां**
**लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥२८॥[205]**

हे वयस्य ! हे मेघ ! हे मित्र ! [206] यद्यपि भवतस्तव उत्तरायां कौबेरीं प्रस्थितस्य, वक्रः कुटिलः, पन्थाः मार्गो भवति , तथाऽपि उज्जयिन्यां नगर्या(र्याः)[207] सौधोत्सङ्ग-प्रणय-विमुखो[208] मा स्म भूरवश्यं तां गच्छेर्यायाः[209] । यदि चेत् तत्र उज्जयिन्यां पौराङ्गनानां नागरिक-रमणीनां, लोचनैर्न रमसे[210] न क्रीडसि, तदा वञ्चितो[ऽ]सि । अवलोकनाभावात् । कीदृशैः लोचनैः? विद्युद्दामा(म)स्फुरितचकितैः, विद्युद्दाम्नः स्फुरितेन चकितानि [त्रस्तानि][211] नेत्राणि तैः । पुनः कीदृशैः ? लोल(ला)पाङ्गैः लोलाश्चञ्चला अपाङ्गा नेत्रप्रान्तो(न्ताः) येषां तानि, तैः ॥२८॥

**वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः**
**संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।**
**निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य**
**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥२९॥[213]**

हे पयोद ! [214]नैर्वं(निर्वि)न्ध्यायाः नद्याः, पथि प्रवाहे, सति(न्ति)[215]पत्याश्लिष्य रसाभ्यन्तरो भव, पानीयगर्भः स्यात्(स्याः) । त्वं पानीयं पिबेरित्यर्थः । रसाभ्यन्तरः शृङ्गाररसवासिते(तो)[216]

भवति। विश्लेषोक्तिः । तां कामयेरिति तात्पर्यम् । किं लक्षणायाः तस्याः ? विचिक्षोभेन [217][क]ल्लोलकम्पनेन स्तनिता शब्दायमाना या विहङ्गश्रेणिः विहङ्गमपङ्क्तिः । सैव काञ्चीगुणो मेखलागुणो यस्याः सा, तस्याः । तस्याः किं कुर्वत्याः ? पाखा(षा)णादो(दौ) स्खलितेन सुभगं यथा स्यादेवं संसर्पन्त्याः, गच्छन्त्याः । पुनः किं लक्षणायाः ? दर्शितावर्तनाभेः, दर्शिता आवर्त एव नाभिर्यया सा तस्याः । कथमत्राह्वानाभावेऽनुरागिता योग्येत्याह । हि स्फुटं निश्चितम् । स्त्रीणां प्रियेषु दयितेषु, विभ्रमो बिलासः, आद्यं प्रथमं, प्रणयवचनं स्नेहवाक्यम् ।[218] अथ नारीसाधर्म्यमाह । अन्याऽपि कामिनी शब्दायमानरस(श)ना[219] सविलासा गच्छन्ती हावभावान्विता पत्युर्नाभिं दर्शयति[220] ॥२९॥

**[221]वेणीभूतप्रतनुसलिलां तामतीतस्य सिन्धुः**
**पाण्डुच्छायातटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।**
**सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती**
**कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥३०॥**

हे सुभग ! येन विधिना, येनोपायेन, सा सिन्धुर्नदी कार्श्यं कृशतां त्यजति, स विधिस्त्वयैव उपायो रचनीयः । तत्र त्वं वर्षेरिति । सिन्धुः किं कुर्वती विरहावस्थायाः(स्थया;)[222] ? ते तव, सौभाग्यं व्यञ्जयन्ती प्रकटयन्ती । कीदृशस्य ? तां नदीमतीतस्य । कीदृशी सा ? वेणीभूतप्रतनुसलिला, त्वद्विरहेण वेणीभूतं[223] प्रतनुत्वात्सलिलं यस्याः सा । पुनः की[दृशी] ? सिन्धुः तटरुहतरुभ्यो भ्रंसी(शी)नि भ्रष्टानि तटरुहतरुभ्रंसि(शि)भिः, तैः जीर्णपर्णैः जर्जरकिसलयैः पाण्डुच्छाया । पत्युर्वियोगेऽन्यापि नारी निजदयितसौभाग्यं हृदि धरन्ती कृशा पाण्डुरा वा[224] भवति ॥३०॥

**[225]प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धा-**
**न्पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।**
**स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां**
**शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥३१॥**

ततः पश्चात् पूर्वोदि(द्दि)ष्टो(ष्टां)[226] प्राक्कथितां विशालामुज्जयिनीं पुरीं अनुसर गच्छ । किं कृत्वा ? अवन्तीन् देशान् प्राप्य । कीदृशान् ? उदयनकथासु कोविदा विचक्षणाः श्रीमद्वृद्धा (ग्रामवृद्धा)[227] येषु ते तान् । कीदृशीं विशालां ? श्रिया रुद्ध्याऽपि विशाला अनल्पा, श्रीविशाला, ताम् । उत्प्रेक्ष्यते । दिव(वः)[228] स्वर्गस्य कान्तिसहितं एकमद्वितीयं खण्डमिव ।[229] स्वर्ग(गै)-कदेशस्य । तत्र कथमागत इत्याह । क्व सति गां गतानां स्वर्गिणां देवानाम् । सुचरितफले उपभुक्त्वा[230] स्वल्पीभूते अल्पीभूते सति कीदृशं खण्डं ? उत्प्रेक्ष्यते — तेषां देवतानां शेषैः सच्चरितैः पुण्यैर्हृतमिव भुवमानीतमिव ॥३१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[231]दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुरितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३२

यत्रोज्जयिन्यां शिप्रावातः शिप्रानदीपवनः स्त्रीणां सुरतग्लानिं हरति, निर्गमयति। कीदृशः ? अङ्गानुकूलः,[232] शीतलसुरभित्वात् । शिप्रावातः, किं कुर्वन् ? सारसानां लक्ष्मणानां , पटु स्पष्टं , मदकलं मदेन कलम् । मनोहरं मदकलं कूजितं शब्दं[233] दीर्घीकुर्वन्[234] प्रसारयन् । [कीदृशः][235] शिप्रावातः ? प्रत्युषेषु प्रभातेषु, स्फुरितकमलामोदमैत्रीकषायः । स्फुरितानि विकसितानि यानि कमलानि तेषामामोदः परिमलस्तेन सह या मैत्री तया कषायः । कषायरसयुक्तो भावित इत्यर्थः । उत्प्रेक्ष्यते । प्रार्थनाचाटुकारः । प्रियतम इव, भर्त्ता इव । यथा प्रार्थनायां चाटुकारः प्रियकृत्ये प्रि(प्रे)यान् कामिन्या अङ्गग्लानिं हरति ॥३२॥

[236]हारांस्तारांस्तरलगुटिकान्कोटिशः शङ्खशुक्तीः
शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान्विद्रुमाणां च भङ्गा-
न्संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥३३॥

यस्यां नगर्यां, तारान् मनोहरान् हारान् विपणिरचितान् हट्टस्थापितान्[237] दृष्ट्वा सलिलनिधयः समुद्राः तोयमात्रा(त्र)विशेषाः[238] संलक्ष्यन्ते, जनैः ज्ञायन्ते। कीदृशान् हारान् ? तरलगुलि(टि)कान् ।[239] तरला सरला । तरलो मध्यमणियेषु ते तान् । न केवलं हारान् विलोक्य कोटिशः कोटिसंख्या{यै}काः शङ्खशुक्तीर्दृष्ट्वा संख्याश्च (शङ्खाश्च)[240] शुक्तयश्च शङ्खशुक्तीस्ताः यस्यां पुर्यां, शष्पश्यामलान्मरकतमणीन् दृष्ट्वा, तोयमात्राः जलनिधयः संलक्ष्यन्ते । शिष्प (शष्पं) बालतृणं, तद्वच्छायामाहरितास्तान् । कीदृशान् मरकतमणीन् ? उन्मयूष(ख)प्ररोहान् । उन्मयूष(खाः) ऊर्ध्वमुखाः प्ररोहा अङ्कुरा येषु ते, तान् । च पुनर्यस्यां पुर्यां विद्रुमाणां प्रवालानां भङ्गान्, विच्छेदान् खण्डान् दृष्ट्वा जला{अ}वशेषाः समुद्राः संलक्ष्यन्ते । ज्ञास्यन्ते[241] ॥३३॥

[242]प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून्रमयति जनो यत्र बन्धूनभिज्ञः ॥३४॥

हे जलद ! यत्रोज्जयिन्यां अभिज्ञः कथासु विदग्धो जनः आगन्तून् [प्राघूर्णकान्][243] बन्धून् स्वजनान् इति रमयति । इतीति किं ? अत्रास्मिन् प्रदेशे वत्सराजः शतानी(नि)कनृपपुत्रः प्रद्योतस्य राज्ञः प्रियदुहितरं वासवदत्ता(त्तां) पुत्रं(त्रीं)[244] जह्रे जहार । अत्रा(त्र)[245] स्थाने

तस्यैव प्रद्योतस्य राज्ञः हि(ही)मं तालद्रुमवनं अभूत् बभूव । हैमं तालद्रुमस्य वनं[246] हैमतालद्रुमवनम् । अत्र स्थाने किलेति सत्ये नलगिरिर्नाम गजः । दर्पात्स्तम्भमुत्पाद्यो(ट्यो)द्भ्रान्ते(न्तो)[247] बभ्राम ॥३४॥

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपैः*
बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखिन्नान्तरात्मा
मुक्ता स्वेदं ललितवनितापादरागाङ्कितेषु ॥३५॥[248]

* धूपैः, इति टीकायां दृश्यते ।

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥३६॥[249]

[अनेन युग्मेन]

हे बन्धो ! त्रिभो(भु)वनगुरोस्त्रिजगत्पूज्यस्य चण्डीश्वरस्य महेश्वरस्य धाम गृहम् । त्वं यायाः गच्छ(च्छेः) । किं कृत्वा ? अस्याः पुर्याः हर्म्येषु खेदं मार्गश्रमं, मुक्त्वा परित्यज्य । कीदृशस्त्वं ? जालोद्गीर्णैः गवाक्षरन्ध्रनिग्र(र्ग)तैः[250] केशसंस्कारधूपैः वनिताकचोपसंस्कारधूपैः उपचितं वपुः, स्थूलशरीरः धूमतुल्यत्वात् मेघानाम् । पुनः कीदृशस्त्वं ? बन्धुप्रीत्या मित्रस्नेहेन भवनशिखिभिर्गृहमयूरैः दत्तनृत्योपहारः । दत्तः कृतः नृत्यमेवोपहारः पूजा यस्य सः । पुनरपि कीदृशस्त्वं ? अध्वखिन्नान्तरात्मा, अध्वना मार्गेण खिन्नः श्रान्तो[ऽ]न्तरात्मा यस्य सः । पुनः [कीदृशस्त्वं] ? [251] गणैः नन्दी नन्दा(चन्द्रा)दिभिः[252] इति सादरं वीक्ष्यमाणः दृश्यमाना(णः) । इति किं भर्तुः स्वामिनः कण्ठच्छवि, नीलग्रीवत्वात् । कीदृशेषु हर्म्येषु? कुसुमसुरभिषु । पुनः [कीदृशेषु][253] हर्म्येषु ? ललितवनितापादरागाङ्कितेषु । ललिता सविलासा या वनितास्तासां पादरागेण चरणाऽलक्तकेनाङ्कितेषु । चिह्नान्तेषु (चिह्नितेषु)[254] । कीदृशं धाम ? पुण्यं पवित्रं शम्भोः सेवितत्वात् । पुनः [कीदृशं][255]{य} धाम ? गन्धवत्याः नद्याः प्रसद्भिः(द्भिः)[256] पवनैः धूतोद्यानं कम्पितोपवनम् । कीदृशैः मरुद्भिः, कुवलयरजोगन्धिभिः, कुवलयरजसां गन्ध उत्पलरेणुसौरभं विद्यते येषां ते तैः । पुनः कीदृशैस्तैः ? तोयक्रीडानिरतयुवतिस्नानतिक्तैः[256] तोयः(य)क्रीडायां निरता[ऽऽ]सक्ता(क्ता) याः युवतयस्तासां स्नानेन तिक्तैः कटुकैः ॥३५–३६॥

[258] अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदभ्येति भानुः ।
कुर्वन्सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥३७॥

हे जलद ![259] अ[न्य]स्मिन्[260]{न} अपि काले महाकालं भवं, तं रुद्रं, आसाद्य

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्राप्य {ते} त्वया तावत् प्रस्थातव्यम् ।[261] यावद्भानुः सूर्यो नयनविषयं नेत्रगोचरमभ्ये(त्ये)-त्यागच्छति । त्वं किं [कु]र्वन् ?[262] शूलिनो महेश्वरस्य सन्ध्याबलिपटहतां कुर्वन्, सन्ध्याबल्यर्थं-(र्थं)[263] पटहताम् तूर्यत्वं {सन्याध्याबलि} सन्ध्याबलिपटहतां ताम् । कीदृशीं तां ? श्लाघनीयां, तदा त्वं आमन्द्राणां सर्वमधुराणां गर्जितानां अविकलं सम्पूर्णं फलं लप्स्यते(से) ।[264] कृत्यानां कर्तरि षष्ठी वा ॥३७॥

[265]पादन्यासैः क्वणितरसनास्तत्र लीलावधूतै–
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दू–
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ॥३८॥

हे मेघ ! वेश्या महाकालस्वामिनो नर्तक्यः त्वत्तो(त्तो) भवतः सकाशात् नखपदसुखान्न-खारदसुखकरान् मधुकरश्रेणिदीर्घान् भ्रमरपङ्क्तिवत्प्रलम्बान् कटाक्षान्, त्वयि भवति विषये, आमो-क्ष्यन्ते । किं कृत्वा ? वर्षाग्रबिन्दून् वर्षस्य वर्षणस्या{ऽ}ग्रबिन्दवो वर्षाग्रबिन्दवस्तान्, प्राप्य । किं लक्षणाः वेश्या[ः] ? पादन्यासक्वणितरसनाः । चरणचंक्रमणेन शब्दायमानमेखलाः । पुनः किं लक्षणाः वेश्याः ? चामरैः क्लान्तहस्ताः, खेदमानकराः, सौकुमार्यत्वात्तासाम् । कीदृशैश्चामरैः ? लीलावधूतैः । सलीलं चालितैः । {पुं} [पुनः कीदृशैः][266] ? रत्नच्छायाखचितबल(लि)भिः रत्नच्छायया खचिताः प्रकटीकृता वलय उदरलेखा यैः स्तनितैः(?)[268] (तानि तैः) ॥३८॥

[269]पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः विकसितजपापुष्परक्तं दधानः ।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥३९॥

हे जीमूत ! पश्चादनन्तरम् । नृत्यारम्भे नाच(ट्य)-समये पशुपते(तेः) महेश्वरस्य आर्द्रना-गाजिनेच्छां आर्द्रगजचर्माभिलाषं[270] हर पूरय । कीदृशस्त्वं ? उच्चैरुन्नतं, भुजतरुवनं दोर्दुम(म-षण्डं) मण्डलेन मण्डलाकार(रे)णाभिलीनः । तीर्यग् संश्रितः । त्वं किं कुर्वाण(णः), ?[271] विकसितं जपापुष्परक्तं नूतनमध्याह्नः, वृक्षः[272] कुसुमवल्लोहितं सान्ध्यतेजोविभ्रमं दधानः ।[273] पुनः [कीदृशस्त्वं][274]? भवान्या पार्वत्याः शान्तोद्वेगस्तिमितनयनं यथा स्यात् । दृष्टभक्तिरवलो-कितवरिस्थतिः(अवलोकितस्थितिः) गजाजिनच्छादनात् । विद्युन्मेघा(षा) यभावात्[275] । शान्तोद्वेगानि निवृत्तखेदानि अत एव स्तिमितानि निश्चलानि नयनानि यत्र दर्शने तत् ॥३९॥

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥४०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्र पुर्यां योषितां अभिसारिकाणां नारीणाम् । नक्तं रात्रौ सौदामिन्या विद्युता कृत्वा उर्वीं वसुधाम्। दर्शय प्रकाशय। योषितां किं कुर्वतीनां ? रमणवसतिं भर्ता(र्तृ){र}गृहं गच्छन्तीनां [व्रजन्तीनाम्][277], क्व सति ? सूचिभेद्यैः सान्द्रैस्तमोभिरन्धकारैः। राजमार्गे (र्गे)[278] नरपतिपथे-(थि)दृष्या(ष्टा)लोके सति। प्रच्छादितप्रकाशे सति। पथि≤अपपुष्टवस्त्रदन्तता ?≥[279] किं लक्षा(क्ष)ण(ण)या[280] सौदामिन्या कनकनिषक(कष)वत्[281] [नि]कषपट्टवत् [कषपट्टकवत्][282] स्निग्धाऽदक्षा तदा एवं कृत्वा तोयोत्सर्गस्तनितमुखरस्त्वं मा स्म भूः। तोयोत्सर्गार्थं स्तनितेन गर्जितेन मुखरः सशब्दो मा भूः, यतस्ता {ऽ}[283] विक्लवा कातराः वर्तन्ते ॥४०॥

[284]तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥४१॥

हे मेघ ! सूर्ये दृष्टे सति पुनरपि भवान् अध्वशेषं अवशिष्टमार्गं वाहयेत् उल्लङ्घयेत् । किं कृत्वा ? तां रात्रिं कस्या(स्यां)चित्[285] भवनवलभौ। किं लक्षणायां वलभौ ? सुप्तपारावतायां. सुप्ता पारावताः कपोताः यस्यां सा तस्याम्। नागरिकैस्ते(स्ते) हि कण्ठरुतश्रवणार्थं गृहे धार्यन्ते(न्ते)।[286] किं लक्षणस्त्वं ? चिरविलसनात् चिरकालोद्योतनात्। खिन्न[287] श्रान्तम्। विद्युदेव कलत्रं दारा यस्य सः, युक्तो[ऽ]यमर्थः। खलु निश्चितम्। सुहृदां मित्राणाम्। अभ्युपेतार्थकृत्याः अङ्गीकृतकार्याणि न मन्दायंते सालसा न भवन्ति ॥४१॥

[288]तस्मिन्काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥४२॥

हे जलद ! अस्माद्धेतोः, आशु शीघ्रं, भानोः सूर्यस्य वर्त्म त्यज परिहर। सूर्यस्याच्छादको मा भूः। य[तः][289] तस्मिन् काले प्रभातसमये, प्रणयिभिर्दयितैः समागत्य खण्डितानां[290] नारीणां नयनसलिलं चक्षुरश्रु, शान्तिमुपशमं नेयं प्रापणीयम्। यदि त्वं पटनिभो भविष्यसि तदा ते निशाशङ्कया नागमिष्यन्ति। अतो रवेः वर्त्म त्यज। सो[ऽ]पि सूर्यो[ऽ]पि खण्डितायाः कमलिनी-प्रियायाः कमलवदनात् कमलमुखात् प्रालेयांशु(यास्रं)[291] अवश्यायरोदनं हर्तुं स(श)म-यितुं,[292] प्रत्यावृत्तो व्याघुटितः[293] (व्याघटितः ?) त्वयि भवति अनल्पा {स्तभ्यया294?} (ऽभ्य-सूया स्यात् भवेत्) अनल्पा प्रचुरा अभ्यस्त(सू)यैर्ष्या(र्ष्या) यस्या {प्री} (यस्य)।[295] कीदृशे त्वयि ? कररुधि किरणरोधके। अन्यस्थापि प्रियां प्रार्थयमानस्य यो हस्तमवष्टम्भनीयात् तस्य तत्र-(त्र)[296] मन्युर्भवति ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

निद्राकषायमुकुलीकृतताम्रनेत्रो
नारीनखव्रणविशेषविचित्र(त्रि)ताङ्गः ।
यस्याः कु(कु)तो[ऽ]पि गृहमेति पतिः प्रभाते
सा खण्डे(ण्डि)[ते]ति कथिता कविभि[:] पुराणि(णैः)[297] ॥४२॥

[298]**गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने**
**छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।**
**तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या–**
**न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥४३॥**

हे सखे ! गम्भीरायाः सरितो नद्याः निर्मले पयसि जले, ते तव च्छायात्मापि प्रतिबिंबरूपः प्रवेसं(शं)[299] लप्स्यते। कीदृशश्छायात्मापि ? प्रकृतिसुभगः; प्रकृत्या स्वभावेन सुन्दरः प्रकृतिसुभगः[300] । कीदृशस्य ते ? लम्बमानस्य जलभरमन्थरत्वात् । तत्रैव तिष्ठतः तस्मात्कारणात् अस्यां गम्भीरायां चटुलशफरोद्वर्तनप्रेक्षितानि । धैर्यात्[301] मोघीकर्तुं निष्फलं विधातुं नार्हसि[302] न योग्यो भवसि । माऽन्यतो गम इत्यर्थः । चटुलशफरोद्वर्तनमेवोत्प्रेक्षितानि । चटुलः । कीदृशानि च प्रेक्षितानि ? कुमुदविशदानि, कैरवशतानि (शुभ्राणि)[303] पयसि कस्मिन्निव ? चै(चे)तसीव[304] यथाऽन्यो[ऽ]पि यः किल प्रकृतिसुभगो भवति, तस्य च्छायामपि पट्टिकायालेख्यगतमपि रूपं कस्याश्चिद्गांभीर्यगुणशालिन्याः कामिन्याश्चित्ते प्रविशति । परोक्षेऽपि तदनुरागिणी भवतीत्यर्थः । सो[ऽ]पि तथाविधविलोकितैः स्वकीयं भावमाविर्भावयति । सो[ऽ]पि विभ्रमान् विफल{ल}पि(यि)तुं नार्हति । तदेवं त्वमपि तदाश्लेष{मुख}विमुखो मा स्म भूरिति सम्बन्धः ॥४३॥

[305]**तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं**
**हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।**
**प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि**
**ज्ञातास्वादो विपुलजघनां को विहातुं समर्थः ॥४४॥**

हे सखे ! ते तव, प्रस्थानं गमनं, कथमपि कृच्छ्रेण भावि भविष्यति । किं कृत्वा ? तस्याः गम्भीरायाः नील(लं){वधाय} [श्यामं][306] सलिलवसनं, सलिलमेव वसनं वस्त्रं{सलिलवसनं} हृत्वा पीन[त्व]वशादपास्य[307] [कीदृशस्य ते ? लम्बमानस्य जलभरमंथरत्वात् तत्रैव तिष्ठतः] कीदृशं स.(=सलोलं) वसनं ? प्राप्ता वानीरशाखा[308] वेतसवृक्षाणां शाखा येन तत् । उत्प्रेक्ष्यते । करधृतमिव हस्ता{विल}वि(व)लम्बितमिव[309] । पुनः किं लक्षणं ? मुक्तरोधोनितम्बं, मुक्तं रोध एव नितम्बो येन, तव । युक्तो[ऽ]यमर्थः । कः ज्ञातास्वादोऽनुभूतस्य(रसः)[310], विपुलजघनां पृथुनितम्बां, नारी(रीं) विहातुं त्यक्तुं, समर्थोऽपि तु न को[ऽ]पि । यथा अंशुकं हरतः कामिनीं न को[ऽ]पि कराभ्यां वस्त्रं तद्धृते ॥४५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्वन्निष्पन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥४५॥[311]

हे जलद ! ते भवतः, शीतः शीतलो वायुः[312] पवनो नीचैर्वास्यति, मन्थरं गमिष्यति । कीदृशस्य ते ? देवपूर्वं गिरिं, देवगिरिनामाऽचलं उपजिगमिषोः, यियासोः । कीदृशो वायुः ? पवनः । त्वन्निष्पन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः, तव निस्प(ष्प)न्देन जलवर्षणेन, उच्छ्वसिता विकसिता या वसुधा पृथ्वी तस्या गन्धसम्पर्केण रम्यः, प्रधानः । पुनः कीदृशः ? दन्तिभिः गजैः श्रो(स्रो)तोरन्ध्रध्वनितसुभगं यथा भवत्येवं, पीयमानोऽग्रमानः ? श्रो(स्रो)तोरन्ध्र[331] करविवरं तस्य ध्वनितं सीत्कारः, तेन सुभगं प्रधानं ससूत्कृतं यत्र तत् ! पुनरपि कीदृशः काननोदुम्बराणां फलानां परिणमयिता पाचयिता ॥४५॥

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना—
मत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ॥४६॥

स्कन्दं कार्तिकेयकुमारम् । पुष्पासारैः कुसुमवर्षणैः भवान् स्नपयितुम् । कीदृशं स्कन्दं ? तत्र देवगिरौ नियतवसतिं, निश्चलनिवासम् । कीदृशो भवान् ? पुष्पमेघीकृतात्मा पुष्पैर्मेघीकृतः सफलीकृत आत्मा येन सः । कीदृशैः पुष्प(ष्पा)सारैः[314] ? व्योमगङ्गाजलार्द्रैः व्योमगङ्गाजलेन आर्द्रा व्योमगङ्गाजलार्द्रास्तैः । हि यस्मात् कारणात् वासवीनां चमूनां इन्द्रसेनां रक्षाहेतोस्त्राणाय । नवशश(शि)भृता[315] महेश्वरेण हुतवहमुखेऽ(ऽ)ग्नौ तत्तेजो वीर्यं सुभृ(संभृ)तं[316] न्यस्तम् । कीदृशं तेजः ? अत्यादित्यं, अतिक्रान्तः आदित्यो येन तत् ॥४६॥

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥४७॥

हे जलद ! पश्चादनन्तरम् । पावक(केः) कार्तिकेयस्य तं मयूरं गर्जितैः शब्दितैर्नर्तयेथाः[318] । की० । अद्रिग्रहणगुरुभिः पर्वतप्राप्तिपीवरैः । तं कं, यस्य गलितं पतितं बर्हं, पिच्छं भवानी पार्वती [पुत्रप्रेम्णा][319] पुत्रस्नेहेन कर्णे करोति । कीदृशे कर्णे ? कुवलयपदप्राप्ति(पि)[320] उत्पलस्थानार्हे । कीदृशं बर्हं ? जो(ज्यो)तिर्लेखावलयि[321] ज्योतिर्लेखावलयं तेजोराशिमण्डलं विद्यते यस्य तत् । पुनः कीदृशं ? बर्ह(र्हि)[णं] हरशशिरुचां महेश्वरमस्तकचन्द्रचन्द्रिकया धौतापाङ्गं प्रक्षालितनयनान्तम् ॥४७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[322]आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्य-
न्स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥४८॥

अथ त्वमुल्लंघिताध्वाऽतिक्रान्तमार्गः सन् [त्वं][323] विलम्बेथाः विलंबं कुर्याः । किं कृत्वा ? एनं शरवणभु(भ)वं[324] देवं स्कन्दं आराध्य पूजयित्वा । शरवणात् भवतीति शरवणभूस्तं सोढुम-क्षम{क्षम}य गङ्गया तद्वीर्यं शरवणे क्षिप्तम् । प्राणि(प्रणि)रन्तः[325] शरेष्विति णत्वम् । पुनः कीदृशस्त्वं ? सिद्धद्वन्द्वैः सिद्धयुगलैः जलकणभयात् मुक्तमार्गः, त्यक्तपन्थाः । सिद्ग(द्ध)द्वन्द्वैः वीण(णि)भिः वीणाकरैः । त्वं किं कुर्वन् ? रन्तिदेवस्य राज्ञः कीर्तिं चर्मस्व(ण्व)त्याख्यां नदीं मानयिष्यन् पूजयिष्यन् । कीदृशीं कीर्तिं ? सुरभितनयालम्भजां, सुरभितनयायाः गावस्तासामालम्भ-[नं][327] विनाशनं तस्माज्जाता ताम् । पुनः किं लक्षणां ? भुवि पृथिव्यां[328] च{त}स्रो{स्रो}तो-मूर्त्या प्रवाहरूपेण परिणता, रूप(पा)न्तरगताम्[329] ॥४८॥

[330]त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो दूरमावर्ज्य दृष्टी—
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥४९॥

हे बन्धो ! गगनगतयो देवाः तस्याः सिन्धोर्नद्याः पृथुमपि स्थूलमपि, प्रवाहे(हं)[331] तनुं सूक्ष्मं प्रेक्षिष्यन्तेऽवलोकयिष्यन्ते । कस्मात् ? दूराभावात् दूरान्महदपि वस्तु तनु दृश्यते । किं कृत्वा ? दृष्टी[332] नेत्राणि दूरमत्यर्थमावर्ज्य प्रसार्य निक्षिप्य । क्व सति त्वयि भवति जलमादातुं भुव्यवनते सति । कीदृशि त्वयि, शार्ङ्गिणो वर्णचौरे कृष्णत्वात्[333] । मुक्तादामां(म)- मध्ये-[ऽन्तराले][334] इन्द्रनीलः यस्य तत् ॥४९॥

[335]तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ॥५०॥

हे मेघ ! ततो अग्रे व्रज याहि[336] । किं कृत्वा ? तां चर्मस्व(ण्व)ती(तीं) नदीमुत्तीर्य । त्वं किं कुर्वन् ? आत्मबिम्बमाकारमानुरूपम् । दशपुरवधूनेत्रकु(कौ)तु(तू)हलानां[337] प(पा)त्रीकुर्वन् ; दर्श(र्शि)तम् । दशपुरनगरस्य वध्वो दे(द)शपुरवधूस्तासां नेत्राणि, तेषां कुतूहला:(ला)ति(नि) तेषाम् । पुनः किं लक्षणानां ? द० [दशपुरवधूनेत्र]कौतूहलानां परिचितस्थू(भ्रू)[338]लताविभ्रमा-णाम्, परिचिता नागरिकत्वात् । अभ्यस्ता भ्रूलता भ्रूशाखा विभ्रमा यैस्तेषाम् । पुनः किं लक्षणानां ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पक्ष्मोक्षे(त्क्षे,पात्[338A] पक्ष्मस्योत्क्षेपस्त्वदालोकनवशादूर्ध्वविलोकनं, पक्ष्माक्षे[339](क्ष्मोत्क्षे)-पस्तस्मात्, उपरिविलसितकृष्णसा(शा)रप्रभाणां, उपरि विलसन्ती स्फारन्ती कृष्णसा(शा)रा(र)-कायिनो(कान्तयो ?,[341] [342][पुनरपि किं लक्षणानां ? कुन्दकुसुमस्य यैः क्षेप उत्क्षेपणं तस्या अनुगा अनुयायिनो] ये भ्रमरास्तेषां श्रियं शोभां पुष्णन्ती[343] ये तेषाम्। कुन्दानां सितत्वात् भ्रमराणां [कृष्णत्वात्][344] {कुन्दकुश(सु ?)मस्य यः क्षेपः, उत्क्षेपणत्वात् }[345]। यद्यप्ये-तानि कुतूहलविशेषणानि तथापि त(च)[346] स्तृ(भ्रू)[47]उवलान् नेत्राणामेव ते[348]गुणा बोद्धव्याः ॥५०॥

[349]ब्रह्मावर्तं जनपदमथ च्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः।
राजन्यानां सितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥५१॥

'अभ्यवमथ' इति टीकायां दृश्यते।

हे भ्रातः! तत्कौरवं[350] क्षेत्रं भजेथाः गच्छेः। कीदृशं क्षेत्रं ? क्षत्रप्रधा(ध)नपिशुनम्। क्षत्राणां क्षत्रियाणां प्रधनं सङ्ग्रामं सूचयति यत्तत्। त्वं हे भ्रातः! त्वं किं कुर्वाणः ? ब्रह्मावर्ताख्यं जनपदं देशमथच्छायया, निजं(ज)[351] प्रतिबिम्बेन गाहमाना(नः)। यत्र क्षेत्रे गाण्डीवधन्वा अर्जुनः शितशरशतैः [तीक्ष्णबाणशतैः][352] राजन्यानां नृपाण(णां) मु(मु)[353]खानि वदनानि अभ्यवर्षन्-(त्) उत्कृष्टो(ष्टो)[354]गाण्डीवधन्वा, क इव ? त्वमिव यथा त्वं धारापाति(तैः) कमलानि[वाऽ][355] भ्यवर्षसि [सिञ्चसि][356] तथा [ऽ]र्जुनेन अन्येषां राज्ञां मुखकमलानि पातितानीति भावः ॥५१॥

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना—
मन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥५२॥[357]

हे सौम्य! त्वमपि [अन्तर्][358] मध्ये शुद्धो निर्मलो भविता भविष्यसि। वर्ष(र्ण)[359] मात्रेण कृष्णः श्यामो भविता। किं कृत्वा ? तासां सारस्वतीनां सरस्वतिसम्बन्धिनां अपां पानीयानाम्। अभिगमं सेवनं, कृत्वा। तासां कासामित्याह लाङ्गली(ली) बलि(ल)[360]भद्रो या आपः शिषेवे भेजे। किं कृत्वा ? अभिमतरसां[361] वाञ्छितस्वादाम्। हालां मदिरां मुक्त्वा हित्वा। कीदृशीं हालां ? रेवतीलोचनाङ्काम्। रेवतीलोचनयोरङ्कः चिह्नं यस्यां सा ताम्। कीदृशो ल(ला)-ङ्गली ? बन्धुप्रीत्या कौरवपाण्डवस्नेहेन समरविमुखः सङ्ग्रामपराङ्मुखः। उभयपक्षो(क्षेऽ[362])पि मम बान्धवाः, कुत्र व्रजामीति विचार्य गृहं त्यक्त्वा सारस्वतीतटे तस्थौ ॥५२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[363]तस्माद्गच्छेरनुकनखलं शैलराजाऽवतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥५३॥

तस्मात्सरस्वतीप्रदेशात् जह्नो राज्ञः कन्यां जाह्नवीं पुत्रीं गच्छेर्यायाः। कीदृशीं कन्यां ? अनुकन{क}खलं[364] लक्षी(क्ष्यी)कृत्याऽनुकनखलम् । शैलराजावतीर्णां, शैलराजादिह(द्रि)मवतोऽवतीर्णां, शैलराजावतीर्णां, ताम् । पुनः कीदृशीं ? सगरतनयः(य)स्वर्गसोपानप[ङ्]क्तिं, सगरतनयानां षष्ठिसहस्रसंख्याकपुत्राणां [स्वर्गगमनाय सोपानपङ्क्तिरिव सोपानपङ्क्तिः । तां यां गङ्गाम् । अयं भावः । सपत्न्यामीर्ष्याकुलायां सत्यां मया सह संभोगः क्रियते सोऽत्यन्तमधुरो हर्षाय भवतीति फेनरूपेण हास्येन विहस्य गौर्याः प्रयास निर्विवेशः ?। तस्य संभोगस्य सूचकं केशग्रहणं सुरताक्षी चन्द्रः तस्मिन्नूर्मीहस्तस्पर्शोऽभूदित्याशयः । इन्दुलग्नोर्मिहस्ता । इन्दौ चन्द्रे लग्ना ऊर्मयः एव हस्ता यस्याः सा । इन्दुलग्नोर्मिहस्ता सती सपत्नीव] {सन्ती पात्रीव}[366] शंभोर्महेश्वरस्य केशग्रहं[367] कचाकर्षणमकरोच्चकार । उत्प्रेक्ष्यते फेनैः डिंडीरैः गौरीवक्त्रभ्रुकुटिरचनां विहस्येव गौरीवक्त्रे पार्वतीमुखे या भ्रुकुटिरचना, ताम् ॥५३॥

[368]तस्याः पातुं सुरगज इव व्योमपूर्वार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥५४॥

हे मेघ ! चेत् यदि त्वं तस्या गङ्गाया अम्भो जलं पातुं तर्कये वाञ्छयेः । कीदृशः मम्भ? अच्छस्फटिकविशदं[369] निर्मलम् । स्फटिकस्वच्छम् । किंभूतं अम्भः ? तिर्यग् वहमानम् । त्वं क इव ? व्योम्नि[370] पूर्वार्धलम्बी सुरगज इव । यथा सुरगजः पूर्वार्धलम्बी सन् शोभते । पूर्वार्धेनोत्तरभागेना{ऽ}वलम्बयन् यः सः पूर्वार्धलम्बी । तत्र प्रवाहे प्रसरंत्या भवच्छायया कान्त्या सपदि शीघ्रं सा गङ्गास्थानोप{व}गतयमुनासंगमेन अभिरामा मनोन्या(ज्ञा)[371] स्याद्भवेत् ? अस्थानेऽप्रस्तावे उपगता मिलिता या यमुना यस्याः सङ्गमो मेलापकस्तेन ॥५४॥

[372]आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥५५॥

हे जलद ! तस्य हिमाचलस्य शृङ्गे निषन्न(ण्णः) उपविष्टः सन् । त्वं शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयां शोभां वक्ष(क्ष्य)सि[373] धारयिक्(ष्य)मि[374] । शुभो(भ्रो)[375] धवलः वर्णः । त्रिनयनस्य रुद्रस्य यो[ऽ]सौ वृषो वृषभस्तेन उत्पातः उत्पादितो यः पङ्कः कर्दमस्तेन सहोपमेया,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेया ताम्। किं कृत्वा ? तस्या एव गङ्गाया प्रभवं उत्पत्तिस्थानं[376] अचलं हिमवन्तं प्राप्याऽऽसाद्य। कीदृशमचलं ? आशी(सी)नानामुपविष्टानां कस्तुरी(रि) कामृगाणां[377] नाभिगन्धैर्नाभिपरिमलैः सुरभितशीलं सुरभिता सुगन्धीकृता शिला यस्य स तम्। पुनः किम्भूतमचलं ? तुषारैर्हिमैर्गौर(रं) धवलम्। कीदृशे शृङ्गेऽध्वश्रम[378]–विनयने मार्गखेदस्फे(स्फो)टके ॥५५॥

[379]तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै
रापन्नार्तिप्रशमितफलाः सम्पदो ह्युत्तमानाम् ॥५६॥

[टीकायां ०प्रशमनफलाः इति पाठः]

चेत् यदि तं हिमवन्त(तः) दवाग्निः दावानलः बाधेत[380] [दहेत]तदाऽलंऽत्यर्थं, एनं[381] गिरि(रिं) वारिधारासहस्रैः शमयितुं निर्वापयितुं अर्हसि योग्यो भवसि। क्व सति ? वायौ पवने सति वाते सति। कीदृशो दावाग्निः सरलस्कन्धसंघट्टजन्मा सरलस्कन्धादेव दारवो वृक्षास्तेषां संघट्टनात [जन्म][382]यस्य सः। पुनः किम्भूतो दावाग्निः ? उल्काक्षपितचमरीबालभारः[उल्काभिरलातज्वालाभिः][383] क्षपितो दग्धचमरीणां बालभारो येन सः। युक्तो[ऽ]यमर्थः। हि यस्मात् कारणात् उत्तमानां प(ग)[384]रिष्ठानां सम्पदः समृद्धयः आपन्नार्तिप्रस(श)मनफलाः आपन्नार्तिप्रशमनमेव फलं येषां ते ॥५६॥

[385]ये त्वां मुक्तध्वनिमसहनाः स्वाङ्गभङ्गाय तस्मि-
न्दर्पोत्सेकादुपरि शरभा लङ्घयिष्यन्त्यलङ्घ्यम्।
तान्कुर्वीथास्तुमुलकरकावृष्टिहासावकीर्णा-
न्के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥५७॥
['ये संरम्भोत्पतनरभसा' इति टीकायां दृश्यते]

हे जलद ! तस्मिन् पर्वते ये सरभाः अष्टापदा दपो(र्पो)त्स(त्से)कादहंकारात् त्वां शब्दायमानं असहमानाः संतः लङ्घयिष्यन्ति। कस्मै ? स्वाङ्गभङ्गाय तान् सरभान् [लङ्घयेयुः।][386] [तु]म(मु)लकारकावृष्टिहासावकीर्णान्, तुमुला प्रबला या कारकावृष्टिः सैव हासो हास्यं, तेनावकीर्णा अवलेहिता (अवहेलिता)[387]स्ता[न]नुकुर्वीथाः कुर्याः। किंभूतं त्वां ? अलङ्घ्यं, युक्तो[ऽ]यमर्थः। के निष्फलारम्भयत्नाः परिभवपदं कष्टस्थानं न स्युः। [अपि तु स्युः]।[389] निष्फलो निरर्थकः आरम्भः यत्नो येषां ते ॥५७॥

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः।
यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
संकल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥५८॥[389]

['उपहितबलिं' इति, ऊर्ध्वमुद्धूत इति च टीकायां दृश्यते।]

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हे जलद ! तत्र हिमवति गिरौ दृषदि शिलायां अर्द्धेन्दुमौलेः इन्दोरर्द्धमर्धेन्दुः, स मौलिः शेष(ख)रं यस्य सः । अर्द्धेन्दुमौलिस्तस्य महेश्वरस्य व्यक्तं प्रकटं चरणन्यासं पदमुद्राम् । भक्त्या नम्रः [भक्तिनम्र][390] स्सन् त्वं भवान् परीयाः, प्रदक्षिणीकुर्याः । किंभूतं पादन्यासं सिद्धैः देवविशेषैः शस्व(श्व)न्निरन्तरं उपह(हि)तबलिम्[391] । उपहिता ढौकिता, बलिः पूजा, यस्य सः, तम् । यस्मिन् पादन्यासे दृष्टे सति श्रद्दधाना भावनातत्पराः । अस्य देवस्य स्थिरगणपदप्राप्तये संकल्पन्ते । सम्पद्यन्ते । स्थिरा निश्चला गणपदप्राप्तिः स्तस्यै–[392] स्थिरगणपद-प्राप्तये । कस्मात् ? करणविगमात् ऊर्ध्वं देहपातादनन्तरम् । करणानीन्द्रियाणि विद्यन्ते यत्र तत्करणं वपुस्तस्य विगमो नाशस्तस्मात् । किम्भूतास्ते ? दूरमुद्भू(द्धू)तपापाः उद्धूत(तं)[393] निर्गमितं पापं यैस्तैः ॥५८॥

**शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः**
**संरक्ताभिस्त्रिपुरविजयो गीयते किंनरीभिः ।**
**निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्या-**
**त्संगीतार्थो ननु पशुपतेस्तत्र भावी समस्तः ॥५९॥**

तत्र गिरौ कीचकाः सच्छिद्रवंशाः अनिलैः वायुभिः पूर्यमाणाः भू(भ्रि)यमाणाः संतः मधुरं सस्वरं शब्दायन्ते[394] ध्वनन्ति । तत्र गिरौ संरक्ताभिर्भावनाभाविताभिः किन्नरीभिर्देवगायन-नारीभिः त्रिपूरविजयस्त्रिपुरदाहाख्यरसकाव्यं गीयते । हे बन्धो । तत्र चेद्यदि कन्दरेषु प्रदेशेषु ते भवतो नि(वि)द्रादी(वी) गम्भीरध्वनिर्गर्जारवः [भवेत्][395] मुरज इव स्याद्(त्) व(त)दैव तदा ननु निश्चितं पशुपति(तेः)[396] रुद्रस्य तत्र समस्तः संपूर्णः संगीतार्थो (भावी [भवि]ष्यति ।[397]

**प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषा-**
**न्हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम् ।**
**तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभि**
**श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥६०॥**

तत्र हिमाचले यत्क्रौञ्चरन्ध्रं नाम विवरं वर्तते । तेन विवरेण उदीचीमुत्तरां दिशं काष्ठां अनुसर, यायाः । किं कृत्वा, प्रालेयाद्रेः हिमाचलस्य उपतटं तटसमीपम्[399] । तांस्तांश्चरण-न्यासादीन् प्रधानान् विशेषान् । अतिक्रम्य लङ्घित्वा(लङ्घयित्वा)[400]। किंभूतं क्रौंचरन्ध्रं ? भृगुपतियशोवर्त्म, भृगुपतिः परशुराम{:}स्तद्वीयस्य यशसोत्कीर्तेः (यशसः कीर्तेः) वर्त्म प्रसरण-मार्गः । कीदृग् त्वं ? तिर्यगायामशोभी, तिर्यग्यो[ऽ]यावायामो,[401] विस्तारस्तेन शोभी शोभमानः । अत उत्प्रेक्ष(क्ष्य)ते, विष्णोर्नारायणस्य श्यामः कृष्णः पाद इव । कीदृशस्य विष्णोः ? बलिनियमनाऽभ्युद्यु(द्य)तस्य, बलिनियमने, बलिबन्धनेऽभ्युद्यु-(द्य)क्त(त)स्य ॥६०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[402]गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥ ६१ ॥

अनन्तरं कैलासस्य नगरस्यातिथिः प्राघूर्णकः स्यास्तमचलं गच्छेः, गच्छेरिति भावः । किं कृत्वा ? ऊर्ध्वं गत्वा । किम्भूतस्य कैलासस्य ? दशमुखभुजोच्छ्वासितस्य, दशमुखस्य रावणस्य[403] भुजाभिरुच्छ्वासित[स्य] उत्पाटितस्य । पुनः किम्भूतस्य ? त्रिदशवनितादर्पणस्य त्रिदशवनितानां दर्पण आदर्शस्तस्य । स्फटिकत्वेन मुखावलोकनात् । यः कैलासः कुमुदविशदैः शृङ्गोच्छ्रायैः शिखरोन्नतैः, खं आकाशं, वितत्य व्याप्य, स्थितो रहितः । उत्प्रेक्ष्यते । प्रतिदेशं प्रतिकाष्ठम् । पुंजीभूत(तः) एकत्रीभूतः,[404] त्र्यम्बकस्य महेश्वरस्याट्टहास इव हास्यमिव ॥६१॥

[405]उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य ।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री—
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६२ ॥

हे जीमूत ! तस्याद्रेः कैलासस्य, भवित्रीं चाग्रे [406]भ(भा)विनीं शोभां कान्तिं, उत्पस्या-(श्या)मि, उत्प्रेक्षेऽहं, क्व सति ? त्वयि भवति तटगते शृङ्गस्थे सति । कीदृशे त्वयि ? स्निग्ध-भिन्नाञ्जनाभे स्निग्धमरुक्षं, भिन्नं वर्जितं, यदञ्जनं कज्जलं, तद्वद्भा दीप्तिर्यस्य स तस्मिन् । कीदृशस्य तस्याचलस्य, सद्यःकृत्तद्विरददशनच्छेदगौरस्य । सद्यस्तत्कालं कृत्तः खण्डीकृतो[407], द्विरद-दशनस्तस्य यो(य)श्छेदः खण्डस्तद्वतौ(द्गौ)रस्तस्य । कीदृशीं शोभां ? स्तिमितनयनप्रेक्षणीयां स्तिमि-तानि निश्चलानि यानि नयनानि नेत्राणि तैः प्रेक्षणीया, ताम् । उत्प्रेक्ष्यते । हलभृतो बलि(ल)भद्रस्य अंश(स)न्यस्ते स्कन्धे, स्थापितमेव(च)के कृष्ण(ष्णे) वाससी वस्त्रे इव । मेघस्य कृष्णत्वात् तस्य च सितत्वात् ॥६२॥

[408]हित्वा तस्मिन्भुजगवलयं शंभुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत्पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥ ६३ ॥

तस्मिन् क्रीडाशैले कैलासे, गौरी पार्वती, यदि चेत्, पादचारेण चरणाभ्यां, विचरेत् त्वं क्षाम्यते(?)(चंक्रमेत) ।[409] अस्याः प(पा)र्वत्यास्त्वं चरणेषु सोपानत्वं कुरु कुर्याः । कीदृशी गौरी ?



Jain Education International For Personal & Private Use Only www.jainelibrary.org

शंभुना ईश्वरेण, दत्तहस्ता । किं कृत्वा ? भुजगवलयं स एव [कं]कणं (सर्पकंकणं)[410] हित्वा मुक्त्वा भयंकरत्वादत्र सर्पकटकत्यागः ।[411] किमर्थं ? मणिबद्धशिलारोहणार्थम् । हे जलद ! त्वं सं(अ)-प्रयायी सन् । कीदृशस्त्वं ? भङ्गीभक्त्या तरङ्गविच्छित्या कल्लोलाकारेण विरचितवपुः । पुनः कीदृशः ? त्वं स्तम्भितान्तर्जलौघः(लौघः) स्तम्भिता(तो)न्तर्मध्ये जलौघः येन सः ॥६३॥

[412]तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्या-
त्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥ ६४ ॥

हे सखे ! यत्र कैलासे अवश्यं निश्चितम् , सुरयुवतयोऽमराङ्गना, त्वं(त्वां) भवन्तम् , यन्त्रधारागृहत्वं जलधार(रा)गृहभावम् , नेष्यन्ति प्रापयिष्यन्ति । हे सखे, यदि चेत(त्), ताभ्य-स्तव , मोक्षः त्यागो , नस्यान्त (त् न)[413] भवेत् तदा त्वं श्रवणपरुषैः कर्णकटुकैः, गर्जितैः शब्दितैः, स्तां(तान्) भाव(य)ये[थाः]{स्ताभयेः} त्रासयेः ।[414] यथा त्वां तासु चेयुः(ताः-मुञ्चेयुः) ।[415] किम्भूतास्ता ? क्रीडालोला कौतूहलचञ्चलाः । कीदृशस्य तव ? घर्मलब्धस्य घर्मे सभि(ति)[416] लब्धो घर्मलब्धस्तस्य । कीदृशं त्वां ? कुलिशवलयो[द्]घट्टनोद्गीर्णतोयम् । कुलिश-वलयोद्घट्टनेनोद्गीर्णं [वान्तं] प्रसारितं तोयं जलं येन सः तम् ॥६४॥

[417]हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै-
र्नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेशम् ॥ ६५ ॥

हे जलद ! त्वं वर्णितस्वरूपं तं नगेशं[418] कैलासं, निर्विशेः उपभुञ्जीथाः । त्वं किं कुर्वाणः ? मानसस्य सरसः हेमाम्भोजप्रसविसलिलं आददा[नो][419] गृह्नन(ह्णन्) हिम्नः(हेम्नः)[420] स्वर्णस्यांभोजावि(नि) प्रसूते जनयति यत्र (यत्तत्)[421] मानससम्बन्धि सलिलमुदकम् । त्वं किं कुर्वन् ? काममभिलषितं, लक्षणं क्षणमात्रं, ऐरावणस्य सुरगजस्य, मुखपटप्रीतिं मुहवड-(खपट)[422]-सादृश्यं कुर्वन्, गजारि(हि)[423] मुखपटेन [प्रीयन्ते] ।[424] किंभूतं[425] पर्वतं ? छाया-भित्तिस्फटिकविशदं स्फटिकमणिनिर्मलं । प्रीयन्ते हर्षितवदना भवता भवन्ति । पुनः किं कुर्वन् ? नानाचै(चे)ष्टैरनेकविधैः ललितैः मनोहरैर्वातैः पवनैः, कल्पद्रुमकिशलयानि सुरतरुपल्लवान्, अंशुकानीव वासांसीव, धुन्वन् कम्पयन् । कविसमये वातस्त्रिविधो वार्थतो[426](वर्ण्यते) [शीतो] मंदः सुरभिश्च ॥६५॥

[427]तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**या वः काले वहति सलिलोद्गारमुच्चैर्विमाना**
**मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥६६॥**

हे कामा(म)[428]चारिन् ! लज्जा(स्वेच्छा)रूप(प)[429] ! हे मेघ[430] ! तस्य कैलासस्योत्सङ्गे(?त्सङ्गे) कि(अ)लकां अस्मत्पुरीं दृष्ट्वा । पुनः पुनरपि ज्ञास्यसे{त्} । किम्भूतामलकां ? स्रस्तगङ्गादुकूलां,[431] स्रस्तं तद्गङ्गादुकूलं (पतत् गङ्गैव दुकूलं)[432] अंबरं यस्या सा ताम् । गङ्गा तत्र वहति ।[433] या अलकापुरी, भो युष्माकं, काले वर्षासमये,{कैः[434]} उच्चैरुन्नतैर्विमानैः[435] प्रासादैः कृत्वा, अभ्रवृन्दं मेघपटलं, वहति धारयति ।[436] कीदृशमभ्रवृन्दं ? सलिलोद्गारं-सलिलं [जलं][437] उद्गारति स्र(व)ति येन(यत्)[438] तत् । या अलका क(का)चित्कामिनी[439] इव यथा[440] [कामिनी प्रणयिनो दय(यि)तस्योत्सङ्गे] मुक्तदुकूला सती । मुक्ताजालग्रथितं मुक्ताफलसमूहालङ्कृतं आ(अ)लकं[441] कचं बिभ्रति । सलिलस्य मुक्ताजालेन सहोपमानं, अलका(आ)नां[442] ललाटकैः सहोपमानम् ॥६६॥

**पूर्वमेघः संपूर्णः ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[443]शष्पश्यामा दिनकरहयस्पर्द्धिनो यत्र वाहाः
शैलोदग्रास्तमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रण्यप्रतिदिशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासः व्रणाङ्के ॥६७॥

हे जलद ! यत्राऽलकायां एवंविधा वाहासु(स्तु)रङ्गा[444] व[र्त]ते(न्ते) । कीदृशां(शा.)[445] ? [446]शष्य(ष्प)श्यामाः । शष्यु(ष्प) बालतृणं तद्वत् श्यामा हरिता । शष्यु(ष्प)श्यामा । पुनः कीदृशा ? दिनकरहयस्यु(स्प)र्द्धिनः, दिनकरहयैः सूर्याश्वैः स्पर्धां कुर्वन्ति, दिनकरहयस्पर्द्धिनः । यत्रालकायां करिणो गजा वर्तन्ते । कीदृशाः ? शैलोदग्राः शैलवतु(वद्)[447]दग्राः उन्नताः [448] पर्वतप्रायाः । पुनः कीदृशाः ? प्रभेदान्मदजलक्षरणात् त्वमिव भावानि वृष्टिमन्तम् (त्वमिव वृष्टिमन्तः ।)[449] यत्र पूर्यां योधा[ग्रण्यः][450] सुभटाग्रेसराः दिद्यन्ते । किंविधाः ? संयुगे सङ्ग्रामे, तस्थिवांसो निश्चलाः । पुनः किम्भूताः ? चन्द्रहासे(स)व्रण(णां)कैः[451] प्रत्यादिष्टः प्रतीत्यशोभमाना(?)[452] आभरा(र)णानां रु(रु)क् कान्तिर्येषां ते ॥६७॥

[453]विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥६८॥

हे जलद ! यत्रालकायां प्रासादाः सौधानि तैस्तैर्वक्ष्यमाणैर्विशेषैः, त्वां भवन्तं, तुलयिमुमनुकर्तुं[454]मलं समर्थाः। किम्भूतं त्वां ? विद्युत्वन्तं[455] विद्युद्विद्यते यस्याऽसौ विद्युत्वान्, तम् । किम्भूताः प्रासादाः ललितवनिताः सविलासरमणीसमन्विताः।पुनः कीदृशं त्वां? सेन्द्रचापं सुस(सयु रा)युधम् ।[456] कीदृशास्ते ? सचित्राः नानाचित्रयुताः ।[457] पुनः किम्भूतास्ते? प्र(व)हतमर(मुर)जाः,[458] वाद्यमानमृदङ्गाः । कस्मै ? सङ्गीताय नृत्याय । किम्भूतं त्वां,? स्निग्धगम्भीरघोषं, मधुरध्वनितम् । पुनः किं [भू]तं[459] त्वां? अन्तस्तोयं, मध्यस्थितजलम् । किम्भूतास्ते? मध्यस्थितजलम् । किम्भूतास्ते ? मणिमयभुवः, मणिभिश्चन्द्रकान्ताद्यैर्बद्धा भूर्येषां ते । किम्भूतं त्वां? तुङ्गमुच्चि(च्चै)स्तरम् । किम्भूतास्ते? अभ्रंलिहाग्राः आकाशस्पृ[श]च्छि[ख]रा[460] इत्येतत्तुल्यं सर्वा(र्व)म् ॥६८॥

[461]हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥६९॥
( 'आननश्रीः' इति टीकायां दृश्यते । )

हे मेघ ! [यत्र][462] पूर्वां वधूनां युवतीनां, हस्ते करे, लीलाकमलं[463] क्रीडानलिनं, विद्यते । यत्र वधूनां अलकं बालकुन्दानुविद्धं च[464] वर्तते । बालकुन्दैः कुन्दसुकुसुमैरनुविद्धं मिश्रितम् । यत्र वधूनामाननश्रीः मुखशोभा, रो(लो)ध्रप्रसवरजसा रो(लो)ध्रपुष्परागेण, पाण्डुतां गौरतां, नीता लम्भिता । यत्र वधूनां चूडाप(पा)शे मुकुटे नवकुरु(र)बकं[465] अभिनवकुसुमं {तत्र} वर्तते । यत्र वधूनां कर्णे चारु रम्यं शिरीषं शिरीषकुसुमं विद्यते च । पुनर्यत्र वधूनां समीपे(सीमन्ते)[466] त्वदुपगमं(म)[जं][467] त्वदुपगमाज्जातं त्वदुपगमजं प्रावृषेण्यं नीपपुष्पं विद्यते । तत्प्रावृषि सम्पद्यते एतेन रामाणां नागरिकत्वमुररीकृतं, सारभूतं कनकालंकारनि{म्र}रासने[468] ॥६९॥

[469]आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यत्र प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न खलु च वयो यौवनादन्यदस्ति ॥७०॥

हे सखे ! यत्र ममालकायां नराणां आनन्दादुत्थानं यस्य तदानन्दोत्थं नयनसलिलं नेत्ररोदनं विद्यते । अन्यैरपि निमित्तैः शोकादिभिः नयनसलिलं न यत्र । कुसुमस(श)रजात् कुसुमस(श)राज्जातः कुसुमस(श)रजः तस्मात् इष्टसंयोगसाध्यः । इष्टसंयोगेनाभीष्टजनमेलापकेन साध्यः तापो वर्तते । अन्यस्तापो न यत्र । प्रणयकलहात् स्नेहकन्दलादन्यत्र विप्रयोगोपपत्तिः वियोगप्राति(प्ति)र्न यत्र । च पुनः, खलु निश्चितम् , वित्तेशानां पुरुषाणां यौवनादन्यदपरं वयो नास्ति ॥७०॥

[470]यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥७१॥
( ० 'कुसुमरचना' इति टीकायां दृश्यते । )

यस्यामलं(ल)कायां यक्षा पुण्यजनेश्वरा उत्तमस्त्रीसहायाः(याः) प्रधानस्त्रीसहिताः, सन्तः पुष्करेषु वाद्य(दि)त्रेषु, शनकैर्मन्दं [मन्दं], आहतेषु वाद्यमानेषु सत्सु, रतिफलं कामसुखदायककल्पवृक्षप्रसूतं सुरद्रुमसमुत्पन्नं, मध्वासवं सेवन्ते पिबन्ति । किं कृत्वा ? हर्म्यस्था(स्थ)लानि सेवितान्यैत्यागत्य । किम्भूतानि हर्म्याणि ? श(सि)तमणिमयानि शि(सि)तमणिनि(भिः) स्फाटिकरत्नैः प्रवृत्तानि निर्मितानि, श(सि)तमणिमयानि। पुनः किं लक्षणानि ? ज्योतिच्छायानक्षत्रश्रेणिबिम्बान्येव(व)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुसुमरचना पुष्पप्रकारो येषु तानि, ज्योतिश्छायाकुसुमरचनानि। किम्भूतेषु [पुष्करेषु] त्वद्गम्भीर-ध्वनिषु त्वद्गम्भीरो(र)ध्वनिर्येषु तेषु ॥७१॥

[471] गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्त्रच्छेदैः कनककमलैः कर्णविस्रंसिभिश्च ।
मुक्ताजालैस्स्तनपरिमलच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥७२॥

यत्र नगर्यां कामिनीनामति(भि)सारिकाणां[472] नैशो रात्रि, {सत्को}मार्गः पन्थाः, सवितुरुदये सूर्यस्योदये सूच्यते, ज्ञायते। कैः? मन्दारपुष्पैः कल्पवृक्षव(क्ष)कुसुमैः[473]। किम्भूतैस्तैः? अलकपतितैः केशभ्रष्टैः। कस्मात्? गत्युकम्पात्। गतिर्गमनम्। तत्र उत्प्राबल्येन कम्पश्चलनं, तस्मान्न केवलं मन्दारपुष्पैः, च पुनः पत्रछेद्यैः,[474] कृतविज्ञानैः कर्णविश्रं सि(स्रंसि)भिः[475] श्रोत्रच्युतैः। कनककमलैः स्वर्णोत्पलैः, यत्र नैशो मार्गः सूच्यते। न केवलं कनककमलैः सूच्यते। च पुनः, हारिः (रैः)[476] सूच्यते। किं लक्षणैः? हारि(रै)मुक्तालग्नसुत(स्तन)परिमल(लैः) छिन्नसूत्रैः मुक्तासु लग्नस्तनपरिमलः कुचसुरभित्वं [येषां ते] छिन्नं सूत्रं येषां ते तैः ॥७२॥

[477] नीवीबन्धोच्छ्वसितशिथिलं यत्र यक्षाङ्गनानां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपा-
न्ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥७३॥

यत्र नगर्यां यगा(क्षा)ङ्गनानां यक्षरमणीनां चूर्णमुष्टि(ष्टिः)[478] प्रदीपविध्यापनबुद्ध्या प्ररितः प्रक्षिप्तो विफला निष्फला भवति। निरर्थक सञ्जायते प्रद्योतकाऽप्रशमात् कदाचिदश(त्रा)सो[479] गतो भात(भवे)दित्याह[480]। किं लक्षणानां[481] रमणीनाम्? {चूर्णमुष्टिः}[482] मूढानां ह्रिया मूढा [483] लज्जा (ज्ज)या मूढा व्याकुलित(ताः) तासां व्रीडा विह्वलत्वात् तासाम्। <सज्ञा[484] दिनमणिदीपप्रश मे> केषु सत्सु प्रियेषु दयितेषु, रागात् स्नेहात्, क्षौमं वासा(सः)[485] आक्षिपत्सु अपहृस्यु(त्सु)[486] सत्सु। कीदृशेषु प्रियेष्व{ऽ}निभृतकरेषु कामेच्छया चालं(ल)पाणिषु[487]। किम्भूतं क्षौमं? नीवीबन्धोच्छा(च्छ्व)सितशिथिलम्। नीवीबन्धस्य उच्छ्(च्छ्व)सनेन[488] विकासेन शिथिलमदृढम्। किं कृत्वा? अर्चिस्तुङ्गान् [489] रत्नप्रदीपान् अभिमुखं सम्मुखमपि प्राप्यासाद्य रत्नानां अर्चिषो[ऽ]विनश्वरत्वात्। कथं? चूर्णमुष्टिप्रक्षेपः क्षेपस्तु [490] [वह्निदीपभ्रान्त्या] विह्वलत्वात् तासाम् ॥ ७३ ॥

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा**
**नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥७४।**

**( 'यस्यां' इति टीकायां दृश्यते । )**

यस्यामलकाया पादपा वृक्षाः, नित्यपुष्पा सन्ति । किम्भूता पादपाः ? मत्तभ्रमरमुखराः[४९१] [मत्तभ्रमरैर्मुखरा वाचा][४९२] यस्यां नलिन्यः कमलिन्योः, नित्यपद्मा सन्ति । किम्भूता नलिन्यः ? हंसश्रेणिरचितरस(श)नाः[४९३] । हंसानां श्रेणयो हंसश्रेणयः । हंसश्रेणीभिः रचिता रसना मेखला यासन्तो(सां ताः)[४९४] हंसश्रणीरचितरस(श)नाः । हंसश्रेण्येव रचिता रस(श)ना मेखला यस्यां ताः । {यस्यां} । भवनशिखिनो ग्र(गृ)हमयूर(रा:)[495] केकोत्कण्ठा विद्यन्ते । केकै(क)या[496] मयूरवाण्या उत्कण्ठा येषां ते । किम्भूता भवनशिखिनः नृत्यभास्वत्क लापाः । [497] नृत्येन भास्वन्तो दीप्यमानाः कलापा येषां ते । यस्याः प्रदोषाःसन्ध्यासमयाः नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः सन्ति । नित्यज्योत्स्नाभिः प्रहि(ति)[ह]ता:[४९८] स्फोटिता या तमोवृत्तिस्तया रम्याः सुन्दराः ॥ ७४ ॥

**[499]अक्षीणान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै**
**रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्द्धम् ।**
**वैभ्राजाख्यं विबुधवनितावारमुख्यासहायाः**
**बद्धापानं बहिरुपवनं कामिनो निर्विशन्ति ॥७५॥**

यत्रऽलकायां कामिनः कामुख(क) पुरुषाः[500] किन्नरैः सार्द्धं देवगायनैः समं वै(वे)-भ्राजाख्यं[501] बहिरुपवनं बाह्योद्यानं, निर्विशन्ति उपभुञ्जते । किम्भूता कामिनः ? विबुधवनिता-वारमुख्यासहायाः । विबुधवनिता[सु][५०२] वारमुख्यास्ता एव सहायाः येषांते । अथवा विबुधवनिता एव वारमुख्या गणिकातुल्याः क्रीडाप्रस्तावात्ता एव सहाया येषां ते । पुनः किम्भूतास्ते ? अक्षीणान्तर्भवननिधयः । अक्षीणा. [503] अक्षीणा (णा) ऽत्रुटिताः । अन्तर्भुवनानि, निधयो येषां ते । कथंभूते किन्नरैः ? रक्तकण्ठैः मधुरस्वरैः । [504] कथंभूत(तं) उपवनं ? बद्धापानं रचितपान-गोष्ठीकम् । किं कुर्वद्भिः किन्नरैः ? प्रत्यहं प्रतिदिनं धनपतियशः उद्गायद्भिः ॥ ७५ ॥

**नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-**
**रालेख्यानां सलिलकणिकादोषमुत्पाद्य सद्यः ।**
**शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै-**
**र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥७६॥**

यत्र पूर्यां त्वादृशाः भवादृशाः,[५०५] जलमुचो मेघाः, जर्जरा सन्ति । सद्यः शीघ्रं, जालैर्गवाक्षैः मि(नि)पतन्ति निर्गच्छन्ति । किम्भूता जलमुचः ? धूमोद्गाराऽनुकृतिनिपुणाः । धुमोद्गारा-[506](र)याऽनुकृतिः सादृश्यं तेन निपुणाः । उत्प्रेक्ष(क्ष्य)ते । शङ्कास्पृष्टा इव । शङ्किता

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इव । यथा साशङ्कः सापराधो व्याजेन पलायते । किं कृत्वा ? आलेख्यानां चित्राणाम् सलिलकणिकादोषं जलार्द्रभावमुत्पाद्य कृत्वा । किम्भूता जलमुचः ? सततगतिना वायुना यद्विमा(मा)नाग्रभूमीर्नीताः प्रापिताः । यस्या अलकायाः विमानानि, तेषां(षा)मग्रभूमयो, यद्विमानाग्रभूमयस्ताः । किम्भूतेन वायुना ? नेत्रा नयतीति [507] तेन नेत्रा ॥ ७६ ॥

यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासिताना–
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैः प्रेरिताश्चन्द्रपादै–
र्व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥७७॥

यत्रास्मत् पूर्यां चन्द्रकान्ताः मणयः, [508] स्त्रीणां वनितानां सुरतजन(नि)तां सम्भोगोत्पन्नां, अङ्गग्लानिं शरीरखेदं लुम्पन्ति [509] दूरीकुर्वन्ति । किम्भूताश्चन्द्रकान्ताश्चन्द्रपादैः च(च)न्द्रकिरणैः प्रेरिताः । पुनः कीदृशास्ते ? अत एव स्फुटजललवस्यंदिनः स्फुटान्न[व]जललवां, स्य(स्यं)दन्ति क्षरन्ति । स्यु० पुनः कीदृशैः चन्द्रकान्तैः {ऽ} त्वत्संरोधापगमविशदैः । त्वदीयः यो[ऽ]सौ संरोधो रु(रो)धनं तस्याऽपगमो विनाशस्तेन विशदाः स्तै(तैः) । पुनः कीदृशाः चन्द्रकान्ताः ? तन्तुजालावलम्बाः[510] । [511]तत्र(न्तु)[जा]व(ल) [आ]लंबते तन्तुजालावलम्बाः । कीदृशानां स्त्रीणाम् ? प्रियतमभुजालिङ्गनोत्सव(च्छ्वा)सितानां प्रियतमभुजालिङ्गनेनोच्छ्वासितास्तासाम् ॥७७॥

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि–
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरैर्प्रार्थिता यत्र कन्याः ॥७८॥

यत्रालकायां कन्या गुह्यकसुता, मणिभिः प्रधानरत्नैः, संक्रीडन्ते । कि०[दृशः] कन्याः ? मरुद्भिः वायुभिः, सेव्यमानाः । किम्भूतैः मरुद्भिः ? मन्दाकिन्याः गङ्गायाः सलिलशिशिरैः, जलशीतलैः । पुनः [किम्भूताः][512] कन्याः ? मन्दाराणां, कल्पवृक्षाणां छायया वारितोष्णाः । स्फोटितग्रीष्मतापाः । किम्भूतानां ? मन्दाराणां ? अनुतटरुहाम् । अनुतटं रुहन्ति प्रादुर्भवन्त्यनुतटरुहस्तेषाम् । पुनरपि किम्भूताः कन्याः ? अमरैर्देवैः, प्रार्थिता याचि(चि)ताः । किं लक्षणैः{:}र्मण णि)भिः[513] ? अन्वि(न्वे)ष्ट[514]–व्यैर्गवेषणीयैः । पुनः किं लक्षणैर्मणिभिः ? कनकसिकतामुष्टिनिक्षेपगूढैः । कनकसिकतामुष्टौ यां रत्नानां निक्षेपो न्यासस्तेन गुढास्तैः ॥७८॥

[515]वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं

पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥७९॥

यस्यां अलकायां एकः कल्पवृक्षः एक एव सुरतरुः सकलं सम्पूर्णम{ऽ}बलामण्डनं नारीशृंगारशोभां सुतं (ते)[516] प्रसूते। चित्रं नानाविधं वासो वस्त्रं सूते। यस्यामेकः कल्पवृक्षः मधु मद्य(द्यं) स्त(सू)ते।[517] यस्यामेकः कल्पवृक्षः[518] किसलयैः से(स)ह नवपल्लवैः सार्द्धं। पुष्फो(ष्पो)द्‌भेदं कुसुमचित्रतां प्रसूते। किम्भूतो(तं)[519] [पुष्फो(ष्पो)द्‌भेदं][520] नयनयोश्चक्षुषोर्विभ्रमादेशदक्षम्। यस्यामेकः कल्पतरुः भूषणानां विकल्पान् सूते च। पुनर्यस्यां एक एव तरुः चरणकमलन्यासः(स)योग्यं लाक्षारागं सूते। चरणकमलन्यासे योग्यः[521] तः(सः) ॥७९॥

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं वहति न भयान्मन्मथः षट्पदज्यम्।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै—
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥८०॥

यत्रालकायां मन्मथः कामः प्रायो बाहुल्येन चापं धनुर्भयान्न वहति न द्र(ध)त्ते[523]। किं कृत्वा ? यत्र धनपतिः(ति) सखं[524] देवं महेश्वरं। साक्षात्प्रत्यक्ष(क्षं)[525] वसन्तं। मत्वा ज्ञात्वा। किं लक्षणं चापम् ? षट्पदज्यम्। षट्पदाः भ्रमरा एव{ग्रोः} [ज्या][526] प्रत्यञ्चा यत्र तत्। तत्र चापस्य चा[ऽऽ]रम्भः चतुरवनिताविभ्रमैरेव विचक्षणस्त्रीविलासैरेव सिद्धा(द्धो)[527] निष्पन्नः। कि लक्षणै{:}श्चतुर[वनिता]विभ्रमैः ? सुभ्रूभङ्गो(ङ्गं)[528] यथा स्यादेवं कामिलक्ष्येषु प्रतिहतनयनम्। किं लक्षणैः प्रतिहतनयनैः ? अमोघैः सफलैः एतेन रमणीजनवैदग्धा(ग्ध्य)मुक्तम् ॥८०॥

[529]तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।
यद्‌स्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥८१॥

हे सखे ! तत्र वर्ण(र्णि)त[530] स्वरूपायामस्मदलकायां धनं(न)द[531]-गृह्य(हा)दुत्तरेण[532] राजराजेश्वर--गृह्य(हा)[533]दुत्तरसमीपे अस्मदीयमागारं गृहं प्रवर्तते। कथं मया ज्ञास्यति(ते)[534] [इ]त्य(त्यु)क्ते[535] अभिज्ञानमाह। किं लक्षणमा(मा)गारं[586] ? तोरणेन दुराल्लक्ष्यं दूरादेव ज्ञेयम्। किं-लक्षणेन तोरणेन ? सुरपतिधनुश्चारुणा इन्द्रचापसुन्दरेण। यस्य गृहसो(स्यो)पान्ते[537] वेश्मनः समीपे मत्कान्तया[538] वर्धितो[जलसेकादिना][539] वर्धापितो मन्दार[बालः][540] [वर्तते। किं लक्षणो बालमन्दारवृक्षः][541] ? कृतकतनयः पुत्रीकृतः कृत्रिमपुत्रकः। पुनः किं लक्षणः ? हस्तप्राप्यस्तबकनि-(न)मितः[542]। हस्तप्राप्येण बालत्वात् करग्राह्यः स्तबकेण[543] विनतो नम्नी(म्री)[544]भूतः। साम्प्रतं सविशेषाऽभिज्ञं परं[545] दर्शयन्नाह ॥८१॥

५

Jain Education International For Personal & Private Use Only www.jainelibrary.org

546वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥८२॥

547अस्मिन् उद्याने न केवला(लो) मन्दारः [अपि च] वापी वर्तते । कथंभूता वापी ? मरकतशिलाबद्धसोपानमार्ग्र(र्गा) । मम गृहे चैवंविधा वापी पद्म(द्मा)नि वर्तते(न्ते) । किं [विशि]ष्टा वापी ? हैमैः स्वर्णमयैः विकचकमलैस्छि(श्छ)न्ना छादिता । वाप्यां हि(है)मकमलैर्भवितव्यम् । कीदृशैस्तै[स्निग्धवैदूर्यनालैः]546 स्निग्धवैदूर्यमणिरेव नालो दण्डो येषां तानि तैः । हंसा धार्तराष्ट्राः । त्वमपि भवन्तमपि प्रेक्ष्य दृष्ट्वा । सन्निकृष्टं समीपस्थमपि । मानसं मानसरो नाध्यास्यन्ति न स्मरिष्यन्ते(न्ति) । कीदृशा हंसाः ? वाप्यास्तोये जले कृतवसतयः विहितनिवासाः । पुनः कीदृशा हंसाः ? {अ}व्यपगतशुचः व्यः(व्य)पगत(ता) शुक(क्) येषां ते । तत्रैवोपद्रवाभावान्न दुःखा(खि)[ताः] । अत्र हेमशब्दो रजतादौ ॥८२॥

549तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥८३॥

तस्याः व्यावा(वाप्या)स्तीरे550 क्रीडाशिलोस्ति । कीदृशै(शः)551 क्रीडाशैला:(लः)552? पै(पे)शलैः रम्यैः इन्द्रनीलैरिन्द्रनीलरत्नै[:] रचितशिखरैः(रः)553 विरचितशृ(श्)ङ्गः । पुनः कीदृशः ? कनककदलीवेष्टनप्रेक्षणीयः । कनकमयीनां स्वर्णकदलीलताना(नां) च वेष्टनेन प्रेक्षणीयो रम्यः । हे सखे । इति हेतोः काते(त)रेण विरहवशादधीरेण मनना(सा)554 चेतसा त्वत्सादृश्यात्तमेवाद्रि(द्रिं) क्रीडाशैलं स्मरामि चिन्तयामि इति । किं मद्ग(द्गे)हिन्याः स मे(मम)555 प्रियायाः (प्रिय) ईति । किं कृत्वा ? त्वां भवन्तं वीक्ष्य । कीदृशं त्वां ? प्रत्यो(प्रेक्ष्यो)556 पान्तस्फा(स्फु)रिततडितं प्रेत्यो(दयो)या(षा)न्ते स्फा(स्फु)रिता लसंती तडि(त्) यस्य स तम् । शेषत्वाविवक्षायां स्वामित्यधीरार्थे(गर्थे ति)557 षष्ट्या भावः ॥८३॥

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥८४॥559

हे सखे ! अत्र क्रीडाशै(शै)ले रक्ताशोक केश(स)रवृक्षौ559 विद्य(द्ये)ते । कीदृशौ तौ ? करबकवृतेश्च पुनर्माधवीमण्डपस्य प्रत्यासन्नौ निकटवर्तिनौ । तयोर्मध्ये एकश्चाद्यो 560रक्ताशोको मया सह तव शख्या(सख्या)561 मत्प्रियायाः वामपादाभिलाषी वर्तते । वामपाद(म)भिलषति,562

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वामपादाभिलाषो । तस्य विकाश(सः) पादप्रहारानुग्रणे(हे)ण स्यात् । अहमपि सापराधः सन् तदीयचरणप्रसादं वाञ्छामि । अन्यो(ऽ)पि बकुलोऽस्याः मत्कान्तायाः वदनमदिरा[563]दोहदच्छद्मना दोहदवाञ्छया कांक्षति वाञ्छति । रमणीवदनासवसेवनेन[564] तस्य विकाशा(सा)त्[565] । कीदृशो रक्ताशोकः ? चलकिसलयश्चञ्चलपल्लवः । कीदृशः केश(स)रः ? कान्तो मनोहरः ॥८४॥

[566]तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः सिञ्जावलयसुभगैर्नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥८५॥

हे मित्र ! तन्मध्ये तयोरशोककेश(स)रयोर्मध्ये क्रीडाबर्हिणः काञ्चनी वासयष्टिः स्फटिकफलका स्फु(स्फ)टिकस्य फलि(ल)कः पीठं यस्याः सा । पुनः कीदृशी ? मूलेऽधःप्रदेश(शे)[567] मणिभिर्बद्धा खचिताः(ता) । कीदृशैः मणिभिः ? अनतिप्रौढवंशप्रकाशैः । अनतिप्रौढा नातिपक्वा ये वंशा वेणवस्तद्वत्प्रकाशः कान्तिर्येषां मरकतमणीनां ते, तैः। मरकतमणयो(यो)ऽपि[568] वंशवर्णा स्युः । हे सखे ! यां यष्टिं वो युष्माकं सुहृन्मित्रम् । ना(नी)लकण्ठो[569] मयूरो दिवसविगमे सूर्यास्तसमये अध्यास्ते सेवते ।कीदृशो नीलकण्ठः ? मम {म} कान्तया तालैः करवादनैः नर्तितो नृत्यं कारितः । कीदृशैः{:}स्तालैः ? सिञ्जद्वलयसुभगैः सिञ्जा(ञ्जा)[570] {नक}कटकमनोहरैः ॥८५॥

[571]एभिः साधो मनसि निहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥८६॥

हे साधो ! रे(ए)भिः[572] पूर्वोक्तैर्लक्षणैश्चिह्न(ह्नै)र्मनसि निहितैश्चित्तस्थापितैः मद्भवन(नं)[573] ममागारं लक्षयेथाः जानीथास्त्वम् । किं कृत्वा ? च पुनर्द्वारोपान्ते लिखितवपुषो(षौ)[574] शङ्खपद्मौ निधी दृष्ट्वा विलोक्य लक्षे(क्ष)[ये]थाः । कीदृशं{ः} भवनं ? अधुना नूनं निश्चितं मद्वियोगेन मम विरहेण क्षामच्छायमल्पशोभम् । अमुमेवार्थां(र्थं)[575] दृष्टान्तेन दृढयति । कविः खलु निश्चयेन कमलं सूर्यविकाशि(सि) पद्मं सूर्य(र्या)पाये दिनकरास्तसमये स्व(स्वा)-[576]मात्मीय(यां)[577] सलि(अभि)ख्यां[578] शोभां न पुष्यति न पुष्णाति ॥८६॥

[579]गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥८७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हे तोः(साधो)[580] ! तत्र मद्भवने विद्युदुन्मेषदृष्टिं कर्तुं विधातुम् । अर्हसि योग्यो भवसि । विद्युदेवोन्मेषदृष्टि{:}स्ताम् । यथा तां प्रियां पश्यति(सि)[581] [इति] भावम्(वः)[582] । कीदृशस्त्वं प्रथमं(म)कथितो(तेः) पूर्वोक्ते निरूपिते रम्यसानौ । प्रधानं(न)[583]शृङ्गे क्रीडाशैले [नि]षि(ष)न्न(ण्णः)[584] उपविष्टः सन् । किं कृत्वा ? सद्यस्तत्कालं शीघ्रं सम्पातहेतोः क्षिप्रं गमनार्थं कलभतनुतां गजशिशुपेशलत्वं गत्वा[ऽऽ]साद्य । गुरुशरीरे विलम्बो जायते । कीदृशं वि० दृष्टिं अन्तर्भवनपतितां अन्तर्भवने पतितां वेश्मान्तरप्रसृ(सु)ताम्[585] । पुनः कीदृशैः(शीं)[586] दृष्टिं ? अल्पाल्पभासं, अल्पाल्पास्तोकतरा भाः कान्तिर्यस्याः सा ताम् । पुनरपि कीदृशी दृष्टिः ? खद्योतालीविलसितनिभां खद्योतानां ज्योतिरिंगिणां या[ऽऽ]ली श्रेणी तस्या यांसिलबित[587] (यद्विलसितं), स्फुरणं तन्निभा, तत्तुल्याम् ताम् ॥८७॥

[588]तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥८८॥

['आद्या इव' इति टीकायां दृश्यते ।]

हे श(स)खे ! तत्रैवंविधे गृहे ईदृग्विधा या स्त्री भवेत्तामङ्गनां मम द्वितीयमपरं जीवितं जीवितव्यं जानीथाः । मम कान्तां ≤तां नु द्येथाः≥[589] । कीदृशी सा ? तन्वी कृशशरीरा । पुनः [कीदृशी][590] सा ? श्यामा[591] षोडशवार्षिकी । पु०[कीदृशी] सा ? सि(शि)खरदश(नां)ना[592] शिखरं पक्वदाडिमबीजाकारं माणिक्यं तद्वत् दशना दन्ता[593] यस्याः सा । तीक्ष्णदन्त(ता)[594] वा । {क} [पुनः] कीदृशी सा ? पक्वबिम्बाधरोष्ठी। पक्वं यद्बिम्बाफलं गोल्हफलं तद्वद्(दा)रक्तौ अधरोष्ठौ या(यस्याः) सा[595] । पुनः सा मध्ये मध्यविभागे क्षामा कृशोदरा(री)[596]। पुनरपि० सा चकितहरिणी–प्रेक्षणा चकिता भयत्रस्ता या हरिणी तद्वत् प्रेक्षणे यस्याः सा । पु० [कीदृशी] सा ? निम्ना(म्न)[595]- नाभिः निम्नां(म्ना)[598] गम्भीरा नाभिर्यस्याः सा । पुनः [की०] सा ? अलसगमना, कस्मात् ? श्रोणीभारा[त्] । नितम्बां(म्ब)[599] गौरवात् । अलसं मन्थरं गमनं यस्याः सा । पुनः [की०] सा ? स्तनाभ्यां कुचां(चा)भ्याम् । स्तोकनम्नां(म्रा) स्तोको(कं) मनाक् नम्रा । किं बहुनाऽपरं वर्ण्यते । तस्यां(तस्मिन्) युवतीविषये नारीमध्ये विधातुः ब्रह्मणः आद्या प्रथमा श्रि(सृ)ष्टिरिव[600] आदौ हि अनुद्वेगा[त्] रम्यनिर्माणं भवति ॥८८॥

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठा गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये तुहिनमथितां पद्मिनीं वान्यरूपाम् ॥८९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कीदृशीं ताम् ? पर(रि)मितकथाम् । पर(रि)मिता स्वल्पकथा यस्याः सा पि(पे)शलभाषिणी[601] । पुनः कीदृशीं, तां ? गाढोत्कण्ठां [गाढा][602] मयि भर्तरिविषयो(ये)[603] उत्कण्ठा यस्याः । उत्प्रेक्ष(क्ष्य)ते । मयि सहचरे पत्यौ दूरीभूते[604] सति, एका[605] केवलं चक्रवाकीमिव । अह(हं)[606] तां बालां रमणीं, अन्यरूपाम् । जातां संपन्नां मन्ये जाने । केषु सत्सु गुरुषु दुस्सहेषु दिनेषु[606] गच्छत्सु सत्सु । उत्प्रेक्ष(क्ष्य)ते । तुहिनमथितां शिशिरदग्धां पद्मिनीमिव, कमलिनीमिव । अत्र वा शब्द इवार्थो ज्ञेयः ॥८९॥

**नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया**
**निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।**
**हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-**
**दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥९०॥**

निजकान्तायाः विरहावस्थां प्रकटयन्नाह । नूनं निश्च(श्च)येन तस्या मत्प्रियायाः । मुखं वदनम् । इन्दोश्चान्द्रमसः । दैन्यं दा(दी)नत्वम्[608] [विच्छायतां][609]बिभर्ति धारेष्य(धारय)ति[610] । [611]वत(र्त)मानसमीपे भविष्यति काले वर्तमाना । कथंभूतस्येन्दोः ? त्वदनुसरणक्लिष्टकान्तेः । तवानुशरणम् । त्वदनुशरणेन क्लिष्टा विच्छाय[त्वं] नीतातस्याः(स्य) । कीदृशं मुखं ? प्रबलरुदितो- च्छूननेत्र, प्रबलरुदितेनाऽविच्छिन्नरुदनेनोच्छूननेत्रे यस्य तत् । पुनः की० निश्वास(सा)- नामशिशिरतया उच्छ्वास(सा)नामुष्णः(ष्ण)(च्छ्वा,[स] परम्परया, भिन्नवर्णाऽधरोष्ठं[म्]भिन्नवर्णो, विरहोच्छ्वासमौ(?)वदनादृगतकान्ती(न्तिः) अधरोष्टं[ष्ठः] यस्य तत् । कस्माल्लंबालकस्य भावो लम्बालकत्वं तस्मात् । प्रलम्बकेशत्वात् विरहिणी केशान्न समाचर(रच)यति ॥९०॥

**आलोके ते निपतति पुरा सा बलिव्याकुला वा**
**मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।**
**पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां**
**कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥९१॥**

हे जगज्जीवन ! सा मत्कान्ता, ते तव, आलोके दर्शनेपथे(थि,[614] पुरा निपतति, निपतिष्यति । यावत्पुरा निपातयोः ऽलुद(लट्) । सूत्रम्[615] । एतादृशान् व्यापारान् विदधन्ती(तीं)[616] तां अवलोकयिष्यसि इति भावः । की० सा ? बलिव्याकुल(ला,[617] बल्यां.लौ) दैवपूजन-[618] व्याकुला तत्परा बलिव्याकुला । किं कुर्वती ? वा अथवा भावगम्यं निजचित्तस्थं मत्सादृश्यं ममानुकारं, चित्रफलकादौ[619] लिखंती सती ते आलोके निपतिष्यति ।{ते आलोके निपतिष्यति ।} कीदृशं मत्सादृश्यं ? विरहतनु । विरहेण वियोगे तनु दुर्बलं यत्तत्, वा अथवा मधुरवचनां शिष्टभाषिणी(णीं) पञ्जरस्थां स्वर्णपञ्जरवासिनीसारिकामिति पृच्छन्तीति । आलोके यास्यते इति । किं कच्चिदिति[620] परप्रश्न । हे रसिके ! {भाव}[621] क(भ)र्तुः स्मरसि मत्पतिं ध्यायसि ! हि यस्मात्कारणात् तस्य पत्युः प्रियाऽभीष्टा ॥९१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचि-
द्भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥९२॥

हे सौम्य । मलिनवसने रजोधूसराम्बरांके उच्छ(त्स)ङ्गे वीणां निक्षिप्य स्थाप्य, गेयं गीतं उद्गातुकामा सती, मम प्रिया तवालोके पतिष्यन्ति(ति)623 । कीदृशं गेयं ? मद्गोत्राङ्कं624, मम गोत्रं नाम अङ्कं चिह्नं यस्य तत् । पुनः कीदृशं गेयं ? विरचितपदं, विरचितानि पदानि शब्दा यस्य तत् । सा किं कुर्वती ? स्वयमपि कृता(तां)625 मूर्च्छनां सा(स्व)राणां भूयो भूयो वारंवारं मनसोऽस्वस्था(स्थ)[त्वा]द्व विस्मरन्ति(न्ती) विस्मारयन्ती । किं कृत्वा ? नयनसलिलैर्नेत्रजलैः आर्द्रां क्लिन्नां तन्त्रीं वीणां कथंचिन्महता कष्टेन सारयित्वा योजयित्वा626 ॥९२॥

शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीमुक्तपुष्पैः ।
संयोगं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥९३॥

हे सौम्य ! वा अथवा सा प्रिया चिरविरहावधेः शेषा{न्}वि(व) शिष्टान्मासान् देहलीमुक्तपुष्पैर्गणनया संख्यया भुवि विन(न्य)स्यन्ती स्थापयन्ती । विरहदिवसस्थापितस्य आलोके निपतिष्यति । देहल्यां देवपूजार्थं मू(मु)क्तैः स्थापितैः पुष्पैर्या गणना तया । कीदृशस्यावधेः विरहदिवसस्थापितस्य । विरहदिवसं(सः) वियोगदिनमारभ्य स्थापितो(तः), स्य(त)स्य । वाऽथवा हृदयनिहितारम्भं मनोरथरचितं संयोगं मदीयसमागमनम् । आस्वादयन्त्यनुभवन्ती । तवालोके यास्यति । कथमेतादृशान् व्यापारान् विधत्ते सेत्युक्ते आह–प्रायेण बाहुल्येन । {सा} रमणविरहेषु दयितवियोगेषु । अङ्गनानां विरह(हि)णी स्त्रीणाम् । एते वर्णितस्वरूपा विमो(नो)दा व्यापारा भवन्ति ॥९३॥

सव्यापारामहनि न तथा पीडयेद्विप्रयोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्संदेशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥९४॥

( 'पीडयेन्मद्वियोगः' इति टीकायां दृश्यते )

हे बन्धो ! अहमेवं शङ्के शं(सं)भावये{त} । भवतः सखीं मत्पत्नीं मद्वियोगो मम विरहः अहनि दिने [स]व्यापारां,627 चित्रादिव्यापारयुतां तथा न पीडयेत् यथा रात्रौ निर्विमो(नो)दां तां मद्वियोगो दुःखयेत् । अत एव रात्रौ गुरुतरशुकं(चं) गुरुतरा शुक् शोको

यस्याः सा ताम् । अत एव अवनिशनयासन्न वातायनस्थः । विरहवशात् ऽ(अ)वनौ पृथिव्यां यत् शयनं तस्याः । [आ]सन्न वातायने गवाक्षे तिष्ठतीति । अवनिशयनासन्नवाताय[न]स्थस्त्वं तां सखीं वियोगादुन्निद्रां जागरुकाम् । निशीथे अर्धरात्रौ मत्सन्देशैरलमत्यर्थं सुखयितुं पाश्यः(पश्येः) । कीदृशीं साध्वीं ? सतीम् ॥९४॥

आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां
प्राचीमूले तनुरिवकलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवाष्णैर्विरहजनितैरश्रुभिर्यापयन्तीम् ॥९५॥

या रात्रिः मया सार्द्धं इच्छारतैरभिलि(ल)षितसुरभैः(तैः) क्षणमिव मत्कान्तया नीता [अतिवाहिता]628 तामेव रात्रिं उष्णैर्विरहजनितैर्वियोगोत्पादकैरं(र)श्रुभिर्नेत्राम्बुभिः यापयन्ती निगमि(म)-यन्ती वर्तते । कीदृशी सा ? आधिक्षामा आधि सु(तु) मानसी पीडा तया क्षामा । पुनः कीदृशी विरहशयने संनिषिणि(षण्णैक)पार्श्वां संनिषिन्नं(ण्णं) निक्षिप्तमे[क]पार्श्वं यया सा । उत्प्रेक्ष(क्ष्य)ते केव प्राचीमूले पूर्वीयभागे (पूर्वदिग्भागे)630 हिमांशोश्चन्द्रस्य कलामात्रे(त्रं) से(शे)षेव ॥९५॥

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बि ।
मत्संयोगः सुखमुपनयेत्स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥९६॥

( 'लम्बं' इति टीकायां दृश्यते । )

सा किं कुर्वन्ती इति हेतोः निद्रामती(ति)ला[भ]माकाङ्क्षन्ती इति । किम् ? स्वप्न-जो[ऽ]पि631 स्वप्नप्राप्तो[ऽ]पि मत्संयोगो मेलापकः तस्याः सुखमुपनयेत(त्) सौख्यमुत्पादयेत् । कीदृशं सुखं नयनसलिलोत्पीडरुद्धावकाश(शा)म् । नयनसलिलोत्पीडनेन नेत्रा[श्रु]पूरण632 रुद्धोऽवकाशो यस्य । तत्पुनः सा किं कुर्वती ? नूनं निश्चितम् । शुद्धस्नानात्पानीयमात्राऽभिषेकात् परुषं कठोरं अल[कं] कुन्तलं निश्वासेना(न)633 विक्षिपन्ती अपसारयन्ती । की० अलकं ? आगण्डलम्बम् । आगण्डलयोर्लम्बत इत्यागण्डलम्बि कपोलभ्रस्तम् । कीदृशेन निश्वासेन ? अधरकि-श(स)लयक्लेशिना अधरकिसलयानां क्लेशं करोतीति अधरकिसलयक्लेशिना ॥९६॥

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीया ।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥९७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनः किं कुर्वती ? करेण हस्तेन तामेकवेणीं असकृद् वारंवारं{न}सारयन्ती । {'तां' 'कां'} यां(या) वेणी आदौ प्रथमविरहदिवसे बद्धा रचिता । किं कृत्वा ? {शिखा}[६३४] दाम हित्वा चूडाशेखरमपास्य सा(या) वेणी सा(शा)पस्यान्ते[६३५] विगलितशुचा गतशोकेन मया(यो)द्वेष्टनीया [मोचनीया][६३६] । कीदृशीं ? स्पशे(र्श)क्लिष्टां कठोरां ताम् । पुनः कीदृशीं ? कठिनविषमाम् । कस्मात् ? गण्डाभोगात् । कठिना चासौ विषमा च कठिनविषमा । कीदृशेन करेण ? अयमित-नखेन असंस्कारयुतेन ॥९७॥

पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टा-
न्पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥९८॥

पुनः सा किं कुर्वन्ती ? खेदात् चक्षुर्नेत्रं पक्ष्मभिर्लोमभिः च्छादयन्ती । कीदृशैः पक्ष्मभि[:]? सलिलगुरुभिः सन्मुखं गतं विस्तृतम्। ततो मद्विरहेणोद्वेगकारित्वात्तथैव सन्निवृत्तं यद्वदेवरमसाद्भू(दृग)तं तद्वदेव प्रत्यावृक्ष(त्त)मित्यर्थः । कीदृशान् अमृतशि[शि]रान्[६३७] ? पीयूषशीतलान् । पुनः कीदृशान् ? जालमाग्र(र्ग)प्रविष्टान्[६३८] । सा केव स्थलकमलिनीव । यथा स्थलकमलिनी साऽभ्रेऽभ्रयुक्ते अह्नि दिने [न प्रबुद्धा][६३९] न विकसिता भवति, न सुप्ता न संकुचिता भवति ॥९८॥

सा संन्यस्ताभरणमबला पेलवं धारयन्ती
शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम् ।
त्वामप्यस्त्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥९९॥

हे जीमूत ! सा अबला अवस्यं(श्यं)[६४०] निश्चितं, त्वामपि नवजलमयं अश्रं(स्रं)[६४१] मोचयिष्यति {त} त्याजयिष्यतीति भावः । सा किं कुर्वन्ती ? स(श)य्योत्सङ्गे निहितं स्थापितं गात्रं शरीरं असकृद्वारंवारं दुःख दुःखेन[६४३] धारयन्ती । कीदृशं शरीरं ? पेलवं सुकुमारं कृशं वा । अत एव सन्यस्ताभरणं मुक्तमण्डलं(नम्)[६४४] । युक्तो[ऽ]यमर्थः । प्रायो बाहुल्येन सव(र्वः) को[ऽ]पि आर्द्रान्तरात्मा आर्द्रचित्तं(त्तः)[६४५] करुणावृत्ति(त्तिः)[६४६]कृपाशीलो[६४७] भवति ॥९९॥

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया स्यात् ॥१००॥

हे भ्रातः(तः), अहमेवं जाने तव सख्या भवतो भ्रातृजायायाः मनश्चित्तं मयि विषये [सम्भृतस्नेहम्][६४८] । सम्भृतः स्नेहः मत्प्रीतिः वर्तते [यस्मिन् ।] अतो अस्मात्कारणादित्थंभूतां ई(इ)दृग्विधां वर्णितस्वरूपां दशमावस्थां प्राप्तां प्रथमविरहेऽहं तर्कयामि विचारयामि । खलु

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

निश्चितम् । सुभगमभीष्टं आत्मानं मन्यते, सुभगंमन्यस्तद्भावः सुभगंमन्यभावः । मां वाचाल यत्किञ्चित्प्रलापितं न करोति न विधत्ते । यस्मात्कारणात् हे भ्रातः मया तवाग्रे यदुक्तं आत्मनः स्वरूपं तदचिरात् स्तोककालात् अशेषं सम्पूर्णं ते प्रत्यक्षं(क्षं)[649] भावि दिनैः द्वैः गैस्ता द्रक्ष्यसीति ॥१००॥

**रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं**
**प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।**
**त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या**
**मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥१०१॥**

हे भ्रातः । अहं इति शङ्के[650] । त्वयि भवत्यासने(न्ने) निकटवर्तिन(नि)[651] सति मृगाक्ष्या मृगनेत्रायाः नेत्रमुपरि मीनक्ये(क्षो,भात्[652] स्पन्दि[त]त्वात् चलकुवलय([653]या)नि तेषां या श्रीस्तस्यास्थ(स्तु)ला सादृश्यता । यतो नारीणां [654]वामाक्षिस्फुरणमासन्नमानन्दं सूचयति । कीदृशं नयनामालकैः प्रलम्बमानैरलकैः केशैः रुद्धापाङ्गप्रसरम् । रुद्धोऽपाङ्ग-प्रसरः कटाक्षक्षेपो यस्य तत् । [655]पुनः कीदृशं नयनम् ? अञ्जनस्नेहशून्यम्, शोकादञ्जन-स्नेहेन शून्यं रहितं यत्तत् । पुनरपि कीदृशं नयनं ? विस्मृतभ्रूविलासं, विस्मृतो भ्रूविलासो यस्य तत् । कस्मान्मधुतो(नो) मद्यस्य प्रत्यादेशात्परित्यागात् ॥१०१॥

**वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-**
**र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।**
**सम्भोगान्ते मम समुचितो हस्तसंवाहनानां**
**यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥१०२॥**

हे मेघ ! च पुनः । त्वय्यासन्ने सति तस्याः मत्कान्तायाः वामः ऊरुश्चञ्चलत्वं यास्यति स्फुरिष्यति । कीदृशं(शः)[655-A] ऊरुः ? [656]मदीयकररुहपदैः मम नखक्षतैः मुच्यमानो वर्ष-(र्ज्य)मानः[657] । पुनः किदृशं(शः) ऊरुः ? दैवगत्याः(त्या) दैववसे(शे)न [658]चिरपरिचितपदं[659] मुक्ता[जालं][660] त्याजित(तं)[661] उपक्षे[पि]तम् । शैत्योत्पादनोऽयं[662] तत्र तस्य करणम् । पुनरपि कीदृशः ? सरसकदलीस्थं स्तं भवद्गौरः श्रामणानां समुचितो योग्यः । पुनः कीदृशः सरस-कदलीस्थं(स्तं)भवद्गौरः[663] सरसी कदलीस्तम्भवत्गौरो[664] [गौ]रवर्णः ॥ १०२ ॥

**[665]तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या-**
**दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।**
**मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचि—**
**त्सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥१०३॥**

हे जलद ! तस्मिन् काले प्रभातसमये, यदि चेत्सा लब्धनिद्रासु(सु)खा[666] स्याद्भवेत्, तदा तत्रासीन उपविष्टस्त्वं स्तनितविमुखस्त्यक्तगर्जितः सन्, याममात्रं[667]सहस्व[658] ≤बलान्मा तां जागरयेः≥[669] । किमर्थमित्याह । अस्याः गाढोपगूढं दृढालिङ्गनं कर्तुं मद्यस्तत्क्षण(णं){कं}[670] कण्ठच्युतभुजलताग्रन्थि मा भूत् । सद्यस्तत्कालं कण्ठाद् गलात् च्युतो भ्रष्टो भुजलता-ग्रन्थिर्यत्र गाढोपगूढं तत् । आश्लेषविच्छेदो मा भवत्वित्यर्थः । क्व सति ? मयि प्रणयिनि भर्त्तरि कथंचिद्दैवात् स्वप्ने सति स्वप्नासादिते[671] सति[672] ॥१०३॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन**
**प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।**
**विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे**
**वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥१०४॥**

ततोऽनन्तरम् । हे धीर ! स्तनितवचनैः गम्भीरगर्जितवाक्यैः तां मानिनी(नीं) वक्तुं प्रक्रमेथाः प्रारम्भेथाः । किं कृत्वा ? तां भार्यां स्वजलकणिकाशीतलेन, अनिलि(ले)नोत्थाप्य[673] जागरूकां विधाय, स्वजलस्य निजनीरस्य याः कणिकास्ताभिः शीतलस्तेन । कीदृशीं तां ? मालतीनां मल्लिकानां, अभिनवैः नूतनैर्जालकैः तुवलै(मुकुलैः)[674] प्रत्यास्वस्थां(श्वस्तां)[675] विनिद्राम् । मालत्यपि प्रभाते विकसनि(ति) । पुनः की० तां ? त्वत्सनाथे युष्मदा(द)धिष्ठिते[676] गवाक्षे[677]विद्युद्गर्भस्तिमिननयनां विद्युद्गर्भतडिद्गति वातायने दिदृक्षया क्षिप्तं यश्चक्षुरतएव ति(स्ति)मिते[678] निश्चले नयने यस्याः सा ताम् ॥ १०४ ॥

तत्रा(त्र) गत्वा[ऽ]हं किं [679]कथयिष्यामीत्याह —

**भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं**
**तत्सन्देशैर्मनसि निहितैरागतं त्वत्समीपम् ।**
**यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां**
**मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥१०५॥**[680]

हे अविधवे ! पतिव्रति ! भर्तुः निजदयितस्य प्रियमभीष्टं मित्रं[681] सुहृदं मां जीमूतं विद्धि जानीहि । कीदृशं मां ? मनसि निहितैः चेतसि स्थापितैः तत्सन्देशैः स्वति(स्वस्ति)[682]-वाचकैः[683] त्वं त्व[त्] समीप(पं) आगतम् । यां अम्बुवाहे पथि मार्ग(र्गे) श्राम्यतां मार्ग-(र्गे) [684] विश्रामं कुर्वतां प्रोषितानां पथिकानां वृन्दानि समूहान्, मन्द्रस्निग्धैर्ध्वनिभिः कृत्वा गृहाय त्वरयि(य)ति[685] । सोत्सुकानि विदधातीत्यर्थः । कीदृशानि वृन्दानि ? अबलावेणि-मोक्षोत्सुकानि । अबलावेणिमोक्षे विरहणी(हिणी)[वेणी] मोचने उत्सुकानि त्वरितानि ॥१०५॥

[686]**इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा**
**त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैवम् ।**
**श्रोष्यत्यस्मात् परमवहिता सौम्य सीमन्तिनीनां**
**कान्तोदन्तः सुहृदुपनतः संगमात् किंचिदूनः ॥१०६॥**

हे सौम्य ! सा मत्काता(न्ता) उन्मुखी चोर्ध्वमुखी सती त्वां भवन्तं, वीक्ष्य दृष्ट्वा । च पुनरेव सम्भाव्य मत्कान्तस्योदन्तो[ऽ]यं इति विचार्य, अस्मात्परमवहिता सावधाना सती त्वदुक्तं [687]श्रोष्यं(ष्य)त्याकर्णयष्य(यिष्य)ति । क्व सति ? त्वयेति पूर्वोक्ते आख्याते कथिते सति । कीदृशी सा ? उत्कण्ठोच्छ्वसितहृदया । उत्कण्ठोच्छ्वसितं हृदयं यस्याः सा । युक्तो-[ऽ]यमर्थः । हे सौम्य ! सुहृदुपनतो मित्रेणानीतः, कान्तोदन्तः । प्र(प)तिप्रेषितः । किं वदन्तौ(न्ति), कामिनीनां युवतीनां सङ्गमात् मेलापकात् किञ्चित्स्वल्पम् । ऊनो हीनो भवति । सा केव मैथ(थि)लीव, शी(सी)तेव । यथा मैथ(थि)ली पवनतनयं हनूमन्तं वीक्ष्य उत्कण्ठो-च्छ्वसितहृदया सती तं संभाव्य श्रीरामोदन्तमाकर्णितवती ॥१०६॥

**तामायुष्मन्मम च वचनादात्मनश्चोपकर्तुं**
**ब्रूयादेवं तव सहचरो रामगिर्याश्रमस्थः ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तां**
**पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥१०७॥**

हे आयुष्मन् ! मम वचनात् मामकीनवाक्यात् आत्मनः स्वस्य उपकुर्वतां प्रियां एवमग्रे वीक्ष्यमाणां ब्रूयात् उच्यते । हे अबले ! तव भवत्याः सहचरो भर्ता अव्यापन्नो जीव्यमानः । रामगी(गि)र्याश्रमस्थः सन् वियुक्तां त्वां भवन्तीम् । कुशलं माङ्गल्यं पृच्छति । युक्तो[ऽ]-यमर्थः । सुलभविपदां प्राणिनां जीवानाम् । एतदेव पूर्वाभाष्यं प्रथमाभाषणीयम् । सुलभा विपद्येषां ते तेषाम् ॥१०७॥

**अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं**
**साम्रेणाश्रुद्रवमविरतोत्कण्ठमुत्कण्ठितेन ।**
**दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती**
**संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥१०८॥**

हे अविधवे ! तव प्रेयान् दूरवर्ती सन् स्तै(तैः) 689 विकल्पैः उत्कण्ठावशादङ्गेन निज-शरीरेण तवाङ्गं विशति । भवतीदेहं प्रविश(वेश)तुमिच्छति । त्वया समं(म)मैक्यं वाञ्छतीत्यर्थः । कीदृशः सः ? विधिना दैवेन रुद्धमार्ग्रः(र्गः) । विरहस्य वर्षभोग्यत्वात् । पृथक् विशेषणैरपि सादृश्यगुणमाह । कीदृश्यं भवत्या अङ्गं ? 690[तनु कृशम्] । कीदृशेनाङ्गेन ? तनुना कृशतरेण । पुनः की० ? तप्तेन वियोगात्संतप्तेन । पुनः कीदृशं ? तप्तम् । पुन० साश्रे-(स्रे)ण691 अश्रुयुक्तेन । की० अश्रुद्रवं अश्र(स्रं) द्रवतीत्यश्रुद्रवम् । की० अवितरो(रतो)-692 त्कण्ठं अविरता उत्कण्ठा यस्य तत् । की० उत्कण्ठितेन । की० दीर्घोच्छ्वासम् । की० समधिक-तरोच्छ्वासिना समधिकतरं उच्छ्वसति यत्तत्समधिकतरोच्छ्वासि तेन ॥१०८॥

**शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्ता—**
**त्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।**
**सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृश्य-**
**स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥१०९॥**

भवत्याः भर्ता मन्मुखेनेदमाग(ह) वक्ष(क्ष्य)माणं आह भणति । तत्किं यदपि शब्दा-ख्येयं प्रकटवाच्यं, किलेति सत्ये । ते तव सखीनां पुरस्तात् कर्णे कथयितुं वक्तुं यो लोलः । साकांख्यो(क्षो)ऽभूद्बभूव । शब्दैराख्यायते उद्गीयते तत् । कस्मात् ? ते भवत्या आननस्य693 लोभात् आननस्पर्शस्य 694 लोभो, वदनस्य लोभस्तस्मात् । स तव भर्ता श्रवणविषयमति-क्रान्तः । ततो [न]695 लोचनैर्दृश्यते । कथंभूतो यक्षः ? लोचनाभ्यां अदृश्यः । कीदृशं इदं वक्ष्य-माणम् ? उत्कण्ठाविरचितपदम् । उत्कण्ठया विरचितानि पदानि शब्दा यत्र तत् ॥१०९॥

**श्यामास्वङ्गं चकितहरिणीप्रेक्षिते दृष्टिपातं**
**वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।**
**उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासा-**
**न्हन्तैकस्थं क्वचिदपि न ते तन्वि सादृश्यमस्ति ॥११०॥**

हे तन्वि ! हन्त कष्टे । ते तव सादृश्यं क्वचिदपि कुत्रापि एकस्थं एकवस्तुनि 696 विषये नास्ति न दृश्यते, यद्विलोक्यात्मानं धारयामि । हे तन्वी(न्वि) ! ते 697 तव केशान्

शिखी(खि)नां मयूराणां बर्हभारेषु पुच्छसमूहेषु विलोकयामि ! हे तन्वि ! तव भ्रूविलासान् प्रतनुषु सूक्ष्मेषु नदीवीचिषु सरित्कल्लोलेषु उत्पश्यामि । क्वचिदपि त्रिभुवने[ऽ]पि नास्ति । यस्ते श्याङ्गं शरीरं श्यामासु प्रियङ्गुलतासु सदृशसुकुमारत्वमुत्पश्यामि विलोकयते । तव दृष्टिपातान् नेत्रव्यापारान् चकितहरिणीदृग्विलोकनेनोत्पश्यामि ! पुनः वक्त्रच्छायां मुख[पं]कजशोभां शशिनि चन्द्रमसि उत्पश्यामि ॥११०॥

**धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले**
**दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।**
**घर्मान्तेऽस्मिन्विगणय कथं वासराणि व्रजेयु-**
**र्दिक्संसक्तप्रविरलघनव्यस्तसूर्यातपानि ॥१११॥**

हे बाले ! पञ्चबाणः कामः[698] प्रतनुमपि वियोगवशात् कृशं अपि मां क्षिणोति मां पीडयति । कीदृशं माम् ? अस्य त्वन्मुखस्य [दूरीभूतम् । कीं० त्वन्मुखस्य ?][699] धारासिक्तस्थल-सुरभिणः । धाराभिर्जलधाराभिः सिक्तं यत्स्थलं तद्वत्सुरभि, सुगन्धं, तस्य । हे बाले ! त्वमेव विगणय विचारय । अस्मिन् घर्म्मा(र्मा)न्ते वर्षाकाले वासराणि दिनानि । क. कथं केनोपायेन व्रजेयुर्गच्छेयुः । कीं० वासराणि ? दिक्षु संसक्तः संलग्नः प्रविरले[ऽ]संयतो मेघस्तेन व्यस्तः खण्डीकृत सूर्यातपो येषु तानि । दिक्संसक्तप्रविरलसूर्यातपानि ॥१११॥

**त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-**
**मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।**
**अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे**
**क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥११२॥**

हे मेघ ! मद्वाक्या[त्][700] त्वमिति ब्रूयाः । हे दयिते ! यावत्ते तव चरणपतितं आत्मानं {अस्व} कर्तुं विधातुं इच्छामि वाञ्छामि तावन्मे दृष्टिर्ममनेत्रं उपचितैः स्थूलैर(र)-श्रुभिर्मुहुर्वारंवारं आलुप्यते आच्छाद्यते। किं कृत्वा ? प्रणयकुपितां स्नेहकलहरुष्टां त्वां भवति-(तीं) शिलायां धातुरागैर्गैरिकादिभिरालिख्य स्थाप्य । असौ कृतान्तो दुष्टविधिर्वा स्त(त)[701]-स्मिन् चित्रमार्गेऽपि नौ आवयोः सङ्गमं मेलापकं न सहते, न क्षमति(ते)[702] ॥११२॥

**मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-**
**र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु ।**
**पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां**
**मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥११३॥**

हे गुणवति ! खलु निश्चितम् । बहुशोऽनेकवारम् ।[703]स्थलीदेवतानां[704] तरुकिसलयेषु मुक्तास्थूला अश्रुलेशा अश्रुकणा न(न) न पतन्त्यपि तु पतन्त्येव । किं कुर्वन्तीनाम् ? पश्यन्तीनां अवलोकयन्तीनाम् । कीदृशं मां ? तव निर्दयाश्लेषहेतोर्गाढालिङ्गनाय{:} । आकाशे शून्ये प्रणिहितभुजं प्रसारितभुजम् । कीदृशायास्ते स्वप्नसंदर्शनेषु कथमपि महता कष्टेन लब्धायाः प्राप्तायाः ॥११३॥

भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥११४॥

हे गुणवति ! ते प्रसिद्धास्तुषाराद्रिवाता हिमाचलपवना इति हेतोर्मया आलिङ्ग्यन्ते आश्लिष्यन्ते इति किं यदि चेत् । किलेति सत्ये । एभिः वातैः सहवासात् पूर्वं प्रथमं तवाङ्गं त्वदीयं शरीरं स्पृश(ष्ट,)[705] स्पर्शितं भवेत् । ते के ये वाता दक्षिणेन प्रवृत्ताः । अस्यां मामकीनायां दिशि वातुं प्रसु(स्तु)ताः । किं कृत्वा ? सद्यस्तत्कालं देवदारुद्रुमाणां चीडवृक्षाणाम् । किश–(स)लयपुटान् भित्त्वा विकाश(स)यित्वा । कीदृशा वाताः ? तत् क्षीर श्रु (स्रु)तिसुरभयः । तत् क्षीरश्रु(स्रु)त्या सुरभयः सुगन्धास्तत्क्षी{र}[रस्रुतिसुरभयः] ॥११४॥

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥११५॥

हे चटुलनेत्र ![706] हे चञ्चलनयने ! दीर्घयामा दीर्घप्रहरा त्रियामा निशा क्षणमिव निमेष इव कथं [के]नोपायेन[707] संक्षिप्यन्ते गच्छेयुः । अन्यच्च सर्वावस्थासु सर्वदशासु ग्रीष्ममध्याह्नादिषु कालेषु अहरपि दे(दि)वसोऽपि मन्दमन्दातपं अतिकोमलं कथं स्याद्भवेत् । हे[708] चञ्चलनयने, इत्थं पूर्वोक्तप्रकारेण मे मम चेतश्चित्तं त्वद्वियोगव्यथाभिः त्वद्वियोगवेदनाभिः दुर्लभप्रार्थनं कृतम् । दुर्लभाः दुष्प्राप्याः प्रार्थना यस्य तत् । किं लक्षणाभिः ? त्वद्वियोग–व्यथाभिः गाढोष्माभिः[709] [तीव्रसंतापाभिः] । किं लक्षणं चेतः ? अशरणं[710]शरणवर्जितम् । स्वकीयां दशामुक्त्वाऽधुना कर्तव्यतां प्राह ॥११५॥

इत्यात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि सुतरां मा गमः कातरत्वम् ।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥११६॥

हे कल्याणि ! इति पूर्वोक्तप्रकारेण आत्मानं स्वं बहुविगणयन् अत्यर्थं विचारयन् । आत्मनैवात्मानं अवलम्बे, धीरत्वेन धारयामि । तत् तस्मात्कारणात् हे कल्याणि ! त्वमपि सुतरामत्यर्थं कातरत्वं अधीरत्वं मा गम. मा यासीः । युक्तो[ऽ]यमर्थः । कस्य जीवस्य अत्यन्तमत्यर्थम्[711]स(सु)खं सौख्यम् । उपनतं घटितं वा अथवा कस्य मनुष्यस्य[712] एकान्ततः सर्वप्रकारेण दुःखं कष्टं उपनतं जातम् ।[713]शुभाद्यशुभा दशा चक्रनेमिक्रमेण रथाङ्गधारावत् कदाचिन्नीचैर्गच्छति कदाचिदुपरि गच्छति । रथाङ्गधारापि भ्रमन्ती क्रमेणा{ऽ}ध उपरि याति ॥११६॥

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान्मासान्गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥११७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हे जीमूत ! पुनर्मद्वचनात्तामिति ब्रूयाः । हे प्रिये ! मे मम शापान्तो भविता भविष्यति । वर्षस्य परिपूर्णत्वात् । [714]आषाढशुक्लैकादशीदिनमारभ्य मासानां चतुष्टयं गमय । यथा कथंचिदतिवाहय । ततः पश्चात्संयोगादनन्तरं आवाभ्यां विरहगुणितं विरहावस्थायां गुणनिकायो(यै)[715] संकलितं तं, तं वचनातीतं, आत्माभिलाषं आत्मनो वाञ्छितं, क्षि(क्ष)पासु रात्रिषु निर्वेक्ष्याव. । निर्वाहिषु उपभोक्ष्यावहे । किं लक्षा(क्ष्या)सु[716] क्षि(क्ष)पासु ? परिणतशरच्चन्द्रिकासु । परिणता परिपक्वा शरच्चन्द्रिका शरत्कालचन्द्रजो(ज्यो)त्स्ना यासु तास्तासु ॥११७॥

अधुना गुह्यकः स्वकीयं प्रकटमपि(भि)[717] ज्ञानमाह—

**भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे**
**निद्रां गत्वा किमपि रुदती सस्वनं विप्रबुद्धा ।**
**सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे**
**दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति ॥११८॥**

हे पतिव्रते ! असौ[718] तव भर्ता एतदुक्ता(क्त्वा) भूयः पुनरपि त्वामित्याह । हे प्रिये ! अहं शयने ज(त)ल्पे त्वामालिङ्गय सुप्तः । ततस्त्वं मे मम कण्ठलग्ना पुरा पूर्वं निद्रां गत्वा पश्चात् किमपि स्वल्पमात्रं सस्वरं सशब्दं रुदन्ती सती विप्रबुद्धा विनिद्रा जाता । ततो असकृद्वारंवारं रोदनं(न)हेतु(तुं) मे पृच्छत त्वया सान्तर्हासं गूढं हसित्वा चेति उक्तं इति । किम् ? हे कितव, धूर्त, स्वप्ने कामपि वनिता(तां)[719] नारी(रीं) रमयत्(न्) भुञ्जन्मया त्वं दृष्टः । तत ईर्ष्यावशादहं रुदनं कुर्वे ॥११८॥

**एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा**
**मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।**
**स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-**
**दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥११९॥**

हे असितनयने ! नीलोत्पलनेत्रे, मयि भर्तरि विषये कौलीनात् लोकप्रवादात् अविश्वासिनी निष्प्रत्यया मा भूः । किं कृत्वा ? एतस्मात् पूर्वोक्तात् अभिज्ञानदानात् मां कुशलिनं समाधियुक्तं विदित्वा ज्ञात्वा । तदेव कौलीनमाह । जनाः किमपि कुतोऽपि कारणेन, विरहे वियोगे स्नेहा(न्) ध्वंसिनस्त्वनुभव(वं)तः आह कथयन्ति स्म । यतः स्नेहः प्रवासाश्रयान्नस्य(श्य)ति । अयुक्तमेतत् । ही(हि) यस्मात्कारणात् ते स्नेहाः अभोगादनुपभोगात् इष्टे वस्तुनि वाञ्छितेऽर्थे उपचितरसासन्तः प्रेमराशीभवन्ति प्रीतिमया(या)[720] सञ्जायन्ते ॥११९॥

**कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे**
**प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।**
**निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः**
**प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥१२०॥**

हे सौम्याभीष्टदर्शन ! कच्चिदभीष्टवरप्रश्ने मे मम इदं एतत् बन्धुकृत्या(त्यं) त्वया व्यवस्थासि(सि)[721]तमा(ना)नीतम् अभिन्नेऽर्थे भवता[722] भवितव्यम् । खलु निश्चितम् । भवतस्तव धीरतां धीरत्वं प्रत्याख्यातुं वक्तुं न रक(क)ल्पयामि न शक्नोमि, त्वं याचितः सन् निःशब्दोऽपि चातकेभ्यो बप्पीहकेभ्यो जलं प्रदित्स(श्य)सि यच्छसि । युक्तो[ऽ]यमर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदि यस्मात्कारणात् सतां गरिष्ठानां प्रणयेषु स्नेहलेषु इप्सितार्थक्रियैव प्रत्युक्तं प्रतिवचनम् । इप्सिता वाञ्छिता याऽर्थक्रिया सैव । महान्तो हि कर्तव्येनैव कार्यं ज्ञापयन्ति न तु वचसा ॥१२०॥

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥१२१॥[723]

हे जलद ! मे तां मत्प्रियां ते तव सखीं एवं अमुना प्रकारेण तद्वचोभिराश्वास्य तस्याः वचः तद्वचः तैः तद्वचोभिः तत्सन्देशेन ममापि जीवितं धारयेथाः । कथंभूतः त्वं ? शैलादाशु शीघ्रं निवृत्तः सन् । कथंभूतां ते तव तां सखीं ? प्रथमविरहादुर्ग(ग्र)शोकाम् । कथंभूतात् शैलात् ? त्रिनयनवृषोत्खा-तां(त)कूटात् । क्षोदितशिखरात् । कथंभूतैः तद्वचोभिः ? साभिज्ञानप्रहितकुशलैः, प्रस्थापित-कुशलैः । कथंभूतं जीवितम् ? प्रातः प्रभातकाले कुन्दप्रसवशिथिलम् । कुन्दवृक्षयः(क्षस्य) पुष्पवत् शिथिलम् ॥१२१॥

एतत्कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे
सौहार्दाद् वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान्देशाञ्जलद विचर प्रावृषा संभृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥१२२॥

हे जलद ! सौहार्दाद्वा मित्रत्वात् वा अथवा अयं विधुरो विरहपीडित इति हेतोर्मयि विषये अमु(नु)को(क्रो)[724] शबुद्ध्या(ध्या)[725] उपकारधिया मे मम एतत्पूर्वोक्तं सन्देश-प्रापणं प्रियं कृत्वा विधाय इष्टान्नसिमवान् ( इष्टान् देशान् ) विषयान् देशान् विचर गच्छ । कीदृशस्त्वं ? प्रावृषा वर्षाकालेन सम्भृतः(त)श्रीः प्राद्रुद(डु)पार्जितशरीरोन्नतिः[726] । हे जलद ! पुनस्तव भवतो मे मम विद्युत्तडित्प्रियया स्नेह (?) क्षणमपि विप्रयोगः वियोगो मा भूयात् । कीदृशस्य मे ? अनुचितप्रार्थनावर्त्म(र्ति)नः । अनुचिताऽयोग्या या प्रार्थना याञ्चा तया । वाक्यैः ममापि कुन्दप्रसवशिथिलं कुन्दकुश(सु)मा(म)[शिथिलम्] [727] प्रस्थापित-कुशलैः दृष्टं[728] जीवितं धारयेथाः । किं कृत्वा ? मम एनां[729] सखीं भार्यामाश्वास्य धारयित्वा । कीदृशीं एनां ? प्रथमविरहोदग्रशोकां प्रथमविरहे उदग्र उत्कटः शोका(कः) यस्या सा ताम् । कीदृशस्त्वम् ? आत्मत्वेलात्( अस्माच्छैलात् )[730] आ(अ)[731]मुष्मानु(न्न)गात् निवृत्तो व्याघुटितः । कीदृशात् शैलात् ? त्रिनयनवृषोत्खातकूटात् । त्रिनयनवृषेण[732] उत्खातं कूटं यस्य स तस्मात् । कीदृशैस्तद्वचोभिः साभिज्ञानप्रहितः(त)कुशलैः । साभिज्ञानेन प्रहितानि मह्यं प्रेषितानि कुशलानि येषु तानि तेषु ॥१२२॥

तं सन्देशं जलधरवरो दिव्यवाचाऽऽचचक्षे
प्राणास्तस्या जनहितरतो रक्षितुं यक्षवध्वाः ।
यक्षेणैव प्रकटितपथो मूलतोऽनुक्रमेण
गत्वा दृष्ट्वा धनपतिपुरीं तां च वातायनस्थाम् ॥१२३॥

Jain Education International  For Personal & Private Use Only  www.jainelibrary.org

हे जलधर ! वरो मेघः धनपतिपुरीं गत्वा च पुनः स्तां(तां)[733] यक्म(क्ष)पत्नीं वातायनस्थां गवाक्षनिविष्टां दृष्ट्वाऽवलोक्य । तं यक्षकथितं सन्देशं दिव्यवाचा देववाण्या कृत्वा तां प्रत्याचक्षेऽभाणीत्[734] । किमर्थं, तस्याः यक्षवध्वा प्राणान् रक्षित(तुम्) {शत्रुम्}। कीदृशो जलधरः ? जनहितरतः जनहिते रतः, पुनः कीदृशः ? यक्षेणैव अनुक्रमेण परिपाट्या मूलतः आदितः प्रकटितः(त)पथः[735] दर्शितमार्गः (र्गः) ॥१२३॥

श्रुत्वा वार्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः ।
संयोज्यैतौ विगलितशुचौ दंपती हृष्टचित्तौ
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ॥१२४॥

धनेशो[ऽ]पि धनं(न)शो[ऽ]पि[736] जलदकथितां तां वार्तां सन्देशलक्षणां श्रुत्वा व्या(चा)कर्ण्य[737] तौ दम्पती स्त्रीपुरुषौ अविरतसुखमविच्छिन्नसौख्यम् । यथा भवत्येवं, शास्व(श्व)न्निरन्तरम्[738] । इष्टान् मनस्यभिलषितान् भोगान् भोजयामास, भोजयि(य)ति[739] स्म । किं कृत्वा ? सदयमार्द्रं हृदयं यस्य सः । सदयहृदयः सन् । सद्यः शीघ्रम् । श्या-(शा)पस्यान्तं संविधाय शापस्यापक्रान्तं[740] कृत्वा । पुनः किं कृत्वा ? अस्तकोपो निर्गतक्रोधः सन् । एतौ संयोज्य मेलि(ल)यित्वा[741] । कीदृशौ तौ ? विगलितशुचौ विगलिता शुक् शोको ययोस्तौ । पुनः कीदृशौ तौ ? हृष्टचित्तौ निःशोकत्वादानन्दितमनसौ ॥१२४॥

तस्माद्द्रेर्निगदितमथो शीघ्रमेत्यालकायां
यक्षागारं विगलितनिभं दृष्टचिह्नैर्विदित्वा ।
यत्संदिष्टं प्रणयमधुरं गुह्यकेन प्रयत्ना-
त्तद्गेहिन्या सकलमवदत्कामरूपी पयोदः ॥१२५॥

तेन गुह्यकेन प्रणयेन स्नेहेन, मधुरं मनोहरं प्रणयमधुरं यत्संदिष्टं कथितम् । तत्सकलं सम्पूर्णम् । पयोदो मेघः । तद्गेहिन्याः पुरतो, प्रयत्नात् यत्नेन अवदत् बभाषे । किं कृत्वा ? शीघ्रं सत्वरं, अलक(का)[742]यामेत्यागत्य । पुनः किं कृत्वा ? दृष्टचिह्नैः कथितलक्षणैः । यक्षागारं गुह्यकगृहं विदित्वा ज्ञात्वा । कीदृशं यक्षागारं ? विगलितशुचं[743] गतशोकम् । कीदृशः पयोदः ? तस्मात् रामगिरेरद्रेः तेन यक्षेन निगदितपथः निगदितो दर्शितः पन्थाः मार्ग्रो(र्गो) यस्य स निगदितपथः । पुनः कीदृशः पयोदः ? कामरूपी काममभिलषितं रूपं यस्य स कामरूपी ॥१२५॥

वेदचन्द्रशरभूप्रमितेऽब्दे, कार्त्ति(र्ति)के धवलकामदामरे ।
श्रीमहिमनगरे सुनागरे पञ्जिका विरचितोचिता मिता ॥१॥
साहय्या विद्येराजकमलस्य महावासौ (मयाह्वासौ) लिलिखे
प्रथमा {नि}वृत्तिर्येन हर्षप्रकर्षतः ॥२।

इति श्री बृहद्गच्छीय श्रीरत्नप्रभसूरिशिष्य वाचक श्री लक्ष्मीनिवास विरचिता मेघदूत काव्यस्य शिष्यहितैषिणी नाम्नी टीका सम्पूर्णेति ।

इति श्री मेघदूतमहाकाव्यवृत्तिः सम्पूर्णा जाता . पं.हितकुशलोऽलिखी(ख)त् श्रीजीर्णदूर्ग्रे(र्गे), ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गवाकृतीन् सुतान् गावो जनयन्त्यखिलाः परम् ।
पुङ्गवं कापि धौरेयं शृङ्गोल्लिखितभूतलम् ॥८९॥

जननी जनयेत् पुत्रमेकमेव हि वीरसूः ।
शूरं परःशता नार्यः शतसंख्यान् सुतानपि ॥९०॥

उक्तं च–

आहवेषु च ये शूराः स्वाम्यर्थत्यक्तजीविताः ।
भृत्यभक्ताः कृतज्ञाश्च ते नराः स्वर्गगामिनः ॥९१॥

यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः ।
अक्षयाँल्लभते लोकान् यदि क्लैब्यं न गच्छति ॥९२॥

अपि च–

सत्यधर्मव्यपेतेन न संदध्यात् कदाचन ।
संसन्धितोऽप्यसाधुत्वादचिरादेति विक्रियाम् ॥९३॥

प्रणामादुपहाराद्वा यो विश्वसिति शत्रुषु ।
स सुप्त इव वृक्षाग्रे पतितः प्रतिबुध्यते ॥९४॥

आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती ।
तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते ॥९५॥

---

(८९) सभी गायें अपनी आकृति के समान ही पुत्रों को उत्पन्न करती हैं, लेकिन कोई विरला गाय ह सींगों से पृथ्वी को उचाटने वाले अग्रगण्य श्रेष्ठ बलीवर्द को उत्पन्न करती है। (९०) वीर को पैदा करने वाली माता एक ही शूरवीर पुत्र को पैदा करती है लेकिन् सैकड़ों नारियाँ (साधारण नारियाँ) सैकड़ों (सामान्य) पुत्रों को भी पैदा करती हैं। (९१) कहा भी है–युद्ध में जो वीर अपने स्वामी के लिए प्राण त्याग देते हैं वे ही भक्तसेवक कृतज्ञ हैं और वे ही स्वर्गगामी होते हैं। (९२) जहाँ जहाँ युद्धस्थल में शत्रुओं से घिरा हुआ जो शूरवीर मारा जाता है, वह यदि अधीर (कायर) न हो तो अक्षयलोक में जाता है। (९३) और भी—सत्य और धर्म से रहित राजा (अथवा पुरुष) के साथ कभी भी संधि नहीं करनी चाहिए। अच्छी तरह से संधि किया हुआ भी वह दुष्टता के कारण पुनः विकार (क्रोध-द्वेष) को प्राप्त होता है। (९४) जो राजा प्रणाम के कारण या उपहार के कारण शत्रुओं में विश्वास कर बैठता है वह वृक्ष के अग्रभाग पर सोये हुए की भाँति गिरता हुआ ही नजर आता है। (९५) स्वयं की उन्नति (व) शत्रुओं की हानि–ये दो ही नीति और इतनी ही नीति है। इनका स्वीकार करके ही कृतकृत्य हुए राजालोग अपनी नीतिकुशलता को फैलाते हैं।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैजात्यं सुरतेष्विव ॥९६॥

यावज्जीवितकालोऽस्ति यावद् भाग्यानुकूलता ।
तावत् प्रतापमुत्साहं न त्यजन्त्युदयार्थिनः ॥९७॥

बुद्धिं शक्तिं तथोपायं जयं च गुणसंयुतम् ।
तथा प्रकृतिभेदांश्च विज्ञाय ज्ञानवान् नृपः ॥९८॥

दुर्मदानां विपक्षाणां वधायोद्योगमाचरेत् ।
अलसो हि निरुद्योगो नरो बाध्येत शत्रुभिः ॥९९॥

स्वाभाविकी वैनयिकी द्विधा बुद्धिर्नृणां भवेत् ।
आद्या भाग्योदयोद्भूता गुरोर्विनयजाऽपरा ॥१००॥

मन्त्रोत्साहप्रभुत्वोत्थाः शक्तयस्तिस्र ईरिताः ।
मन्त्रशक्तिर्नृपाणां सा मन्त्रिणा मन्त्रयेद् रहः ॥१०१॥

मन्त्रः स स्यादषट्कर्णस्तृतीयादेरगोचरः ।
स च बुद्धिमता कार्यः स्त्रीधूर्तशिशुभिर्न च ॥१०२॥

उत्साहशक्तिर्यत्र स्यात् संग्रामादौ प्रगल्भता ।
ऊर्जस्वलत्वं शौर्यं च निर्भयत्वं पराभवे ॥१०३॥

(९६) अन्य समय पर क्षमा पुरुष का भूषण है जैसे अन्य समय पर लज्जा युवतीजन का भूषण है, (किन्तु) युद्ध में तो पुरुष का भूषण पराक्रम है जैसे सुरतक्रीड़ा में युवतीजन का भूषण धृष्टता है। (९७) जब तक यह जीवनकाल है और जब तक भाग्य की अनुकूलता है तब तक उन्नति की इच्छा रखने वाले राजालोग अपने प्रताप व उत्साह को नहीं छोड़ते हैं। (९८–९९) यथासंभव बुद्धि, शक्ति, उपाय, गुण, जय तथा प्रकृतिभेद को समझकर ज्ञानवान् राजा दुरभिमानी शत्रुओं के वध के लिए इन्हें व्यवहार में लायें। आलसी एवं निरुद्यमी व्यक्ति शत्रुओं द्वारा पीड़ित हो जाता है। (१००) मनुष्यों की बुद्धि दो प्रकार की होती है–स्वाभाविकी एवं वैनयिकी पहली भाग्योदय से उत्पन्न होती है और दूसरी गुरु के विनय से उत्पन्न होती है। (१०१) राजनीति में प्रभुत्व उत्साह व मन्त्र से जन्य तीन शक्तियाँ कही गई हैं। राजाओं की मन्त्रशक्ति एकान्त में मन्त्रिगण के साथ मन्त्रणा की जाय, यही है। (१०२) तृतीय आदि व्यक्ति को अगोचर और छः कानों का जिसमें प्रयोग न हुआ हो वैसी मन्त्रणा बुद्धिमान करें (किन्तु) स्त्री, धूर्त व बालक के साथ (वैसी मन्त्रणा) न करें। (१०३) संग्राम आदि में जहाँ प्रगल्भता, बलवत्ता, शौर्य और पराभव होने पर भी निर्भयता रहती है, वह उत्साहशक्ति है।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रभुत्वशक्तिर्यत्र स्यादाधिक्यं दण्ड-कोशयोः ।
दण्ड्यानां दण्डतः कोशवृद्धिर्नीतिश्च जायते ॥१०४॥

स राजा यस्य कोशः स्याद् विना कोशं न राजता ।
नरस्य न नरो भृत्यः किन्तु कोशस्य भूपतेः ॥१०५॥

साम-दाने भेद-दण्डावित्युपायचतुष्टयी ।
तत्र साम प्रियैर्वाक्यैः सान्त्वनं कार्यकृन्मतम् ॥१०६॥

गजाश्वपुररत्नादिदानैः शत्रोर्विभज्य च ।
दायादमन्त्रिसुभटान् द्विषं हन्यादुपायवित् ॥१०७॥

उक्तं च–

लब्धस्य हि न युध्यन्ते दानभिन्नानुजीविनः ।
लब्धोऽनुजीविभिरेव दानभिन्नैर्विभज्यते ॥१०८॥

भेदः स्यादुपजापो यद् बन्धूनां शत्रुसङ्गिनाम् ।
विभिन्नानां वशीकारात् क्रियते शत्रुनिग्रहः ॥१०९॥

यद् उक्तम्–

दायादादपरो मन्त्रो न ह्यस्त्य कर्षणे द्विषाम् ।
तत्र उत्थापयेद् यत्नाद् दायादं तस्य विद्विषः ॥११०॥

---

(१०४) जहाँ दण्ड (शिक्षा) और कोष का आधिक्य हो वह प्रभुत्वशक्ति है। शिक्षापात्र को शिक्षा देने से कोश की वृद्धि होती है और नीति का आविष्कार होता है। (१०५) जिसका कोष सम्पन्न है वही राजा है, बिना कोष के कोई राजत्व नहीं। मनुष्य मनुष्य का सेवक नहीं अपितु मनुष्य भूपति के कोष का सेवक होता है। (१०६) राजनीति में साम दान, दण्ड, भेद–ये उपायचतुष्टय ही प्रमुख हैं। प्रिय वाक्यों से सान्त्वना देना ही, जो कार्य साधक होता है, साम माना गया है। (१०७) हाथो, घोडे, नगर (गाँव), रत्न आदि दान देकर शत्रु के दायाद को (युवराज, राजवंशी या राज्य के वारस को), मन्त्रियों को एवं सुभटों को फोडकर शत्रुओं का नाश करें। (१०८) कहा भी है –– दान द्वारा फोडे हुए सेवक जिस (राजा) के पास से लाभ प्राप्त करते हैं उसके साथ लड़ते नहीं हैं (अपितु) वे फोड़े हुए सेवक उस (राजा) को विशेषतः भजते हैं। (१०९) शत्रु के सहायक बन्धुओं को विप्लव के लिए गुप्तरीति से प्रोत्साहित करना–यह भेद है। शत्रु से जो नाराज हो उन सबको अपने वश में कर लेने से शत्रु को दबाया जाता है। (११०) क्यों कि कहा गया है – शत्रुओं को आकृष्ट करने में दायाद (युवराज, राजवंशी या राज्य के वारस) से अन्य कोई मन्त्र नहीं है। अतः उस शत्रु के दायाद को प्रयत्नपूर्वक उठाना (अपनी ओर मिलाना) चाहिए।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सन्धाय युवराजेन यदि वा मुख्यमन्त्रिणा ।
अन्तःप्रकोपनं कार्यमभियोक्तुः स्थिरात्मनः ॥१११॥
अन्नमोषै रिपोर्देशावस्कन्दप्लोषसूदनैः ।
स्वसैन्यस्यावमर्देन दण्डः स्यादरिनिग्रहे ॥११२॥
तदुक्तम्—
नाशयेत् कर्षयेच्छत्रून् दुर्गाकण्टकमर्दनैः ।
परदेशप्रदेशे च कुर्यादाटविकान् पुरान् ॥११३॥
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् ।
भिन्द्याच्चैव तडागानि प्राकारान् परिखां तथा ॥११४॥
स्यादिन्द्रियाणामर्थेषु यदि धर्माऽविरोधिनो ।
प्रवृत्तिरन्तरङ्गारिनिग्रहस्तं जयं विदुः ॥११५॥
यदुक्तम्—
कामः क्रोधस्तथा मोहो हर्षो मानो मदस्तथा ।
षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्ते जयी नरः ॥११६॥
सन्धिश्च विग्रहो यानमासनं द्वैधमाश्रयः ।
षड्गुणा भूभुजामेते जयश्रीप्रणयावहाः ॥११७॥
घोरे प्रवृत्ते समरे नृपयोर्हतसैन्ययोः ।
मैत्रीभावस्तु सन्धिः स्यात् सावधिश्च गतावधिः ॥११८॥

---

(१११) युवराज या मुख्यमन्त्री के साथ सन्धि करके स्थिरबुद्धिवाले शत्रु के अन्दर प्रकोप पैदा करना चाहिए। (११२) अपने सैन्य द्वारा शत्रु के अन्न की चोरी तथा शत्रु के प्रदेश में हल्ला (शोर), आग और नाश करवा कर (शत्रु को) कुचलना-यह शत्रु को दबाने के लिए दण्डनीति है। (११३) कहा भी है —जहाँ तक एक भी शत्रु रहे वहाँ तक दुर्गों का नाश करके शत्रुओं का विनाश करना चाहिए, पतन करना चाहिए, और दुश्मन के प्रदेश में, जङ्गलों में नगरों की (छावनियों का) रचना करनी चाहिए। (११४) शत्रु के घास, अनाज के भण्डार, जल व इन्धन को सदैव दूषित करें, तथा तालाब, परकोटे तथा नगर की खाइयों को भी तोड़फोड दे। (११५) यदि इन्द्रियों की अपने विषयों में धर्माविरोधी प्रवृत्ति होती है तब अन्तरङ्ग शत्रुओं का जो निग्रह होता है उसे विद्वान् लोग जय कहते हैं। (११६) कहा भी है :- काम, क्रोध, मोह, हर्ष, अभिमान व मद इस षट् वर्ग (ये छः अन्तःशत्रु है) को छोड दे। इनके छोड़ने पर पुरुष (यहाँ-राजा) विजयी होता है। (११७) विजयलक्ष्मी के प्रति प्रेम बढ़ाने वाले राजाओं के ये छः गुण हैं—सन्धि, विग्रह, यान (प्रस्थान), आसन, द्वैधीभाव और आश्रय (११८) भयंकर युद्ध के शुरू हो जाने पर मरी हुई सेना वाले दोनों राजाओं का मैत्रीभाव सन्धि है। यह सन्धि अवधिवाली या अवधिरहित होती है।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्योन्यं विजिगीषुभिः विग्रहः क्रियते भटैः ।
परस्परोपघातेन गजाश्वरथपत्तिभिः ॥११९॥
स विग्रहो भवेन्नेतुर्यानं स्याद्यदरीन् प्रति ।
स्वसैन्येनैव तद्यानं प्राहुर्नीतिविशारदाः ॥१२०॥
स्ववृद्धौ शत्रुहानौ वा तुष्णींभावस्तदासनम् ।
अनन्यशरणस्यारेः संश्रयं त्वाश्रयं विदुः ॥१२१॥
सन्धिविग्रहयोर्वृत्तिर्द्वैधीभावः प्रति द्विषम् ।
स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलान्यपि ॥१२२॥
सप्तप्रकृतयश्चैता राज्याङ्गानि प्रचक्षते ।
राज्यस्थितेरिति प्रोक्ता भूभुजां वृद्धिहेतवः ॥१२३॥
तेषु प्रधाना शक्तिः स्यादुपायबलवत्तरा ।
लभ्यतेऽम्भो हि खननान्मथनादनलो भुवि ॥१२४॥
निरुद्योगमनुत्साहमप्रज्ञमविमर्शिनम् ।
अनुपायविदं भीरुं त्यजन्ति पुरुषं श्रियः ॥१२५॥
निरुद्योगं नरपतिं मत्वा सामन्तसैनिकाः ।
महामात्राश्च पुत्राश्च तेऽपि तं जहति क्षणात् ॥१२६॥

---

(११९-१२०) एक दूसरे को जीतने की इच्छा रखनेवाले दो राजा हाथी, अश्व, रथ व पैदल सेनाओं वाले वीरपुरुषों द्वारा पारस्परिक हनन से विग्रह करते हैं। राजा का यह विग्रहगुण है। अपनी सेना के साथ ही दुश्मनों के प्रति जो प्रस्थान किया जाता है उसको नीतिविशारदों ने यानगुण कहा है। (१२१) अपनी उन्नति व शत्रुहानि में चुप रहना ही आसन नामक राजनीति का चतुर्थ गुण है। अनन्यशरण वाले अर्थात् जिनका अन्य कोई रक्षक नहीं है ऐसे शत्रु को आसरा देना ही आश्रय कहलाता है। (१२२-१२३) शत्रु के प्रति सन्धि-विग्रह की वृत्ति (एक ओर सन्धि और दूसरी ओर लड़ाई की तैयारियाँ) द्वैधीभाव है। राजा, मन्त्रि, मित्र, कोश, राष्ट्र, दुर्ग व सेना ये सात प्रकृतियाँ राज्य के अंग कहलाती हैं। ये प्रकृतियाँ ही राज्य की स्थिरता के लिए हैं इसी कारण उन्हें राजाओं के उन्नति के हेतु कहा गया है। (१२४) उनमें (अर्थात् बुद्धि, शक्ति, उपाय, गुण, जय और प्रकृति में) शक्ति प्रधान है। वह उपायों से बलवती होती है। जगत् में खोदने से जल तथा मन्थन करने से अग्नि प्राप्त की जाती है। (१२५) उद्यमहीन, उत्साहरहित, अविचारशील व उपाय को नहीं जानने वाले डरपोक पुरुष को राज्यश्री छोड़ देती है। (१२६) योद्धा सैनिक भी निरुद्योगी समझकर छोड़ देते हैं, तथा महामात्र और पुत्र भी ऐसे राजा को तत्क्षण छोड़ देते हैं।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्येवं धीसखस्यास्य श्रुत्वा कालोचितं वचः ।
ऊरीकृत्य तदाख्यातं युद्धे सज्जोऽभवन्नृपः ॥१२७॥

दूतोऽहं प्रेषितः स्वामिन्नाह्वातुं त्वां यथौचिती ।
स्यात् तथा क्रियतां शीघ्रकृत्ये खल्वविलम्ब्य यत् ॥१२८॥

इति दूतोदितं श्रुत्वाऽश्वसेनः सह सैनिकैः ।
प्रस्थानं कर्तुमारेभे तावत् पार्श्व इदं जगौ ॥१२९॥

सुते सति मयि स्वामिन्न प्रस्थानं तवोचितम्।
रवेर्बालातपेनापि तमः किं न विहन्यते ? ॥१३०॥

इत्युक्त्वा संननाहोच्चैः श्रीपार्श्वः सबलः स्वयम् ।
सैनिकैर्भूरिभिर्युक्तश्चक्रे प्रस्थानमङ्गलम् ॥१३१॥

तावच्च कालयमनः सर्वौघेणाभ्यषेणयत् ।
प्रसेनजिच्चाभ्यमित्रं सहसैन्यस्तदाऽचलत् ॥१३२॥

द्वावेव ध्वजिनीं स्वां स्वां विभज्यातिमदोद्धुरौ ।
रणभूमिमधिष्ठाय तस्थतुर्विग्रहार्थिनौ ॥१३३॥

रणतूर्यमहाध्वानः सेनयोरुभयोरभूत् ।
सुभटानां युयुत्सूनां वर्धयन् मृधसाहसम् ॥१३४॥

---

(१२७) इस प्रकार बुद्धि ही जिसका मित्र है ऐसे उस वृद्धसचिव के समयोचित वचनों को सुनकर राजा (प्रसेनजित्) उसकी बात स्वीकार कर युद्ध के लिए सज्जित हुए। (१२८) हे स्वामिन् ! मैं दूत रूप में आप को बुलाने के लिए आया हूँ । आप उचित शीघ्रता करिये जिससे कार्य में विलम्ब न हो। (१२९-१३०) दूत की बात सुनकर महाराजा अश्वसेन सैनिकों के साथ ज्योंहि प्रस्थान करने लगे तब ही पार्श्व कुमार ने यह कहा--हे स्वामिन् !, मुझ पुत्र के होते हुए आपका युद्धस्थल में प्रस्थान करना उचित नहीं है । सूर्य के बाल आतप (प्रातःकाल के, उदय होते सूर्य) द्वारा क्या अन्धकार नष्ट नहीं किया जाता ? (१३१) इस प्रकार उच्च स्वर से कहकर उस बलवान पार्श्वकुमार ने असंख्य सैनिकों के साथ युद्ध के लिए मंगल प्रस्थान किया । (१३२) उधर कालयमन ने भी समस्त समुदाय के साथ प्रस्थान किया तथा महाराजा प्रसेनजित् भ सेना सहित शत्रु के प्रति रवाना हुए । (१३३) दोनों मदोद्धत राजाओं ने अपनी अपनी सेनाओं को विभक्त कर, रणभूमि में पहुँचकर युद्ध की इच्छा से अपनी स्थिति जमा दी । (१३४) दोनों सेनाओं में युयुत्सु सुभटों के युद्ध-साहस को बढ़ाती रणभेरियों की महान ध्वनि हुई ।

Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

गजानां बृंहितैस्तत्र हयहेषारवैर्भृशम् ।
रणातोद्यारवैः शब्दाडम्बरो व्यानशेऽम्बरम् ॥१३५॥

निर्ययुः कृतसंरम्भाः सुभटा ये रणोद्भटाः ।
धन्विनः कृतहुङ्कारा: सेनयोरुभयोरपि ॥१३६॥

अथ वानायुजाः पारसीक-काम्बोज–बाल्हिकाः ।
हयाः प्रचेलुश्चपला रणाब्धेरिव वीचयः ॥१३७॥

विलङ्घयिषवः स्वीयैर्गतैरिव नभोऽङ्गणम् ।
अपावृत्तादिभिर्हेषाघोषा वाहा विरेजिरे ॥१३८॥

चक्रेणैकेन चक्री चेद्वयं चक्रद्वयीभृतः ।
वदन्त इति चीत्कारै रथा जेतुमिवाभ्ययुः ॥१३९॥

विपक्षेभमदामोदमाघ्राय प्रतियोद्धुराः ।
सिन्धुरा निर्ययुर्योद्धुं जङ्गमा इव भूधराः ॥१४०॥

धानुष्का रणनाट्यस्योपक्रमे सूत्रधारवत् ।
निनदत्तूर्यनिःस्वानं रणरङ्गमवीविशन् ॥१४१॥

रणरङ्गमनुप्राप्य धन्विभिः शितसायकाः ।
बभुः प्रथमनिर्मुक्ताः कुसुमप्रकरा इव ॥१४२॥

---

(१३५) वहाँ हाथियों की चिंघाड और अश्वों की अतीव हिनहिनाहट से तथा युद्ध के आतोद्य आदि बाजों की ध्वनि के आडम्बर से अम्बर व्याप्त हो गया। (१३६) युद्ध में कुशल, आवेशवाले, धनुर्धारी, हुंकार करते वे वीर दोनों सेनाओं से निकल पड़े। (१३७) वहाँ युद्ध रूपी समुद्र की उत्ताल तरंगों की भाँति वानायुज, पारसीक, काम्बोज व बाल्हीक चञ्चल घोड़े चलने लगे। (१३८) अपनी चाल से मानों आकाशमण्डल को भी लाँघने की इच्छा वाले वे हेषारव करते घोड़े अपनी उलट पुलट (उलटी-सीधी) चाल से सुशोभित हो रहे थे। (१३९) तुम एक चक्र से चक्री हो तो हम दो चक्रों को धारण करने वाले हैं-- इस प्रकार जोर से चिरकार करते हुए रथ (दुश्मन को) जीतने के लिए आगे बढ़ने लगे। (१४०) शत्रु के हाथियों के मद की गंध को सूँघकर प्रतिस्पर्धी हाथी युद्ध करने के लिए गतिमान पर्वत की भाँति निकल पड़े। (१४१) रणस्थलरूप नाट्य के आरम्भ में सूत्रधार की भाँति इस राजा के धनुर्धारी योद्धा तुरही आदि की ध्वनि वाले रणाङ्गणरूप रंगमंडप में प्रविष्ट हो गये। (१४२) रणरूप रंगभवन में प्रवेश करके धनुर्धारियों द्वारा सर्वप्रथम छोड़े हुए तीक्ष्ण बाण (रंगभवन में सूत्राधार के द्वारा) सबसे पहले बरसाये गये (श्वेत) पुष्पों की भाँति शोभित हो रहे हैं।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लघुकृत्यकरा बाणाः प्रगुणा दूरदर्शिनः ।
क्षिप्रोड्डीनाः खगाः पेतुः खगास्तीक्ष्णानना इव ॥१४३॥

कश्चित् परेरितान् बाणान् अर्धचन्द्रनिभैः शरैः ।
चिच्छेद सम्मुखायातांल्लघुहस्तो धनुर्धरः ॥१४४॥

धन्विभिः कृतसन्धानाः शरासनमधिष्ठिताः ।
यानं प्राप्ताश्च मध्यस्था द्वैधीभावरताः शराः ॥१४५॥

विग्रहे निरताः शत्रुसंश्रया दूरदर्शिनः ।
षाड्गुण्यमिव नीतास्ते स्वक्रियासिद्धिमाप्नुवन् ॥युग्मम् ॥१४६॥

केषाञ्चिद् दृढमुष्टीनां बाणाः पारङ्गमा इव ।
लक्ष्यन्ते लक्ष्यमुद्भिद्य गजाश्वरथसैनिकम् ॥१४७॥

नाराचधारासम्पातैर्भिन्ना अपि महारथाः ।
तथाप्यभ्यरि धावन्तश्चिरं युयुधिरे भृशम् ॥१४८॥

कर्णलग्ना गुणयुताः सपत्नाः शीघ्रगामिनः ।
दूता इव शरा रेजुः कृतार्थाः परहृद्गताः ॥१४९॥

---

(१४३–१४४) शीघ्र कार्य करने वाले, दूर तक देखने वाले, ऋजु गति वाले, झड़प से उड़ने वाले, आकाश में गमन करने वाले और धारदार मुख वाले बाण शीघ्र कार्यकारी, दूरदर्शी, ऋजु गति वाले, झड़प से उड़ने वाले, आकाशगामी और तीक्ष्ण चोंच वाले पक्षियों की तरह गिरते थे। (१४५--१४६) धनुर्धारियों के द्वारा जिन्होंने (डोरी—ज्या के साथ) सन्धि की है; जिन्होंने अपने आसन (धनुष) पर स्थान जमाया है; जिन्होंने यान (गमन) प्राप्त किया है, जिन्होंने (रण के) मध्य में रहकर द्वैधीभाव प्राप्त किया है; जिन्होंने विग्रह में (शरीर) में प्रवेश किया है और जिन्होंने शत्रुओं का आश्रय लिया है ऐसे दूरदर्शी बाण मानों षड्गुणवाले बन कर अपनी कार्यसिद्धि को पूर्ण कर रहे थे। युग्मम्। (१४७) दृढ़ मुट्ठी वाले किन्हीं बहादुरों के बाण, गज, अश्व, रथ, सैनिक आदि लक्ष्य को बेध कर मानो पारगामी हों ऐसे दिखाई देते थे। (१४८) बाणों की मूसलाधार वर्षा से छिन्नभिन्न महारथी, दुश्मनों के सम्मुख दौड़ते हुए, खूब जोर से बहुत समय तक युद्ध करने लगे। (१४९) कर्णलग्न (कानों तक खींचे हुए), गुणयुक्त (ज्या से सम्बद्ध), सपत्न (एक साथ गिरने वाले), शीघ्रगामी, कृतार्थ और परहृदयगत (दुश्मन के हृदय में लगे हुए), बाण कर्णलग्न (कान में बात कहते हुए) गुणयुक्त, सपत्न, शीघ्रगामी, कृतार्थ और परहृद्गत दूतों जैसे शोभित थे।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्षोणीशस्य प्रसेनस्य च परदलनाभ्युद्यतस्यापि चापा-
निर्यातो बाणवारः समरभरमहाम्भोधिमन्थाचलस्य ।
नो मध्ये दृश्यते वा दिशि विदिशि न च क्वापि किन्तु व्रणाङ्कः
शत्रूणामेव हृत्सु स्फुटमचिरमसौ पापतिद्वेधी ॥१५०॥
अस्य क्षोणीशस्य खड्गः समन्ताद
द्वैधीभावं विद्विषामन्वयुङ्क्त ।
मत्वा सर्वमेकतः स्वार्थसिद्धि
हित्वेवान्यं षड्गुणत्वं सुतीक्ष्णः ॥१५१॥
मिथः प्रवृत्तं तुमुलमुभयोः सेनयोरथ ।
शराशरि महाभीमं शस्त्राशस्त्रि गदागदि ॥१५२॥
दृष्ट्वाशु कालयवनभटैः स्वं निर्जितं बलम् ।
प्रसेनजित् स्वयं योद्धुमारेभे प्रतिदारुणः ॥१५३॥
तस्य ज्वलन्तो निशिताः शरौघाः स्फूर्तिभीषणाः ।
मूर्धसु द्विषतां पेतुर्वज्रपातायिता भृशम् ॥१५४॥
स्फुरद्भिर्निशितैः प्रासैः सायकैर्वेगवत्तरैः ।
उल्काज्वालैरिवाकीर्णा दिशः प्रज्वलितान्तराः ॥१५५॥
अस्य निस्त्रिंशकालिन्दीवेणीमाप्य परासवः ।
निमज्ज्य विद्विषः प्रापुः स्वर्गस्त्रीसुरतोत्सवम् ॥१५६॥

(१५०) समराङ्गणरूप महासागर का मन्थन करने में पर्वतरूप और शत्रुओं को नष्ट करने के लिए उद्यत पृथ्वीपति महाराजा प्रसेनजित् के धनुष से निकले हुए बाण न मध्य में और न दिशा-विदिशा में दृष्टिगत होते थे किन्तु शत्रुओं के हृदयों में उनके (बाणों के) घाव स्पष्ट रूप से प्रकट होते थे। (१५१) इस राजा प्रसेनजित् का खड्ग स्वयं अपनी स्वार्थसिद्धि को ही समझकर षड्गुणत्व का मानों परित्याग करके शत्रुओं में विरोध उत्पन्न करता था। (१५२) दोनों सेनाओं का पारस्परिक भयंकर बाणों का बाणों से, शस्त्रों का शस्त्रों से, गदाओं का गदाओं से युद्ध शुरू होने लगा। (१५३) कालयवन के योद्धाओं के द्वारा स्वयं की विजित सेना को देखकर महाराजा प्रसेनजित् स्वयं युद्ध के लिए तैयार हो गये। (१५४) उस राजा प्रसेनजित् के ज्वलायमान, तीक्ष्ण, स्फूर्ति से भयंकर बाण शत्रुओं के मस्तकों पर वज्रपात के समान गिरने लगे। (१५५) चमकते तीक्ष्ण और वेगशील फेंके गये बाणों से दिशाएँ ऐसी चमक उठीं मानों उल्का की ज्वालाओं से व्याप्त हों। (१५६) इस राजा के खड्गरूप कालिन्दी वेणी (यमुनानदी का प्रवाह) को प्राप्त कर मृत्यु को प्राप्त हुए शत्रु स्वर्ग की स्त्रियों के साथ सुरतक्रीडा का उत्सव प्राप्त करने लगे।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

चक्रैरस्य द्विषच्चक्रं क्षयमापादितं क्षणात् ।
मार्तण्डकिरणैस्तीक्ष्णैर्हिमानीपटलं यथा ॥१५७॥

यमनः स्वबलव्यूहप्रत्यूहं वीक्ष्य सक्रुधा ।
जज्वाल ज्वालजटिलः प्रलयाग्निर्विशिखः ॥१५८॥

धावति स्म हयारूढः सादिभिर्निजसैनिकैः ।
यमनो यमवत् क्रुद्धः परानीकं व्यगाहत ॥१५९॥

धनुर्ज्याघोषसंसक्तजयघोषभीषणाः ।
यमनस्य भटाः सर्वाभिसारेणाभ्यषेणयन् ॥१६०॥

ततः प्रहतनिःस्वानगम्भीरध्वानभीषणः ।
चलदाश्वीयकल्लोलः प्रवृत्तोऽयं रणार्णवः ॥१६१॥

रणेऽसिधारासङ्घट्टनिष्ठ्यूताग्निकणानले ।
अनेकशरसङ्घातसम्पातोल्कातिदारुणे ॥१६२॥

अभिशस्त्रमथ धावन्तोऽर्वन्तो गर्वदुर्वहाः ।
प्राक् कशाघाततस्तीक्ष्णा न सहन्ते पराभवम् ॥युग्मम् ॥१६३॥

चलदश्वखुरक्षुण्णरेणुधारान्धकारिते ।
नासीत् स्वपरविज्ञानमत्र घोरे रणाङ्गणे ॥१६४॥

---

(१५७) इस राजा के चक्रों द्वारा शत्रुराजा का चक्र क्षण में ही इस प्रकार नष्ट कर दिया गया जिस प्रकार सूर्य की प्रचण्ड किरणों से बर्फ का समुदाय नष्ट हो जाये। (१५८) यमनराजा अपनी सेना के व्यूह में उपस्थित विघ्न को देखकर क्रोधित होकर ज्वालाओं से व्याप्त और ऊर्ध्वगामी शिखाओं वाली प्रलयकाल की अग्नि के समान मानों जलने लगा। (१५९) अपने अश्वारोही योद्धाओं के साथ स्वयं अश्वारोही होकर यमराज की भाँति क्रुद्ध राजा यमन दौड़ा और शत्रु की सेना में प्रवेश कर गया। (१६०) धनुष की ज्या की टङ्कार से मिश्रित विजय की घोषणा से भीषण यमन के योद्धा सब प्रकार के बल से आक्रमण कर बैठे। (१६१) तदनन्तर पारस्परिक मारकाट की गंभीर ध्वनि से भीषण चञ्चल अश्वकल्लोल (तरंगों) वाला वह रणरूपी सागर शुरू हुआ। (१६२-१६३) तलवार की धार की रगड़ से उत्पन्न अग्निकणवाले और अनेक बाणों के गिरने से अतीव भयंकर लगने वाले उस रणाङ्गण में, चाबुक की चोट से तेज चलने वाले गर्वीले घोड़े शत्रुकृत अपमान को सहन नहीं कर पाते थे। (१६४) दौड़ते घोड़े के खुरों से चूर्णित रजधारा से अन्धकारयुक्त उस भयंकर संग्राम में अपने पराये का ज्ञान नहीं होता था।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वसासृग्मांसपङ्केऽस्मिन् रणाब्धौ मन्दरंहसः ।
रथकट्या महापता इव चेरुश्चलद्ध्वजाः ॥१६५॥

छिन्नैकपादोऽपि हयः स्वामिनं स्वं समुद्वहन् ।
जातामर्षोऽभिशस्त्रं स प्रधावन् युयुधे चिरम् ॥१६६॥

अथो यमनसैन्येन प्रसेनश्चार्कबिम्बवत् ।
प्रावृतः परिवेषेण रेजे राजशिरोमणिः ॥१६७॥

गजानीकैर्गजा युद्धं दन्तादन्ति विधित्सवः ।
तडित्वन्तः पयोवाहाः प्रावृषेण्या इवाऽऽबभुः ॥१६८॥

रणसरसि शराम्भःपूरिते स्वामिदत्त-
द्रविणमसृणतैलाभ्यक्तशीर्षाः सुयोधाः ।
प्रतिभटसुभटोघत्खड्गघाताच्छकल्कैः
कृतसवनविधानाः शुद्धिमीयुः कृतार्थाः ॥१६९॥

हास्तिकं हास्तिकेनैव रथकट्या रथव्रजैः ।
सादिभिः सादिसंदोहो युयुधे सुचिरं मिथः ॥१७०॥

कौक्षेयकक्षतच्छिन्ना वीराणां मुण्डमण्डली ।
कमलार्चेव सा रेजे प्रसेनस्य जयश्रियः ॥१७१॥

---

(१६५) चर्बी, रक्त, माँस से कीचड़ बने इस रणसागर में मन्दवेगवाले रथ के समूह चंचल ध्वजाओं वाली नावों की तरह घूम रहे थे । (१६६) एक पैर से कटा हुआ भी घोड़ा अपने स्वामी को ले जाता हुआ क्रोधित हो कर शस्त्र के सामने दौड़ता हुआ लड़ने लगता था । (१६७) यमन के सैन्य से घिरा हुआ राजशिरोमणि प्रसेनजित् परिवेष से घिरे हुए राजशिरोमणि सूर्यबिम्ब के समान शोभित था । (१६८) हाथियों की सेना के साथ दन्तादन्ति युद्ध करते हाथी वर्षाकालीन विद्युत्युक्त बादलों की तरह मानों चमक रहे थे । (१६९) बाणरूप जल से परिपूर्ण उस रणतड़ाग में अपने स्वामी के द्वारा प्रदत्त द्रव्यरूप चिक्कण तेल से मालिश किये मस्तक वाले योद्धा, पारस्परिक वीरों की खड्गघातरूप शुभ्र चूर्ण से यथान्त स्नान की विधि से शुद्ध हो गये और कृतार्थ बने । (१७०) हाथी वाले सैनिक हाथीवालों के साथ, रथवान रथवालों के साथ तथा अश्वारोही अश्वारोहियों के साथ परस्पर बहुत काल तक युद्ध करते रहे । (१७१) तलवारों के प्रहार से छिन्न वीरयोद्धाओं की मुण्डमण्डली महाराजा प्रसेन की विजयलक्ष्मी की कमलपूजा की भाँति शोभित होती थी ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ हास्तिकसङ्घट्टनीलस्थूलघनाघनः ।
शरासारक्षतोद्भूतरुधिराम्भःप्लुतक्षमः ॥१७२॥

कृतबाह्लीक-काम्बोजाश्वीयमायूरताण्डवः ।
स्फुरन्निस्त्रिंशचपलो निस्वानस्वानगर्जितः ॥१७३॥

कठोरद्रुघणाघाताशनिनिर्घोषभीषणः ।
चलत्पाण्डुपताकालीबलाकाव्याप्तपुष्करः ॥१७४॥

धनुरिन्द्रधनुःशोभी सैन्ययोरुभयोस्तदा ।
विस्फारसमरारम्भः पुपोष प्रावृषः श्रियम् ॥ कलापकम् ॥१७५॥

निशितैर्विशिखैर्भिन्नवपुषः परितो भटाः ।
सेधानुकारतां भेजुः शस्त्रघातास्तचेतनाः ॥१७६॥

ततस्तु कालयमनः क्रुद्धः काल इवापरः ।
विलङ्घ्य सेनामरुणत् प्रसेनजितमेव सः ॥१७७॥

युयुधे सम्मुखीभूय सोऽपि तेन रुषाऽरुणः ।
ततः पार्श्वकुमारस्तु निजसैनिकसम्वृतः ॥१७८॥

आगाज्जयजयारावाकीर्णनिस्वाननिस्वनः ।
महाकलकलस्तत्र प्रावर्त्तत महारणे ॥१७९॥

---

(१७२–१७५) हाथिओं के झुण्ड के कारण काले काले बादलों वाला, बाणों के घाव में से निकलते रुधिर के कारण जलवर्षणक्षम, बाह्लीक काम्बोज अश्वों के कारण मयूरताण्डव वाला, चमकती तलवारों के कारण बिजलीयुक्त, आवाज और कोलाहल के कारण बादलों की गर्जना वाला, कठोर द्रुघण (गदाओं) के आघात के कारण वज्र की आवाज से भयंकर, चञ्चल श्वेत पताकाओं के कारण बगुलियों से व्याप्त तालाबों वाला, धनुष के कारण इन्द्रधनु की शोभा वाला, दोनों सैन्यों के युद्ध का विस्तृत आरम्भ वर्षा काल की शोभा को पुष्ट करता था। (१७६) चारों ओर से तेज बाणों से क्षत शरीर वाले योद्धा शस्त्रों की चोट से गतचेतना होते हुए लाल तरबूज[1] के समान हो गये। (१७७) तदनन्तर द्वितीय यमराज की भाँति क्रोधित वह कालयमन सेना को उलांघ कर प्रसेनजित् को ही रोकने लगा। (१७८–१७९) सामने होकर वह भी क्रोधितमुख हो लड़ने लगा। तब अपने सैनिकों के साथ जय–जय की बड़ी पुकार करता पार्श्वकुमार आ पहुँचा। वहाँ रणभूमि में महाकोलाहल मच गया।

---

१ सेध नामक एक तरबूज होता है जिसका रंग लाल होता है ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यमनस्य भटास्तावत् कान्दिशीका हृतौजसः ।
बभूवुस्तपनोद्योते खद्योतद्योतनं कुतः ! ॥१८०॥
श्रीमत्पार्श्वप्रतापोग्रतपनोद्योतविद्रुताः ।
यमनाधास्तमांसीव पलायांचक्रिरे द्रुतम् ॥१८१॥
प्रसेनजिन्नृपार्कं ये संनीयाऽस्थुर्भटाम्बुदाः ।
व्यलीयन्त क्षणात् पार्श्वप्रसादपवनेरिताः ॥१८२॥
प्रसेनजिच्च भगवत्प्रतापस्फूर्तिमद्भुताम् ।
अवतीर्य गजान्मत्वा नत्वा पार्श्वपदाम्बुजम् ॥१८३॥
पाद्यमर्घं च सम्पाद्य मणिपीठे निवेश्य तम् ।
भारतीभिर्गभीराभिः स स्तोतुमुपचक्रमे ॥१८४॥
यन्नामाद्भुतदिव्यमन्त्रमहिमप्राग्भारनिर्भासतो
विघ्नव्यूहमहान्धकारपटली नश्यत्यवश्यं नृणाम् ।
श्रीमत्पार्श्वजिनेश्वरः स्वयमसौ जागर्त्ति विश्वेश्वर-
स्तस्मिन् सन्निहिते क्व वैरिकमः क्वेतित्रजोपप्लवः ॥१८५॥
त्वन्नामस्मृतिमात्रतोऽपि भगवन् ! दूरं व्रजन्त्यापदो
बाधन्ते न च दुर्गदुर्गतिभवा बाधाः क्वचिज्जन्मिनाम् ।
संसारव्यसनार्त्तिराशु विलयं यातीति नात्यद्भुतं
सौपर्णेयपुरः सरीसृपगणः किं वा समुत्सर्पति ? ॥१८६॥

---

(१८०) यमन के नष्टतेजवाले सैनिक कौन सी दिशा में भागना है यह भी नहीं सोच सके (और तितर-बितर हो गये) । सूर्य के उदय होने पर जुगनू का प्रकाश कैसे संभव है ? । (१८१) शोभासम्पन्न पार्श्वकुमार के पराक्रमरूप उग्र सूर्य के प्रकाश से घबराये हुए यमन के सैनिक अन्धकार की भाँति शीघ्र ही भाग गये । (१८२) जो बादलरूपी योद्धा प्रसेनजित् राजारूप सूर्य को आच्छादित कर रहे थे वे क्षण भर में पार्श्वकुमार के अनुग्रहरूप वायु से तितर-बितर होकर नष्ट हो गये । (१८३-१८४) भगवान् पार्श्व के प्रताप के पराक्रम को अद्भुत मानकर प्रसेनजित् हाथी से उतरा, पार्श्व के चरणकमल को नमस्कार किया, चरणों की पूजा के लिये अर्घ्य संपादन किया, मणिमय आसन पर उनको बिठाया और गंभीर वाणी से स्तुति करने लगा । (१८५) जिसके अद्भुत, दिव्य मन्त्रमहिमा के प्रभाव से सारे विघ्नसमूह का अन्धकार निश्चित रूप से नष्ट हो जाता है ऐसे श्रीमत्पार्श्वजिनेश्वर स्वयं विश्वेश्वर यहाँ विद्यमान हैं । उनके समीप रहने पर दुष्ट शत्रु का आक्रमण कहाँ से हो सकता है ? (१८६) हे भगवन् !, आपके नाम लेने मात्र से ही विपत्तियाँ दूर भाग जाती हैं । कठोर बाधायें भी जन्मधारियों को पीड़ित नहीं कर सकतीं । सांसारिक कष्ट शीघ्र ही विलय को प्राप्त हो जाते हैं । इसमें कोई आश्चर्य नहीं । क्या गरुड़ के सम्मुख सर्पसमुदाय आ सकता है ? ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आलानं विगणय्य गण्डविगलद्दानाम्बुपूरो गजः
प्रोद्दामश्चलकर्णतालतलः पांशूत्करं व्याकिरन् ।
भञ्जन्तं द्रुकमागतोऽपि सविधं नाक्रामति त्वत्पदा–
सक्तं भक्तमसौ कदापि भगवन्नाऽऽघातुकोपि स्फुटम् ॥१८७॥

करटिकोटिविपाटनलम्पट–
प्रखरतांविलसन्नखरो हरिः
तव पदस्मृतिमात्रपरं नरं
न समुपैति रुषाऽप्यरुणेक्षणः ॥१८८॥

कृतफणामणिदीप्तरुचिः फणी
गरलमेष महोल्बणमुद्गिरन् ।
प्रकुपितस्तव पादयुगाश्रितं
किमपि भीषयते न भयङ्करः ॥१८९॥

प्रलयवह्निरिव ज्वलितोऽर्चिषा
समधिकेध्मसमृद्धिसमेधितः ।
तव पदस्मृतिशीतजलाप्लुतं
न च पराभवति ज्वलनः क्वचित् ॥१९०॥

द्रुघणधन्वशरासिपराहत–
द्विरदपत्तिभटाश्वचमूत्करे
समरमूर्धनि ते विजयश्रियं
भुवि लसन्त इह त्वदुपासकाः ॥१९१॥

---

(१८७) गण्डस्थल से झरते हुए दानवारि के पूर वाला, चञ्चलकर्णताल से चपल, धूलि के कणों को बिखेरता हुआ, अपने बन्धन को भी तोड़कर उस पेड़ को तोड़ता हुआ मस्तीवाला हाथी आकर भी आपके उपर आक्रमण नहीं करता किन्तु आपके पैर को छूता है। वह घातक होते हुए भी कभी आपका भक्त रहा होगा यह निश्चित है। (१८८) क्रोध से रक्तनेत्र, करोड़ों हाथिओं के गण्डस्थल के विदारण में दक्ष, तेज नाखुनों वाला सिंह आपके स्मरण में लगे हुए मानव के पास नहीं आता। (१८९) अपने फणों में लगी हुई मणि से दीप्त कान्ति वाला, भयंकर जहरीला क्रोधित सर्प भी आपके चरण-युगल में आश्रित व्यक्ति को डराने में समर्थ नहीं है। (१९०) प्रलयकालीन वह्नि की तरह अपनी ज्वालाओं से जलती हुई, अधिक इन्धन से अत्यन्त बढ़ी हुई अग्नि भी आपके चरण के स्मरण रूप शीतल जल से आप्लावित व्यक्ति का पराभव कहीं पर भी नहीं कर सकती। (१९१) हे भगवन्!, द्रुघण, धनुष, बाण, खड्ग आदि से शत्रु के मारे हुए हाथी, पदातिसेना, योद्धा व अश्वादि सेना वाले इस समराङ्गण में आपकी विजयश्री को देखकर आपके उपासक पृथ्वी पर अलंकृत हैं।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रचलत्तुङ्गतरङ्गशिखाग्रग–
प्रवहणा जलधावपि सार्थपाः ।
विघटिताखिलविघ्नभयाः प्रया–
न्त्यथ गृहं भवतः स्मरणाद् विभो ! ॥१९२॥

व्रण-जलोदर-शूल-भगन्दर-
क्षवथु भस्मक-मुखरुजार्दितः ।
तव पदस्मरणौषधभाग्जनो
भवति स द्रुतमेव निरामयः ॥१९३॥

विविधबन्धनबद्धतनुर्जनो
निगडकोटिनिघृष्टपदद्वयः ।
भवति बन्धनमोक्षणदक्ष ! ते
स्मरणतश्च्युतबन्धबन्धनः ॥१९४॥

मधुद्विपसिंहभोगिदहनाम्भोधिप्रचण्डाहवा–
तङ्कोद्दामभयानि भविनां त्वन्नाममन्त्रस्मृतेः ।
त्वय्येवातितमांतरमनमां शाम्यन्त्यथ प्रत्युत
प्रादुःषन्त्यथ भूरिभाग्यसुभगाः सद्भोगभाजः श्रियः ॥१९५॥

इतिश्रीमत्परमपरमेष्ठिपदारविन्दमकरन्दसुन्दररसास्वादसम्प्रीणितभव्यभव्ये पं०
श्रीपद्ममेरुविनेय पं० श्रीपद्मसुन्दरविरचिते श्रीपार्श्वनाथमहाकाव्ये
श्रीपार्श्ववर्णनं नाम चतुर्थः सर्गः ।

---

(१९२) हे प्रभो !, समुद्र में भी चञ्चल, उन्नत, तरंगों की शिखाओं के अग्रभाग में रहे नौकावाले सार्थवाह (व्यापारी) सम्पूर्ण विघ्नभयों को नष्ट करके स्मरण मात्र से ही सकुशल अपने घर लौट जाते हैं। (१९३) घाव, जलोदर, शूल, भगन्दर, खाँसी, वमन आदि रोगों से पीड़ित व्यक्ति आपके चरणकमल की स्मरणरूप औषधि के सेवन से शीघ्र ही रोगरहित अर्थात् स्वस्थ हो जाता है। (१९४) हे बन्धन को छुड़ाने में कुशल भगवान् !, अनेक प्रकार के बन्धनों में बँधा हुआ, जिसके दोनों पैरों में बेड़ियाँ पड़ी हों, ऐसा व्यक्ति आपके स्मरण मात्र से सम्पूर्ण बन्धन से रहित हो जाता है। (१९५) मदझर हाथी, सिंह, सर्प अग्नि, समुद्र, प्रचण्ड युद्ध के भयंकर आतंक ये सांसारिक लोगों के उत्कट महाभय आपके नाम मात्र के स्मरण से शान्त हो जाते हैं। जो आप में ही अपना मन लगाते हैं उन ही व्यक्तियों को बहुत भाग्य से सुन्दर और अच्छे भोगवाली लक्ष्मी प्रकट होती है।

इति श्रीमान् परमपरमेष्ठि के चरणकमल के मकरन्द के सुन्दर रस के स्वाद से
भव्यजनों को प्रसन्न करने वाला, पं० श्री पद्ममेरु के शिष्य पं०
श्री पद्मसुन्दर कवि द्वारा रचित श्रीपार्श्वनाथमहाकाव्य में
'श्री पार्श्ववर्णन' नामक चतुर्थ सर्ग समाप्त हुआ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## पञ्चमः सर्गः

अथो नृपः पार्श्वकुमारमादरा-
न्निनाय गेहे विनयेन नीतिवित् ।
व्यधात् सपर्यां विविधामनन्यधी-
र्महत्सु चातिथ्यमिदं हि गौरवम् ॥१॥

स्थितः स सौधे वसुधाधिपार्पिते
सुधासितेऽथागुरुधूपवासिते ।
सुखेन कालं गमयाम्बभूव तत्-
कृतार्हणागौरवभक्तिपूजितः ॥२॥

प्रसेनराजस्तनया नयस्पृशोऽ-
प्यगण्यलावण्यसुधातरङ्गिणी ।
सुवर्णचम्पेयसुमप्रभावती
बभूव नाम्ना वपुषा प्रभावती ॥३॥

सुरूपलावण्यवयाविभूतिभिः
प्रवर्द्धमाना किल सैन्दवी कला ।
दिने दिने लब्धमहोदया बभौ
जगज्जनाह्लादविधायिनी कनी ॥४॥

ध्रुवं विधात्रा भुवि निर्मिता सुर-
स्त्रियां समुच्चित्य सुरूपसम्पदम् ।
तदन्यथा चेदनया सुराङ्गना-
तुला न काचिद् ददृशे जगत्यपि ॥५॥

---

(१) अनन्तर नीतिवेत्ता राजा प्रसेनजित् पार्श्वकुमार को विनयपूर्वक घर ले आये और अनन्यचित्त होकर उनका पूजा-सत्कार किया। बड़े आदमियों का आतिथ्य ही गौरव है। (२) वे पार्श्वकुमार महाराजा के द्वारा अर्पित, चूने से श्वेत, अगुरु धूप से सुवासित भवन में रहने लगे तथा पूजा सत्कार से भक्तिपूर्वक सत्कृत होकर सुख से समय बिताने लगे। (३) नीतिविद् महाराजा प्रसेनजित् की लावण्यरूप सुधा की अगणित तरङ्गों से युक्त, चम्पा के पुष्प और सुवर्ण की कान्तिवाली, नाम से और शरीर से प्रभावती नामक कन्या थी। (४) वह रूप-लावण्य की कान्ति की समृद्धि से चान्द्री कला की भाँति बढ़ती हुई प्रतिदिन महोदय को प्राप्त करने वाली और संसार के लोगों को आह्लादित करने वाली कन्या शोभित हो रही थी। (५) निश्चित रूप से, विधाता ने पृथ्वी पर उस कन्या को देवाङ्गनाओं की रूपसम्पदा को चयन करके बनाया। यह (कथन) अन्यथा हो तो इसके (प्रभावती के) साथ देवाङ्गना की तुलना संसार में दृष्टिगत नहीं होती।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुपक्वबिम्बप्रतिबिम्बिताधरा
कृशाङ्गयष्टिः पृथुपीवरस्तनी ।
मनोभवेन त्रिजगज्जिगीषुणा
ध्रुवं पताकेव निदर्शिता कनी ॥६॥

स्वरेण निर्भर्त्सितमत्तकोकिला
बभौ सुकण्ठी कलकण्ठनिस्वना ।
ध्रुवं तदालापसुशिक्षिता जगुः
कृशाश्विनो गीतिजरीतिजङ्कृतिम् ॥७॥

तदीयलालित्यविहारविभ्रम-
द्रवार्द्रहावस्मितकेलिसौष्ठवम् ।
विमृश्य तत्ताण्डवशास्त्रमुच्चकै-
श्चकार नूनं कतमोऽपि सत्कविः ॥८॥

पदारविन्दे नखकेसरद्युती
स्थलारविन्दश्रियमूहतुर्भृशम् ।
विसारिमृद्वङ्गुलिसच्छदेऽरुणे
ध्रुवं तदीये जितपल्लवश्रिणी ॥९॥

विजित्य तत् कोकनदं श्रिया स्वया-
ऽरुणौ तदीयौ चरणौ नु जिग्यतुः ।
विहारलीलालसितेन मन्थरां
गतिं निजेनेव मरालयोषिताम् ॥१०॥

(६) पके हुए बिम्बफल के प्रतिबिम्बित अधर वाली, कृशगात्रा, मोटे व विशाल स्तनवाली, त्रिलोक को जीतने की इच्छा वाले कामदेव के द्वारा मानों वह कन्या (अपने रथ की) पताका की भाँति बतलाई गई। (७) (अपनी) आवाज से मतवाली कोयल को भी मात करने वाली वह कलकण्ठी सुकण्ठी शोभित थी। निश्चय ही उसके आलाप से शिक्षित कृशाश्वि (नट लोग) गीतिजन्य रीति की झङ्कार को ध्वनित करते थे। (८) उस कन्या के लालित्य, गति, चेष्टा, भावपूर्ण हाव, स्मित और क्रीडा के सौष्ठव को सोचकर किसी सत्कवि ने उत्तम ताण्डवशास्त्र की मानों रचना की हो। (९) नखरूपी केसर की कान्तिवाले, लम्बी मृदु अङ्गुलिरूप पङ्खडियों वाले और पल्लव की शोभा को पराजित करने वाले उसके अरुणिमायुक्त दोनों चरणकमल स्थलकमल की शोभा को धारण करते थे। (१०) उसके दोनों लाल चरण अपनी कान्ति से रक्तकमल को जीत कर अपनी भ्रमणलीला की सुन्दरता से हंसों की पत्नियों की मन्थर चाल को भी जीत लेते थे।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रमौ यदीयौ किल मञ्जुसिञ्जितैः
स्वनूपुरोत्थैरिव जेतुमुद्यतौ ।
सुगन्धलुब्धालिकुलस्वनाकुलं
प्रवालशोणं स्थलपङ्कजद्वयम् ॥११॥

सदैव यानासनसङ्गतौ गतौ
निगूढगुल्फाविति सन्धिसंहतौ ।
स्फुटं तदंह्रीकृतपार्ष्णिसङ्ग्रहौ
सविग्रहौ तामरसैर्जिगीषुताम् ॥१२॥

तदीयजङ्घाद्वयदीप्तिनिर्जिता
वनं गता सा कदली तपस्यति ।
चिराय वातातपशीतकर्षणै--
रधः शिरा नूनमखण्डितव्रता ॥१३॥

अनन्यसाधारणदीप्तिसुन्दरौ
परस्परेणोपमितौ रराजतुः ।
ध्रुवं तदूरू विजितेन्द्रवारण--
प्रचण्डशुण्डायतदण्डविभ्रमौ ॥१४॥

कटिस्तदीया किल दुर्गभूमिका--
सुमेखलाशालपरिष्कृता कृता ।
मनोभवेन प्रभुणा खसंश्रया
जगज्जनोपप्लवकारिणा ध्रुवम् ॥१५॥

---

(११) उस कन्या के पदक्रम अपने नूपुर से उठी हुई सुन्दर ध्वनि से, सुगन्ध से आकृष्ट भ्रमरकुल की आवाज से पूरित और मूँगे के समान लाल दो स्थलकमल को जीतने के लिए उद्यत थे। (१२) यान (चलना) और आसन (बैठना) से युक्त, नहीं दिखाई देते हों ऐसे घुटनों वाले, समुचित सन्धिबन्धवाले, पुष्ट एड़ो वाले, सुन्दर आकृति वाले उसके दोनों पैर यान और आसन रूपी उपायों वाले, अगोचर गुल्फ वाले, सन्धि से ऐक्य वाले, पार्ष्णि द्वारा सुरक्षासम्पन्न और युद्ध करते कमलों को जीतने की इच्छा करते थे। (१३) उसकी दोनों जाँघों की कान्ति से निर्जित वह कदलीवृक्ष जंगल में चिरकाल से वायु, धूप, शीत आदि कष्ट से अखण्डितव्रत होकर मानों नीचे सिर किये हुए तप कर रहा है। (१४) अत्यन्त असाधारण दीप्ति से सुन्दर, परस्पर एक दूसरे की उपमा वाली उसकी दोनों जाँघों ने निश्चितरूप से ऐरावत हाथी की दण्ड के समान लम्बी प्रचण्ड शुण्डा की विभ्रमगति को परास्त किया था। (१५) सुन्दर कन्दोरे के हीरों से अलंकृत तथा योनि के आश्रयस्थानरूप उसकी कमर खाई और कोट से परिष्कृत तथा आकाश का धारण करने वाली (गगनचुम्बी), जगत् के लोगों को सताने वाले कामदेव प्रभु द्वारा बनाई गई (मानो) दुर्गभूमि है।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तनुः कृशाङ्ग्याः स्मरचापसञ्जिनी
मधुव्रतव्रातमयी स्म भाव्यते ।
विनीलरोमालिरियं नु मेखला-
मणेरिवार्चिः किमु वा विजृम्भते ॥१६॥

तदीयमध्यं नतनाभिसुन्दरं
बभार भूषां सवलित्रयं पराम् ।
प्रक्लृप्तसोपानमिदं विनिर्ममे
स्वमज्जनायेव सुतीर्थमात्मभूः ॥१७॥

स्तनाविवास्याः परिणाहिमण्डलौ
सुवर्णकुम्भौ रतियौवनश्रियौ ।
सुचुचुकाच्छादनपद्ममुद्रितौ
विरेजतुर्निस्तलपीवराविमौ ॥१८॥

विसारितारद्युतिहारहारिणौ
स्तनौ नु तस्याः सुषमामवापतुः ।
सुरापगातीरयुगाश्रितस्य तौ
रथाङ्गयुग्मस्य तु कुङ्कुमार्चितौ ॥१९॥

बभार शोभामधिकन्धरं श्रिता
विसारिहारावलिरुज्वला छविः ।
सुमेरुशृङ्गाग्रपतत्सुरापगा-
प्रवाहपूरस्य मनोहरभ्रुवः ॥२०॥

---

(१६) अत्यन्त श्याम रोमावली वाली उसकी देहयष्टि कामदेव के धनुष की भ्रमरों वाली डोरी (ज्या) जैसी दिखाई देती थी। अथवा तो वह मेखला के मणि की ज्योति की तरह शोभित थी। (१७) झुकी हुई नाभि से सुन्दर, तीन लकीरों से युक्त उसका मध्य भाग परमशोभा को धारण करता था। मानों कामदेव ने अपने स्नान करने के लिये सीढ़ियों से युक्त सुन्दरतीर्थ का निर्माण किया हो। (१८) विस्तृत मण्डलाकार (गोलाकार), सुवर्णघट के समान, रति और यौवन की शोभा वाले उसके दोनों स्तन सुन्दर चुचुकरूप आच्छादन वाले बन्द कमल के समान गोल और स्थूल शोभित थे। (१९) विस्तृत उज्ज्वल कान्तिवाले हार से मनोहर, कुंकुम से अर्चित उसके वे दोनों स्तन देवनदी गङ्गा के दोनों तट पर स्थित चकवा-चकवी के जोड़े के सौन्दर्य को प्राप्त थे। (२०) मनोहर भ्रूकुटी वाली उस कन्या की विस्तृत हारपङ्क्ति जो बड़ी ही उज्ज्वल थी तथा ग्रीवा का आश्रय ले रही थी वह सुमेरु पर्वत की चोटी के अग्रभाग से गिरती हुई देवनदी गङ्गा के अजस्र प्रवाह स्रोत की सुन्दर शोभा को धारण करती थी।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जगत्त्रयश्रीविजयस्य सूचिका
बभौ त्रिरेखा किल कण्ठकन्दली ।
इयं मृगाक्ष्या गुणिना परिष्कृता
सुवृत्तहारेण गुणानुकारिणा ॥२१॥

सुकोमलाङ्ग्या मृदुबाहुवल्लरी–
द्वयं बभौ लोहितपाणिपल्लवम् ।
नखांशुपुष्पस्तबकं प्रभास्वराऽ–
ङ्गदाऽऽलवालद्युतिवारिसङ्गतम् ॥२२॥

तदंसदेशौ दरनिम्नतां गतौ
सुराद्रिकूटातटपार्श्वयोः श्रियम् ।
बलादिवाऽऽजह्रतुरात्तसङ्गरौ
निजश्रिया भर्त्सितहंसपक्षती ॥२३॥

मुखं सुमुख्याः स्मितकौमुदीसितं
जहास राकातुहिनांशुमण्डलम् ।
कटाक्षपातव्यतिषङ्गचातुरी–
धुरीणमत्यन्तजडात्मकं नु तत् ॥२४॥

विहाय चन्द्रं जडमङ्कपङ्किलं
सरोरुहं पङ्ककलङ्कदूषितम् ।
उवास लक्ष्मीरकलङ्कमुच्चकै–
रिति प्रतर्क्येव तदीयमाननम् ॥२५॥

---

(२१) तीन रेखा वाली इस मृगाक्षी कन्या की कण्ठ कन्दली लोकत्रय के विजय की सूचक ऐसी गुण (डोरी) का अनुकरण करनेवाले और गुणयुक्त (डोरी में पिरोये हुए) गोलाकार हार से अतिशय शोभायमान थी। (२२) उस अत्यन्त कोमल अङ्गवाली कन्या की चमकीले अङ्गदरूप आलवाल के द्युतिरूप वारि से युक्त, नखांशुरूप पुष्पगुच्छवाली, कुंकुमवर्ण वाले कररूप (रक्त) पल्लव वाली दो कोमल बाहुरूप लताएँ शोभायमान थीं। (२३) युद्ध का जिन्होंने आश्रय लिया है ऐसे उस कन्या के कुछ झुके हुए कन्धे मेरुपर्वत के शिखर के तटरहित दो पार्श्वों की (बाजुओं की) शोभा को हठात् हरण करते थे और अपने सौन्दर्य से हंस के दो पङ्खों को तिरस्कृत करते थे। (२४) चारुवदनी का हँसता हुआ वह मुख स्मितरूपी कौमुदी से धवल, कटाक्षों के द्वारा (एक दिल को दूसरे दिल से) जोड़ने की श्रेष्ठ चातुरीवाला और मुग्ध कर देने वाला, कौमुदी स्मित से धवल, फलक (=कट) के साथ पासाओं के पात का मेल कराने की श्रेष्ठ चातुरीवाला और शीतल स्वभाववाला चन्द्र तो नहीं? (२५) शीतल और कलङ्क से दूषित चन्द्र को छोड़कर तथा कादव के दोष से दूषित कमल को छोड़कर लक्ष्मी "उसका मुख अत्यन्त निष्कलङ्क है" ऐसा समझकर मानों उसमें निवास करती थी।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रदच्छदोऽस्याः स्मितदीप्तिभासुरो
यदि प्रवालः प्रतिबद्धहीरकः ।
तदोपमीयेत विजित्य निर्वृतः
सुपक्वबिम्बं किल बिम्बतां गतम् ॥२६॥

अहो सुकण्ठ्याः कलकण्ठनिस्वनो
जिगाय नूनं परिवादिनीक्वणम् ।
कपोलयुग्मं कचबिम्बचुम्बितं
शशाङ्कबिम्बं नु कलङ्कसङ्करम् ॥२७॥

प्रयस्य नासाग्रमभि स्थितं मुखं
तदीयनिःश्वासमनल्पसौरभम् ।
स्फुटं समाघ्रातुमिवोर्ध्वकन्धरं
मृगेक्षणायाः शुकतुण्डसच्छवि ॥२८॥

सरोरुहे खञ्जनसञ्जने यदा
सहाञ्जने तन्नयने तदा तुलाम् ।
नितान्तकर्णान्तिगतागताञ्चिते
परस्परस्पर्धितयेव बभ्रतुः ॥२९॥

श्रुती किल स्यन्दनयुग्ममेतयो-
र्विनिर्मितं यौवनकामयोः कृते ।
ध्रुवं तदीये वपुषि प्रसर्पतो-
र्विहारचाराय विधातृदारुणा ॥३०॥

---

(२६) मन्द मुस्कान के प्रकाश से प्रकाशित उसका अधरोष्ठ हीरे से जड़े हुए मूँगे की तरह शोभित था और उपमानरूप सुपक्व बिम्बफल को जीत कर आया हो ऐसा लगता था। (२७) अहो !, उस सुकण्ठवाली की मधुर कण्ठध्वनि निश्चितरूप से वीणा के शब्द को जीतने वाली थी। बालों की लटों (जुल्फों) से चुम्बित उसके दोनों गाल कलङ्कयुक्त चन्द्रबिम्ब के समान लगते थे। (२८) प्रयास करके मुख के सामने रहा हुआ, उसका अत्यन्त सुगन्धवाला निश्वास सूँघने के लिए उत्कण्ठित हो ऐसा, मृगाक्षी की नासिका का अग्रभाग तोते की चोंच की शोभा को धारण करता था। (२९) कान के अत्यन्त अन्त तक आते-जाते उसके अञ्जनयुक्त दो नयन (कमलपुष्पवर्तुल के) व्यास के अत्यन्त अन्त तक आवागमन करते दो खञ्जनपक्षियों से युक्त दो कमलों के साथ स्पर्धा करते हुए शोभित थे। (३०) उसके शरीर में फैल रहे यौवन और काम इन दो के विहार करने के लिए ही सचमुच विधातारूप शिल्पी ने दो कान के रूप में दो रथ बनाये हों ऐसा मालूम होता है।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रुतिश्रितेऽस्या मणिहेमकुण्डले
प्रभासमाने मुखमण्डलश्रिया ।
रथाङ्गरूपे इव मान्मथानसो
विलेसतुर्लास्यमुपागते ध्रुवम् ॥३१॥

स्मराभिषेकाय ललाटपट्टिका
विनिर्मिता विश्वसृजेव गण्डिका ।
स्फुटं तदीया शितिचूर्णकुन्तल-
प्रकीर्णकव्यञ्जितराजलक्षणा ॥३२॥

भ्रुवौ तदीये किल मुख्यकार्मुकं
स्मरस्य पुष्पास्त्रमिहौपचारिकम् ।
मुखाम्बुजेऽस्या भ्रमरभ्रमायितं
घनाञ्जनाभैर्भ्रमरालकैरलम् ॥३३॥

इयं सुकेश्याः कचपाशमञ्जरी
विधुंतुदस्य प्रतिमामुपेयुषी ।
मुखेन्दुबिम्बग्रसनैकलिप्सया
तमोऽञ्जनस्निग्धविभा विभाव्यते ॥३४॥

समग्रसर्गाद्भुतरूपसम्पदां
दिदृक्षयैकत्र विधिर्व्यधादिव ।
जगत्त्रयीयौवतमौलिमालिका-
मशेषसौन्दर्यपरिष्कृतां नु ताम् ॥३५॥

---

(३१) कानों पर आश्रित, मुखमण्डल के तेज से प्रकाशमान, उसके स्वर्णमणिमय दो कुण्डल कामदेव के दो चक्र की भाँति मृदुगति को प्राप्त होकर सचमुच शोभित थे। (३२) श्वेतचूर्ण से और बिखरे हुए कुन्तलों से स्फुटरूप से प्रगट राजलक्षणों वाला उसका विशाल ललाट कामदेव के अभिषेक के लिए विश्वकर्ता ने मानों गण्डिका का निर्माण किया हो, ऐसा दिखाई देता था। (३३) उसकी दोनों भौंहें कामदेव का मुख्य धनुष थीं। पुष्पास्त्र तो केवल औपचारिक रूप में था। उसके मुखकमल में भौंहों की गाढ़ अञ्जन के सदृश अलकावलि भ्रमर के भ्रम को पैदा करती थी। (३४) इस शोभनकेशों वाली कन्या की केशपाशमंजरी राहु की आकृति को धारण करती हुई मुखरूपचन्द्रबिम्ब को ग्रसित करने की एकमात्र इच्छा से काले अंजन की स्निग्ध कान्ति के समान लगती थी। (३५) विधाता ने सम्पूर्ण सृष्टि की अद्‌भुत रूपसम्पत्ति को एक ही जगह देखने की इच्छा से उसे त्रिलोकी के युवतिसमुदाय में श्रेष्ठ और सम्पूर्ण सौन्दर्यशालिनी बनाया।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथान्यदा यौवनरामणीयकं
वपुर्दधानां ददृशे प्रभावतीम् ।
पिता तदुद्वाहकृते कृतादरो
विभोः स पार्श्वस्य पुरो व्यजिज्ञपत् ॥३६॥

भवादृशां यद्यपि मन्दरागिणी
भवाङ्गभोगेषु मतिः प्रवर्तते ।
तथापि धर्मो गृहमेधिनामयं
विधीयते दारपरिग्रहस्थितिः ॥३७॥

भवान् स्वयंभूर्भगवांस्तवोद्भवे
निमित्तमात्रं जनको यतोऽभवत् ।
उदेष्यतश्चण्डकरस्य हि स्वत-
स्तदुद्भवे हेतुरिवोदयाचलः ॥३८॥

भवद्भिराचरिते हि सत्पथे
महाजनोऽप्यत्र तथा प्रवर्तताम् ।
क्रमो हि लोके महतां प्रदर्शितो-
ऽनुवर्तते प्राकृतलोक एष तम् ॥३९॥

प्रसीद विश्वेश्वर ! मद्विधे जने
वचस्त्वमङ्गीकुरु मे नयोचितम् ।
प्रभावतीमेव भवान् मदङ्गजां
निजं कलत्रं विदधात्वनुग्रहात् ॥४०॥

---

(३६) एक दिन उसके पिता ने प्रभावती को युवावस्था से सुन्दर शरीर धारण करती हुई देखा । अतः उसके विवाह के लिए पिता ने आदरपूर्वक प्रभुपार्श्वकुमार के सम्मुख निवेदन किया । (३७) हे प्रभो !, यद्यपि सांसारिक भोगों में आपकी बुद्धि मन्दराग वाली है तो भी गृहस्थों का यह धर्म है कि विवाहसंस्कार की स्थिति का विधान किया जाये । (३८) हे भगवन् !. आप स्वयंभू हैं । आपके जन्म के समय आपके पिता केवल निमित्तमात्र थे जैसे उदय पाने वाले प्रचण्डसूर्य के (उदय के प्रति) उदयाचल पर्वत केवल निमित्तमात्र है । (३९) आप जैसों के द्वारा सन्मार्ग का आचरण करने पर बड़े लोग भी वैसा ही करें, क्योंकि यह क्रम रहा है कि महान् लोगों के द्वारा प्रदर्शित मार्ग का अन्य लोग अनुवर्तन करते ही हैं । (४०) हे विश्वेश्वर !, मुझ जैसे व्यक्ति पर प्रसन्न होइये । मेरे न्यायोचित वचन को स्वीकार कर आप मेरी पुत्री प्रभावती को कृपा करके अपनी पत्नीरूप में ग्रहण कीजिए ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवांश्चिदानन्दमयो भवेऽपि सन्
न लिप्यते पातकपङ्कसङ्करैः ।
स्वधातुभेदात् कनकं हि निर्गतं
पुनर्न तस्मिन् सविधेऽनुषज्यते ॥४१॥

भवान् विरक्तोऽपि भवप्रसक्तितो
ममोपरोधेन करग्रहोऽधुना ।
विधीयतां साधुजनानुषङ्गता
कृतार्थयत्यन्यजनं हि केवलम् ॥४२॥

उदीर्य विज्ञप्तिमिमां महीपतिः
स्वतो व्यरंसीदथ सस्मितं जिनः ।
तथेति तद्वाक्यमुदारचेष्टितः
प्रतीच्छति स्म स्वनियोगयोगवित् ॥४३॥

इत्थं निशम्य भगवद्वचनं महीयः
प्रीतः परां मुदमसौ मनसाऽऽदधानः ।
लग्नं करग्रहमहाय विमृश्य शुद्धं
कन्यां निजां स वितितार वराय तस्मै ॥४४॥

सौख्यं तया स बुभुजे भगवानसक्तः
सोऽन्येद्युरिद्धमधिसौधमधिष्ठितश्च ।
सान्तःपुरः पुरमुदीक्ष्य गवाक्षजालैः
पुष्पोपहारसहितान् मनुजानपश्यत् ॥४५॥

---

(४१) हे प्रभो !, आप संसार में रहते हुए भी चिदानन्द स्वरूप हैं तथा सांसारिक पापपङ्क के सम्पर्क से लिप्त नहीं होते हैं। (जैसे) अपने साथ मिली हुई अन्य धातुओं से अलग हुआ स्वर्ण दुबारा समीप में रही उन धातुओं में मिल नहीं जाता। (४२) सांसारिक प्रसंग से विरक्त होते हुए भी मेरे आग्रह से अब आप पाणिग्रहण संस्कार कर लो क्योंकि सज्जनों का सामीप्य निश्चितरूप से अन्य व्यक्तियों को कृतार्थ कर देता है। (४३) राजा प्रसेनजित् अपनी यह विज्ञप्ति निवेदन कर चुप हो गये। इसके पश्चात् अपने लग्न की नियति को देखने वाले और उदारचेष्टा वाले उन्होंने उनके (राजा के) वाक्य को (प्रस्ताव को) 'अच्छा' ऐसा कहकर स्वीकार कर लिया। (४४) इस प्रकार जिनप्रभु के महनीय वचन सुनकर वह राजा प्रसेन खुश हुआ और मन में अतीव प्रसन्न हुआ। पाणिग्रहण के उत्सव के लिए शुद्ध लग्न (मुहूर्त) का शीघ्र ही निश्चय करके उसने अपनी कन्या उस उत्तम वर को अर्पित कर दी। (४५) उस पार्श्वकुमारप्रभु ने आसक्ति रहित होकर उस कन्या के साथ सुख भोगा। एक दिन प्रकाशित भवन पर स्थित उसने गोल की जाली से अन्तःपुर सहित नगर के उपर नजर डाली तो देखा कि मनुष्यलोग पुष्पोपहारयुक्त थे।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निर्गच्छतो बहिरिमानथ विस्मितोऽसौ
पप्रच्छ कञ्चिदपि सस्मितमाह स स्म ।
पञ्चाग्निसाधनपरं कमठं तपस्वि–
वर्यं व्रजत्यहह ! पौरजनोऽद्य नन्तुम् ॥४६॥

इत्थं निशम्य भगवान् सवयोभिरुच्चै–
र्गोष्ठीं सविस्मितसुभाषितलब्धवर्णैः ।
कुर्वन् वनेषु विचचार विहारचारी
श्यामायमानतरुराजिषु राजमानः ॥४७॥

क्रीडन् वनेष्वथ तदाश्रममेष वीक्षां–
चक्रे तपस्विनिवहैः कुशदारुहस्तैः ।
आकीर्णमेकमथ तापसवर्गमुख्यं
पञ्चाग्निसाधनपरं च निरीक्ष्य तस्थौ ॥४८॥

यावच्च कौतुकवशाद् भगवाननत्वा
तस्थावनादरपरः पुरतस्तमीशः ।
दृष्ट्वा तमप्रणतमेष चुकोप बाढं
नातद्विदां तपसि चापि भवेत् तितिक्षा ॥४९॥

चित्ते व्यचिन्तयदथो स तपस्विवर्यः
पूज्योऽहमत्र यदि वा तपसाऽस्मि वृद्धः ।
पार्श्वस्तु मामवगणय्य पुरः स्थितो यत्
तत्प्राज्यराज्यपदवीमदविभ्रमत्वम ॥५०॥

---

(४६) बाहर निकलते हुए इन लोगों को देखकर विस्मयान्वित होकर उसने (पार्श्व ने) किसी से पूछा तब उसने हँसकर कहा–अरे आज सारे नगरनिवासी पञ्चाग्नि साधना में तत्पर कमठ तपस्विश्रेष्ठ को प्रणाम करने के लिए जा रहे हैं ।

(४७) ऐसा सुनकर अपनी उमरवाले, आश्चर्यचकित मधुर वाणीवाले और कीर्तिप्राप्त मित्रों के साथ जोरशोर से चर्चा करते करते श्याम दिखाई देती वृक्षपंक्तियों में शोभायमान भगवान् वनों में पैदल निकल पड़े। (४८) वनों में खेलते खेलते उन्होंने कुश और काष्ठ हाथ में लिए हुए तपस्वियों से भरपूर उस आश्रम को देखा और तापसों के एक मुखिया को पंचाग्नि साधना में तल्लीन देखकर वे खड़े रह गये। (४९) यकायक भगवान् पार्श्व कौतुक-वश बिना प्रणाम किये अनादर के साथ उसके सामने खड़े हो गये । उसे बिना नमस्कार किये हुए देखकर महामुनि कमठ को बहुत क्रोध आया । अज्ञानियों की तपस्या में सहनशीलता नहीं होती है । (५०) अपने मन में उस तपस्विश्रेष्ठ ने सोचा कि मैं यहाँ इस आश्रम में पूजनीय हूँ तथा मैं तपोवृद्ध हूँ । पार्श्व मेरी अवगणना करके मेरे सामने खड़ा हुआ है अतः यह तो राज्यपदवी के अभिमान से जन्य उसका अविवेक है ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विध्यातमग्निमथ वीक्ष्य तपस्विवर्यो
दारुण्युपक्षिपति यावदसौ कुठारम् ।
तावत् कृपार्द्रमनसा प्रभुणा निषिद्धो–
ऽप्यभ्युद्यतः स लघु तद् विददार दारु ॥५१॥

तस्माद् भुजङ्गभुजगीयुगलं कुठार–
च्छेदेन विह्वलतरं निरगाद् विषण्णम् ।
तस्मै नमस्कृतिमदात् करुणार्द्रचेताः
पौरास्तदाशु कमठाद् विमुखत्वमापुः ॥५२॥

तत्राश्वसेननृपसूनुरनूनसम्पत्
प्रोचे क एष भवतामिह धर्ममार्गः ।
यद्धर्मसाधनविधावपि निर्दयत्वं
ग्राव्णा समुद्रतरणं खलु तत् समग्रम् ॥५३॥

किं तत् तपो यदिह भूतकृपाविहीनं
कारुण्यमेव तपसः किल मूलमाहुः ।
तद्धीनमेव सकलं खलु धर्मकार्यं
स्याद् दुर्भगाभरणतुल्यमनल्पकृच्छ्रम् ॥५४॥

श्रुत्वेति तद्वचनमाह मुनिर्न वेत्सि
पञ्चाग्निसाधनमिहास्ति तपोऽतिकृच्छ्रम् ।
तच्चैकपादधरणेन तथोर्ध्वबाहु–
स्थित्या स्वयंच्युतदलाद्यनिलाशनेन ॥५५॥

(५१) उस तपस्विश्रेष्ठ ने ज्योंही बुझ गयी अग्नि को देखकर कुठार (कुल्हाड़ी) को लकड़ी पर फेंका, त्योंही कृपालु प्रभु ने मना किया, फिर भी उसने तत्पर होकर शीघ्र ही लकड़ी को चीर दिया। (५२) कुठारछेद से उस काष्ठ खण्ड में से दुःखी सर्प–सर्पिणी का जोड़ा निकला। करुणाचित्त वाले प्रभु ने उसे नमस्कार महामन्त्र दिया और उन सभी नगरनिवासियों ने कमठमुनि से मुँह फेर लिया। (५३) वहाँ अश्वसेन महाराजा के महान सम्पत्तिवाले पुत्र पार्श्व ने कहा आपका यह कैसा धर्ममार्ग है कि धर्माचरण कार्य में भी निर्दयता का व्यवहार करते हो? यह समग्र (धर्मविधि) पत्थर पर बैठकर समुद्र पार करने के समान है। (५४) प्राणियों पर दया रहित यह तप क्या तप है? करुणा ही तपस्या का मूल है ऐसा लोग कहते हैं। करुणाहीन सम्पूर्ण धर्मकार्य दुर्भगा (विधवा) स्त्री के द्वारा आभूषण धारण करने के समान अतीव निरर्थक है। (५५–५७) उसका वचन सुनकर मुनि बोले – तुम अतीव कष्टकारक पञ्चाग्नि साधन तपस्या को क्या नहीं जानते हो!

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मासोपवासकरणादिभिरेव घोरं
युष्मादृशां न च कुमार ! तदस्ति गम्यम् ।
श्रुत्वा पुनः स तमुवाच विदांवरेण्यः
कार्या मया न नितरामवमानना ते ॥५६॥
मीमांस्यते खलु यथातथमेव तत्त्वं
भाव्यं बुधैस्तु नयवर्त्मविचारदक्षैः ।
नैवान्तरेण जिनदर्शनमन्यतोऽपि
पश्यामि धर्मनिकषस्य तथोपपत्तिम् ॥५७॥
मिथ्यात्वमव्रतकषायचतुष्कयोगै-
र्भूवारिवह्न्यनिलभूरुहजङ्गमेषु ।
योगैर्मनोवचनकायकृतैस्त्रिधापि
यत् तापसा अपि चरीकृति तेषु हिंसाम् ॥५८॥
तत् सर्वकृत्यमिह वन्ध्यमुशन्ति तज्ज्ञा
विज्ञानशून्यहृदयस्य तपस्यतोऽपि ।
युष्मादृशस्य जलमन्थनतो घृतेच्छा-
र्यद्वा तुषावहननादपि तण्डुलेच्छोः ॥५९॥
अज्ञानकष्टमिह ते प्रतिभासते मे
नामुत्रकं किमपि मोक्षकृते फलं स्यात् ।
पङ्काविलस्य किमु पङ्कजलेन शुद्धि-
र्यद्वा कदापि सुरयैव सुराविलस्य ॥६०॥

---

इस तप में एक पैर पर खड़े होकर भुजा ऊपर की ओर उठाकर रहना होता है और अपने आप गिरे हुए पत्तों आदि के तथा वायु के भक्षण से या महीनों तक उपवास करने आदि के द्वारा यह तप घोर है, तुम्हारे जैसों के लिए यह तप अगम्य है। यह बात सुनकर वह विद्वान् पार्श्वकुमार उस कमठमुनि से कहने लगा—मुझे तुम्हारा अपमान नहीं करना चाहिए। तुम स्वयं समय पाकर वास्तविकता पर विचार करोगे। नयमार्ग से विचारणा करने में चतुर बुद्धिमान लोग विचारणीय तत्त्व की यथार्थरूप से मीमांसा करते हैं। बिना जिनदर्शन धर्म की कसौटी का होना मुझे असंभव प्रतीत होता है। (५८) मिथ्यात्व, अव्रत और चार कषायों से युक्त तीन प्रकार की कायिक-वाचिक-मानसिक प्रवृत्ति से तापस लोग पृथ्वीकाय, अप्काय, तेजस्काय, वायुकाय, वनस्पतिकाय और त्रस जीवों के प्रति हिंसा करते ही रहते हैं। (५९) तपस्या करने पर भी जो विज्ञानशून्य हृदयवाला है, जो जल के मन्थन से घी पाने की इच्छा रखता है और जो भुस्से के कूटने से चावल पाने की इच्छा रखता है ऐसे तुम्हारे जैसे आदमी का वह सब कृत्य यहाँ निष्फल है ऐसा विद्वान कहते हैं। (६०) तुम्हारा कार्य अज्ञान के कारण (केवल) कष्टरूप है ऐसा मुझे लगता है। *परलोक में भी इसका कोई फल मोक्ष के लिए नहीं है। कीचड़ में सने हुए की* क्या कीचड़ के जल से शुद्धि होती है? अथवा क्या सुरा से लिप्त की सुरा से शुद्धि होती है। आपके सिद्धान्त में भी कहा है:—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा चोक्तं भवन्मते–

"यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम् ।
भूतहत्यां तथैवैतां न यज्ञैर्मार्ष्टुमर्हति ॥६१॥
कीदृक् सरिद्विना तोयं कीदृगिन्दुं विना निशा ।
कीदृग् वर्षा विना मेघः कीदृग् धर्मो दयां विना ॥६२॥
कृपानदीमहातीरे सर्वे धर्मास्तृणाङ्कुराः ।
तस्यां शोषमुपेतायां कियन्नन्दन्ति ते पुनः ॥६३॥
सर्वे वेदा न तत् कुर्युः सर्वे यज्ञाश्च भारत ! ।
सर्वे तीर्थाभिषेकाश्च यत् कुर्यात् प्राणिनां दया ॥६४॥
एकतः काञ्चनं मेरुं बहुरत्नां वसुन्धराम् ।
एकस्य जीवितं दद्याद् न च तुल्यं युधिष्ठिर ! ॥६५॥
सर्वे तीर्थाभिषेकाश्च सर्वे यज्ञाश्च भारत! ।
भूताभयप्रदानस्य कलां नार्हन्ति षोडशीम्" ॥६६॥

इत्यादि भवन्मतोक्तभगवद्वचनप्रामाण्यात् ।

पार्श्वेन तत्र विजितः स निजोपपत्त्या
तूष्णीक एव मुनिरास कृतावहेलः ।
भूयोऽवदत् सुकुपितोऽथ तपस्विराडा–
कारी स्वयंकृतफलं द्रुतमेव लब्ध्वा ॥६७॥

---

(६१) जैसे कीचड़ से युक्त पानी को कीचड़ से शुद्ध करना असंभव है, जैसे सुरा से लिप्त व्यक्ति को सुरा से शुद्ध करना असंभव है, उसी प्रकार इस प्राणीहिंसा को यज्ञ से शुद्ध करना असंभव है। (६२) सरिता के बिना पानी कैसा, चन्द्रमा के बिना रात्रि कैसी, वर्षा के बिना मेघ कैसा, उसी प्रकार दया के बिना धर्म कैसा ? (६३) दयारूपी नदी के महातट पर धर्म-रूपी घास के अंकुर होते हैं। उनके सूख जाने पर फिर वे कैसे विकसित होंगे ? (६४) प्राणियों के प्रति की जाने वाली दया जो कार्य करती है वह कार्य समस्त वेद (भी) नहीं कर सकते, समस्त यज्ञ (भी) नहीं कर सकते, तथा समस्त तीर्थस्थानों में किए गये स्नान (भी) नहीं कर सकते हैं। (६५) हे युधिष्ठिर। एक ओर सुवर्ण का मेरुपर्वत और बहुरत्ना पृथ्वी का दान किया जाय और दूसरी ओर एक प्राणी को जीवनदान दिया जाये, तब भी पहला दान दूसरे के बराबर नहीं होगा। (६६) हे भारत ! सभी तीर्थों में किये गये स्नान और सभी यज्ञ प्राणियों के अभयदान की सोलहवीं कला के भी तुल्य नहीं हैं। इस प्रकार आपके मत में भी है, वह यथार्थ है, कारण कि भगवद्वचन उसमें प्रमाण है। (६७) पार्श्व ने वहाँ अपनी युक्ति के द्वारा उसे जीत लिया। वह मुनि अवहेलना (अपमान) सहित चुप हो गया। पुनः वह तपस्विराज शीघ्र ही अपने कार्य का फल प्राप्त करके क्रोधित होकर बारबार बोला।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्थं क्रुधा ज्वलितमानस एष पापः
प्राग्बद्धवैरकलुषः कमठस्वरूपः ।
मृत्वा कुदृग्भवनवासिषु मेघमाली-
त्यासीत् सुराधम इतोऽप्यवमाननार्तः ॥६८॥

तन्नागदम्पतियुगं जिनलब्धबोधं
मृत्वा बभूव धरणः स च नागराजः ।
नागी तदग्रमहिषीति महानुभाव-
संसर्गजं फलमुदेति न चाल्पभूति ॥६९॥

पार्श्वः स्वसैन्यसहितो निजगेहमागात्
सोऽथान्यदा वनविहारविनोदहेतोः ।
तत्रोपकाशि मधुमासि च नन्दनस्थ-
सौधे स नेमिचरितं लिखितं विलोक्य ॥७०॥

धन्यो व्यचिन्तयदहो ! भगवानरिष्ट-
नेमिः कुमार इह यो जगृहे सुदीक्षाम् ।
तन्निष्क्रमाम्यहमपीति विमृश्य दानं
साम्वत्सरं स वितताार विरक्तचेताः ॥७१॥

मत्वा तत्त्वं नित्यमात्मस्वरूपं
भोगानङ्गदमङ्गवद् भङ्गुरांश्च ।
दीक्षाकालं वीक्ष्य शुद्धावधिस्व-
ज्ञानेनेत्थं भावयामास भावम् ॥७२॥

---

(६८) इस प्रकार क्रोध से जले हुए मन वाले उस पापी पूर्वबद्ध वैर से कलुषित कमठ की आत्मा यहाँ से भी दुःखी होकर मरकर मिथ्यादृष्टि भवनवासी देवों में मेघमाली नामक अधमदेव हुई। (६९) जिनदेव से ज्ञान प्राप्त करके वह नागदम्पतियुगल मरकर नागराज धरणेन्द्र बना और सर्पिणी उसकी पटरानी बनी क्योंकि बड़े आदमियों के संसर्ग का फल अल्प ऐश्वर्य वाला नहीं होता है। (७०) पार्श्वकुमार अपनी सेना सहित अपने घर आ गये। दूसरे दिन वनविहार के मनोरंजन हेतु काशी के समीप चैत्रमास में नन्दनवन के भवन में आये हुए उसने, वहाँ लिखे हुए नेमिचरित को देखा। (७१) उसे देख कर उसने सोचा—धन्य हैं वे अरिष्ट नेमिकुमार जिन्होंने सुन्दर दीक्षा ग्रहण की। मैं भी दीक्षा लूँ ऐसा विचार कर उन्होंने विरक्तचित्त होकर साम्वत्सरिक दान किया। (७२–७३) नित्यआत्मस्वरूप तत्त्व को समझ कर, सांसारिक भोग को क्षणभंगुर जानकर, अपने शुद्ध अवधिज्ञान से

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्वाहं पूर्वं वारणात्माऽथ सम्प्र–
स्यासं साक्षाद् विश्वविश्वैकपूज्यः ।
श्रेयानस्मान्मोक्षमार्गाभियोगः
संसारित्वं केवलं बन्धहेतुः ॥७३॥

भ्राम्यत्येष भ्रान्तिमूढो दुरात्मा
गत्यादीनां मार्गणानां विवर्तैः ।
ज्ञानी तस्मान्नापि संसारपङ्के
लिप्येतासौ कर्मभावाद् विरक्तः ॥७४॥

स्त्रीभोगादौ भेषजे तत्परः स्या–
देष प्राणी तीव्रकामज्वरार्तः ।
नायं भोगः किन्तु रोगोपचारो
नीरोगः किं भेषजं क्वापि कुर्यात् ॥७५॥

निर्द्वन्द्वत्वं सौख्यमेवाहुराप्ताः
सद्वन्द्वानां रागिणां तत्कुतस्त्यम् ।
तृष्णामोहायासकृच्चान्यनिघ्नं
सौख्यं किं स्यादापदां भाजनं यत् ? ॥७६॥

सौख्यं स्त्रीणामङ्गसङ्गाद्यदि स्यात्
तादृग् बाढं तत् तिरश्चामपीह ।
यद् वा निम्बोद्भूतकीटोऽतिमिष्टं
मन्येतासौ रागवांस्तद्रसं वा ॥७७॥

---

दीक्षाकाल जानकर वे इस प्रकार से भाव करने लगे कहाँ मैं पहले हाथीरूप था, (और) इस समय सम्पूर्ण विश्व का पूज्य हूँ। इसलिए मोक्षमार्ग का अनुसरण ही कल्याणकर है तथा सांसारिकता ही बन्धन का हेतु है। (७४) भ्रान्ति से मूढ़ यह दुरात्मा गति आदि मार्गणा स्थानों के विवर्तों से संसरण कर रही है। अतः ज्ञानी पुरुष कर्मभाव से विरक्त होकर संसार रूपी कीचड़ में लिप्त नहीं होते हैं। (७५) यह प्राणी तीव्र-कामज्वर से पीड़ित होकर स्त्री भोगादि औषधि में तत्पर रहता है। यह भोग नहीं है, किन्तु रोगों का उपचार है। क्या स्वस्थ व्यक्ति कभी भी औषधि का प्रयोग करता है ? (७६) तृष्णा, मोह और आयास का जनक, अन्य के अधीन और आपत्तियों का स्थान जो है उसे क्या सुख कहा जा सकता है ? (७७) स्त्रियों के अंगसम्पर्क से ही यदि सुख का अनुभव हो तो वह पशुओं को भी होता है। अथवा नीम के वृक्ष में पैदा हुआ कीड़ा उसके रस का रागी होने के कारण (रस को) अति मीठा ही मान लेता है।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वे भोगास्तावदापातरम्याः
पर्यन्ते ते स्वान्तसन्तापमूलम् ।
तद्धानाय ज्ञानिनां द्राग् यतन्ते
भोगान् रोगानेव मत्वाऽऽत्ततत्त्वाः ॥७८॥

मन्येतासौ सौख्यमायासमात्रं
भोगोद्भूतं श्वा दशन्नस्थि यद्वत् ।
अज्ञानात्माऽसंविदानः स्वनिघ्नं
ब्रह्माद्वैतं संविदानन्दसान्द्रम् ॥७९॥

स्पर्शाद्धस्ती भक्ष्यलौल्याज्झषात्मा
गन्धाद् भृङ्गो दृष्टिलौल्यात् पतङ्गः ।
गीतासङ्गाज्जीवनाशं कुरङ्गो
नश्यत्येतान् धिक् ततो भोगसङ्गान् ॥८०॥

कर्मोद्भूतं यत् सुखं यच्च दुःखं
सर्वं दुःखं तद्विदुर्दुःखहेतोः ।
यद्वा भोज्यं स्वाद्वपि स्याद् विषाक्तं
पर्यन्ते तत् प्राणविघ्नाय सर्वम् ॥८१॥

तस्माद् ब्रह्मा तमव्यक्तलिङ्गं
ज्ञानानन्तज्योतिरुद्योतमानम् ।
नित्यानन्दं चिद्गुणोज्जृम्भमाणं
स्वात्मागमं शर्मधाम प्रपद्ये ॥८२॥

---

(७८) जिन्होंने तत्त्व समझ लिया है और जो ज्ञानी हैं वे भोगों को रोग ही मानकर उन्हें नष्ट करने के लिए शीघ्र प्रयत्न करते हैं। (७९) जैसे हड्डी को काटता हुआ कुत्ता तज्जन्य परिश्रम को सुख समझता है, वैसे जो आदमी भोगजन्य केवल परिश्रम को ही सुख समझता है वह अज्ञानी है और वह स्वतन्त्र तथा ज्ञानानंदमय ब्रह्माद्वैत को नहीं जानता। (८०) स्पर्श से हाथी, भक्ष्य की लोलुपता से मछली, गन्ध से भौंरा, दृष्टि की लालसा से पतङ्गा, गीत सुनने से हिरण–ये सभी नष्ट हो जाते हैं। अतः भोगासक्ति को धिक्कार है। (८१) कर्मों से उत्पन्न चाहे सुख हो या दुःख हो, वह सब दुःख ही है, क्योंकि वह सब दुःखोत्पादक है। अथवा स्वादु वस्तु जो भक्षणयोग्य परन्तु विषाक्त है, अन्त में वह प्राणघात के लिए ही होती है। (भोजन स्वादिष्ट होने पर भी अगर विषमिश्रित हो तब वह अन्त में प्राणघात करेगा ही)। (८२) अतः अव्यक्तलिङ्ग, ज्ञान की अनन्त ज्योति से प्रकाशमान, नित्यानन्द, आत्मगुणों के पूर्ण प्राकट्य वाले, कल्याण के धाम और ब्रह्माद्वैतरूप अपनी आत्मा के सुख को ही मैं प्राप्त करूँ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्थं साक्षाज्ज्ञानवैराग्यनिष्ठः
सर्वासङ्गात् त्यक्तरङ्गो जिनेन्द्रः ।
तावद् देवैरेष सारस्वताद्यैः
स्वर्गायातैः संस्तुतः स्तोत्रवृन्दैः ॥८३॥

पूर्वं मुक्त्वा पुष्पवृष्टिं सुरास्ते
सद्गन्धाढ्यां पारिजातद्रुमोत्थां ।
वर्द्धस्वेश ! त्वं जयेत्यं दिगीर्भिः
पार्श्वं स्तोतुं ते समारेभिरेऽथ ॥८४॥

धातारं त्वामामनन्ति प्रबुद्धा
जेतारं त्वां सर्वकर्मद्विषां वा ।
प्राग्नेतारं धर्मतीर्थस्य देव !
ज्ञातारं वा विश्वविश्वार्थवृत्तेः ॥८५॥

उद्धर्ता त्वं मोहपङ्काज्जनानां
निर्मग्नानां धर्महस्तावलम्बैः ।
बन्धुः साक्षादत्र निष्कारणस्त्वं
त्रेधं साक्षान्मोक्षमार्गं विवक्षुः ॥८६॥

साक्षाद् बुद्धस्त्वं स्वयंबुद्धरूपः
स्वामिन् ! वेद्यं वेदिताऽसि त्वमेव ।
ध्येयो ध्याता ध्यानमाद्यः स्वयम्भू-
र्बोध्योऽस्माभिस्तन्नियोगो निमित्तम् ॥८७॥

---

(८३) इस प्रकार साक्षात् ज्ञान और वैराग्य में निष्ठा वाले, सभी प्रकार की आसक्ति को छोड़ने से रागमुक्त जिनेन्द्र की स्वर्ग से आये सारस्वतादि देवताओं ने सुन्दर स्तोत्रों से स्तुति की। (८४) सबसे पहले उन देवों ने सुगन्धित पारिजात वृक्षों की पुष्पवृष्टि की। 'हे भगवन् !, आपकी जय हो, आपकी उन्नति हो,' इत्यादि वचनों से पार्श्व की स्तुति करना प्रारम्भ किया। (८५) हे देव !, ज्ञानी लोग आपको विश्व का पालक समझते हैं, आपको ही सभी कर्मरूपी शत्रुओं का विजेता मानते हैं, आपको ही धर्मतीर्थ का प्रथम नेता जानते हैं और आपको ही विश्व के सभी पदार्थों का ज्ञाता जानते हैं। (८६) आप ही धर्मरूपी हाथ की सहायता देकर मोहरूपी कीचड़ में डूबे हुए लोगों को इस कीचड़ से बाहर निकालते हैं। यहाँ आप (लोगों के) निष्कारण मुख्यरूप से बान्धव हैं। आपने ही मुख्यरूप से त्रिविध (अर्थात् सम्यक् ज्ञान-दर्शन-चारित्रिक रूप) मोक्ष मार्ग का उपदेश दिया है। (८७) स्वयं बुद्धरूप हैं। हे स्वामिन् !, ज्ञेय भी आप हैं और ज्ञाता भी आप ही हैं। आप ही ध्येय हैं, ध्याता हैं और ध्यान भी आप ही हैं। आद्य स्वयंभू भी आप ही हैं। आप हमारे तो केवल निमित्त से, नियति से ही हैं।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्माद् विश्वस्योपकाराय धातः !
प्रौढिं धत्तां धर्मतीर्थप्रवृत्तौ ।
त्वामासेव्य प्रीयतां भव्यलोकः
पर्जन्यं वा चातकः प्रावृषेण्यम् ॥८८॥
स्तुत्वैवं ते स्वर्ययुर्देवदेवं
तावच्चान्ये नाकिनः शक्रमुख्याः ।
नानावेषाः खादवातीतरंस्ते
तस्थुः काशीं सर्वतः सन्निरुध्य ॥८९॥
सर्वे सम्भूयाऽभिषिच्य प्रभुं ते
भूषावेषैर्भूषयांचक्रुरुच्चैः ।
दिव्यैर्माल्यैर्भूषणैरेष गन्धैः
रेजेऽम्भोदः शक्रचापांशुभिर्वा ॥९०॥
दध्वान दुन्दुभिरवो जयशब्दमिश्रः
प्रोत्तुङ्गमङ्गलमृदङ्गनिनादसान्द्रः ।
नृत्यं व्यधुः सलयमप्सरसो जगुश्च
शुभ्रं यशो जिनपतेः सुरगायनास्ते ॥९१॥
आपृच्छ्य बन्धुजनमेष समारुरोह
वैरङ्गिकोऽथ विशदां शिबिकां विशालाम् ।
पार्श्वः कृताष्टमतपाः स च पौषकृष्णै-
कादश्यहन्यवनिपैस्त्रिशतीप्रमाणैः ॥९२॥

(८८) हे धाता !, आप संसार के उपकार के लिए धर्मतीर्थ की प्रवृत्ति में प्रौढ़ता को धारण करें । आपकी सेवा करके यह भव्यलोक प्रसन्न हो, जैसे चातक (पपीहा) वर्षा के बादल को देखकर प्रसन्न होता है । (८९) इस प्रकार वे देवों के देव जिनकी स्तुति करके स्वर्ग को चले गए । (उसके पश्चात्) तुरन्त ही इन्द्र आदि अन्य देवता लोग नाना वेश धारण किए हुए आकाश से उतरे और सब तरफ से काशीपुरी को देखकर खड़े हो गये । (९०) सभी ने एकत्रित होकर प्रभु का अभिषेक करके दिव्यमालाओं, आभूषणों और सुगन्धित द्रव्यों से प्रभु को सजाया । वह प्रभु इन्द्रधनुष की कान्ति से शोभित बादल की तरह विराजमान थे । (९१) मृदङ्ग की मंगल और ऊँची ध्वनि से गंभीर और जयघोष से मिश्रित दुन्दुभी की आवाज होने लगी । लयपूर्वक अप्सराओं ने नृत्य करना प्रारंभ किया । दिव्यगायक जिनपति पार्श्वकुमार के स्वच्छ यश का गुणगान करने लगे । (९२–९३) उसके पश्चात् अष्टमतपवाले विरक्त पार्श्व बन्धुजनों की अनुज्ञा लेकर शुभ्र एवं विशाल शिबिका में चढ़े । पौष माह के कृष्ण पक्ष की एकादशी के दिन पूर्वाह्न में उद्यानगत आश्रमपद में,



Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्वाण्ह आश्रमपदे विपिने त्वशोक–
मूले स पार्श्वभगवान् व्रतमाददानः ।
केशानलुञ्चदभिनम्य स सर्वसिद्धान्
संत्यज्य सङ्गमखिलं त्रिविधं त्रिधेति ॥९३॥
सावद्यादखिलाद् विरम्य जगृहे सामायिकं संयमं
तद्भेदान् व्रतगुप्तिचारुसमितिस्फारान् विरागः प्रभुः ।
प्रत्यैच्छन्मघवा सुरत्नपटलीपात्रेण तन्मूर्द्धजान्
सानन्दं त्रिदशास्तु दुग्धजलधावादाय तांश्चिक्षिपुः ॥९४॥
तं जातरूपधरमीशमुदग्रदीप्तिं
नानासुरासुरगणार्चितसुन्दराङ्गम् ।
दृष्ट्वा सहस्रनयनः किल नाप तृप्तिं
नेत्रैः सहस्रगणितैरपि सप्रमोदः ॥९५॥
तं जिनेन्द्रमथ वासवादय–
स्तुष्टुवुः प्रमदतुष्टमानसाः ।
भारतीभिरभितः सनातनं
सूक्तियुक्तिविशदार्थवृत्तिभिः ॥९६॥
त्वं विभुस्त्रिभुवनैकभूषण–
स्त्वं जगज्जनसमूहपावनः ।
त्वामनन्तगुणमीश ! यत् स्तुम–
स्तद्धि भक्तिमुखरत्वमेव नः ॥९७॥

---

अशोक वृक्ष के नीचे, तीनसौ राजाओं के साथ उन्होंने व्रत ग्रहण किया । तीनप्रकार के अखिल संग को त्रिधा त्यागकर सर्वसिद्धों को नमस्कार करके उन्होंने केश का लुंचन किया । (९४) सभी दोषों से विरक्त होकर विरागी प्रभु ने सामायिकरूपसंयम और उसके व्रत, गुप्ति, समिति ऐसे अनेक भेदों को ग्रहण किया । इन्द्र ने उन केशों को सुन्दर रत्नपात्र में स्थापित किया तथा आनन्दपूर्वक देवताओं ने उसे क्षीरसागर में विसर्जित कर दिया । (९५) स्वर्ण के रूप को धारण करने वाले, अत्यन्त तेजस्वी, अनेक देव तथा असुरों के द्वारा जिनके शोभन अंगों का पूजन किया गया है ऐसे उस पार्श्व को देखकर, प्रसन्न इन्द्र को अपने हजार नेत्रों से भी तृप्ति नहीं हुई । (९६) उस सनातन जिनेन्द्र भगवान् की इन्द्रादि देवताओं ने प्रसन्नमन होकर शोभन उक्तिओं, युक्तिओं और विशद अर्थवाली रीतिओं से पूर्ण वाणी द्वारा स्तुति की । (९७) हे प्रभो!, आप व्यापक हैं, त्रिलोकी के अनुपम भूषण हैं, सांसारिक लोगों को पवित्र करने वाले हैं । अनन्तगुणवाले आपकी हे प्रभु ! हम जो स्तुति करते हैं वह तो मात्र आपके प्रति भक्ति के कारण हमारी वाचालता ही है ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यन्निरस्तजगदुग्रसंज्वरं
विश्वविश्वजनतैकपावनम् ।
गाङ्गवारिसवनं पुनातु वा
त्वद्व्रतग्रहणमद्य नः प्रभो ! ॥९८॥

राज्यसम्पदमिमां चलाचला-
माकलय्य भगवान् भवानिति ।
आजवंजवजकष्टहानये
प्रत्यपद्यत विशुद्धसंयमम् ॥९९॥

स्नेहरागनिगडं विभिद्य यत्
त्वं मदान्धगजवद् वनं गतः ।
सावरोधजनकादिबन्धुता
नावरोधनकरी तवाभवत् ॥१००॥

जीवितं किल शतह्रदाचलं
स्वप्नभोग इव भोगसङ्गमः ।
सम्पदो जलतरङ्गभङ्गुरा
इत्यवेत्य शिवमार्गमासदः ॥१०१॥

यद्विहाय नृपतारमामिमां
रज्यते स्म भगवांस्तपःश्रिया ।
काङ्क्षते यदिह मुक्तिवल्लभां
वीतरागपदवी कुतस्त्वयि ! ॥१०२॥

---

(९८) हे प्रभो !, आपका यह व्रतग्रहण आज हमें गंगाजल के स्नान के समान पवित्र करे । यह व्रतग्रहण संसार के सभी उत्ताप को दूर करने वाला तथा सम्पूर्ण विश्व को पवित्र करने वाला है । (९९) राज्य की यह सम्पत्ति चलाचल है ऐसा सोचकर आपने शीघ्र ही कष्ट की हानि के लिए विशुद्ध संयम को स्वीकार किया है । (१००) मदान्ध हाथी की तरह आप स्नेह और राग की जंजीर को तोड़कर वन में गए । पिता आदि की अवरोधकारी सगाई (संबंध) आपके लिये अवरोधक न हुई । (१०१) आपने जीवन को बिजली के समान चंचल, सांसारिक भोगों स्वप्नभोग के समान (मिथ्या), सम्पत्ति को जल-तरंगों के समान क्षणभंगुर समझकर आप ने मोक्ष को अपनाया है । (१०२) इस राज्यलक्ष्मी को छोड़कर आपने जो तपःश्री से अनुराग किया तथा यहाँ मुक्तिप्रिया की जो इच्छा की, तो फिर आपमें वीतरागता कैसे मानी जाये ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वं परं च सकलं विविच्य तद्
वस्तु वास्तवमनन्तधर्मकम् ।
स्वात्मवस्तुनि यदासजस्तरां
तत् तवाऽस्ति समदर्शिता कुतः ! ॥१०३॥

शर्म यच्च परनिघ्नमत्यज-
स्तत् स्वनिघ्नमभिकाङ्क्षसे भृशम् ।
स्वां विहाय सकलां नृपश्रियं
तावकी विरतिरद्‌भुता विभो ! ॥१०४॥

भेजिरे किल पुरा सुरासुरा-
स्त्वं तथैव भुवनेश साम्प्रतम् ।
काममेव चकमे व्रतश्रियं
तत् तपोभ्युपगमस्तवाऽद्‌भुतः ॥१०५॥

मादृशैः सुचरितं भवादृशां
विश्वविश्वप ! न चास्ति गोचरम् ।
तत् त्वमेव वचसामगोचर-
स्त्वां शरण्यशरणं श्रिया वयम् ॥१०६॥

---

(१०३) स्व और पर सकल वस्तु वास्तव में अनन्त धर्मों वाली होती है ऐसा विवेक से निश्चय करने के बाद भी अपनी आत्मारूप वस्तु में आप जो विशेषतः आसक्त हो गये हैं, तो फिर आपकी समदर्शिता कहाँ ? (१०४) अपनी सम्पूर्ण राज्यलक्ष्मी को छोड़कर पराधीन सुख को आपने छोड़ दिया और स्वाधीन सुख की आप उत्कट इच्छा करते हो । हे प्रभो !, आपकी यह विरक्ति बड़ी ही अद्‌भुत है । (१०५) हे भुवनेश !, देवताओं और असुरों ने जो पहले आपकी सेवा की थी, उसी प्रकार अब भी सेवा करते हैं, और आप व्रतश्री की अत्यन्त इच्छा करते हैं। इसलिए आपके तप का स्वीकार अद्‌भुत है । (१०६) हे सम्पूर्ण विश्व का पालन करने वाले प्रभो !, मुझ जैसों के द्वारा आप जैसों का सुन्दर चरित नहीं जाना जा सकता । आप वाणी से अगोचर हैं । शरणागत की रक्षा करने वाले आपके हम शरण में आये हैं ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्तुत्वैवं त्रिदशाधिपास्त्रिजगतामीशं व्रतश्रीभृतं
जग्मुः स्वालयमेव बन्धुजनता प्रापाथ शोकार्दिता ।
निःसङ्गो भगवान् वनेषु विहरन्नास्ते मनःपर्य्यव-
श्रीसंश्लेषससम्मदः स यमिनां धुर्यः परं निर्वृतः ॥१०७॥

इति श्रीमत्परापरपरमेष्ठिपदारविन्दमकरन्दसुन्दररसास्वादसम्प्रीणित-
भव्यभव्ये पं०श्रीमेरुविनेयपं०श्रीपद्मसुन्दरविरचिते श्रीपार्श्व-
नाथमहाकाव्ये श्रीपार्श्वनिष्क्रमणं नाम पञ्चमः सर्गः ॥

---

१०७) इस प्रकार देवतालोग व्रतश्री को धारण करने वाले जगत्स्वामी की स्तुति करके अपने स्थान को चले गये । बन्धुजन शोक से पीड़ित होकर अपने घर गये । भगवान् जिनदेव वनों में निःसङ्ग विहार करते हुए मनःपर्यवज्ञानश्री के आश्लेष से खुश हुए । संयमीजनों में अग्रगण्य ऐसे वे (पार्श्व) परम शान्ति में स्थित रहे ।

इति श्रीमान्परमपरमेष्ठी के चरणकमल के मकरन्द के सुन्दर रस के स्वाद से भव्यजनों को प्रसन्न करने वाले, पं० श्रीपद्ममेरु के शिष्य पं० श्री पद्मसुन्दर कवि द्वारा रचित श्रीपार्श्वनाथमहाकाव्य में "श्रीपार्श्वनिष्क्रमण" नामक पाँचवाँ सर्ग समाप्त हुआ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## षष्ठः सर्गः

अथाष्टमतपःप्रान्ते श्रीपार्श्वो भगवान् स्वयम् ।
भिक्षाणान्वेषणे बुद्धिं चक्रे कायस्थितीच्छुकः ॥१॥
यतिमार्गप्रदर्शित्वं स्वतनुस्थिरिकाशिता ।
सुखेन मुक्तियानं स्यादित्यर्थं मुनिभोजनम् ॥२॥
न कृशीकुरुते कायं मुनिर्नोपचिनोति वा ।
किन्तु संयमवृध्द्यर्थं प्रयतेत ननु स्थितौ ॥३॥
कर्मणां निर्जरार्थायोपवासादेरुपक्रमः ।
तनुस्थित्यर्थमाहारो यतीनां सूत्रसूचितः ॥४॥
रसासक्तिमतन्वानो यात्रायै संयमस्य तु ।
गृह्णन्निर्दोषमाहारं मुनिः स्यान्निर्जरालयः ॥५॥
इति निश्चित्य भगवान् पार्श्वः संयमवर्द्धने ।
कृतोद्योगश्चचालायं पुरं कूपकटं प्रति ॥६॥
युगमात्रस्फुरद्दृष्टिरीर्यामार्गं विशोधयन् ।
स प्रतस्थेऽखिलां पृथ्वीं पादन्यासैः पवित्रयन् ॥७॥
क्रमेण विहरन् मध्येनगरं स समासदत् ।
सदा सोत्कण्ठितो लोकः श्रीपार्श्वस्य दिदृक्षया ॥८॥

---

१ इसके पश्चात् अष्टमतप के अन्त में कायस्थिति के इच्छुक भगवान् पार्श्व ने स्वयं भोजन ढूंढने का विचार किया। (२) 'विवेकपूर्ण भोजन लेना जिसका एक अंग है ऐसे यतिमार्ग को दिखलाने के लिए, अपने शरीर को टिकाये रखने के लिए और सुखपूर्वक (अर्थात् बिना दुर्ध्यान) मुक्तिमार्ग में गति हो सके इसलिए मुनि को भोजन लेना होता है। (३) मुनि न तो शरीर को कृश करे न ही पुष्ट करे, किन्तु संयम को बढ़ाने के लिए ही अपने शरीर को टिकाये रखने का प्रयत्न करे। (४) कर्मों की निर्जरा के लिए उपवास आदि का प्रारंभ होता है। शरीर की स्थिति के लिए मुनियों के आहार का सूत्रों में सूचन किया गया है। (५) रस में लोलुपता नहीं करने वाला, केवल संयमयात्रा के निर्वाह के लिए दोषरहित भोजन करने वाला मुनि कर्मनिर्जरा का स्थान है।' (६) ऐसा निश्चय करके भगवान् पार्श्व ने अपने संयम को वृद्धि में प्रयत्न करते हुए कूपकट नामक नगर के प्रति प्रस्थान किया। (७) चार हाथ मात्र तक फैलती दृष्टि से (बहुत सूक्ष्मता के साथ) चलने के रास्ते को (कीट पतंग आदि की हिंसा न हो इसलिए) बराबर देखकर उन्होंने सम्पूर्ण पृथ्वी को अपने चरणन्यास से पवित्र करते हुए प्रस्थान किया। (८-९) क्रम से विचरते हुए नगर के मध्य वे पहुँचे तब वहाँ के लोग उत्कण्ठित होकर श्रीपार्श्व को देखने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतोऽमुतश्च धावन्तो लोकाः कलकलाकुलाः ।
समुज्झितान्यकर्तव्याः प्रणेमुस्तं कृतादराः ॥९॥
स एष भगवान् पार्श्वः साक्षाज्जङ्गमभूधरः ।
यद्दृष्ट्या फलिते नेत्रे यच्छ्रुत्या सफले श्रुती ॥१०॥
यश्चिन्तितोऽपि चित्तेन जन्मिनां कर्मसंक्षयम् ।
कुरुते स्मरणान्नाम्नो यस्य पूतो भवेज्जनः ॥११॥
सोऽयं घनाञ्जनश्यामस्त्यक्तसङ्गः सनातनः ।
निष्कामो विचरत्येष दिष्ट्या दृश्यः स एव नः ॥१२॥
एवमुत्पिञ्जला लोकाः पार्श्वदर्शनलालसाः ।
अहंपूर्विकया जग्मुर्विदधाना मिथःकथाम् ॥१३॥
स्तनं धयन्तं काऽपि स्त्री त्यक्त्वाऽधावत् स्तनंधयम् ।
प्रसाधितैकपादाऽगात् काचिद् गलदलक्तका ॥१४॥
खलु भुक्तेति काऽप्याह पश्यन्ती भगवन्मुखम् ।
काऽपि मज्जनसामग्रीमवमत्य गतान्तिकम् ॥१५॥
केऽपि पूजां वितन्वन्तः पौराः कौतुकिनः परे ।
गतानुगतिकाश्चान्ये पार्श्वं द्रष्टुमुपागमन् ॥१६॥

---

की इच्छा से, इधर-उधर दौड़ते हुए, शोरगुल मचाते हुए, अपने अन्य कार्यों को छोड़ते हुए, आदरपूर्वक उस पार्श्व को प्रणाम करने लगे। (१०) 'वह भगवान् पार्श्व साक्षात् चलते-फिरते पर्वत हैं (अर्थात् जङ्गम होने पर भी अचल हैं), इसके कारण ही उन्हें देखने से दोनों नेत्र सफल हो गये तथा उन्हें सुनने से दोनों कान भी तृप्त हो गये। (११) मन से उनका चिन्तन करने पर वे जन्मधारियों के कर्म का क्षय कर देते हैं; उनके नामस्मरण मात्र से मनुष्य पवित्रात्मा हो जाता है। (१२) गाढ़ काजल के समान काले, आसक्ति से रहित, सनातन, निष्काम ऐसे वे (पार्श्व) विचरण कर रहे हैं। हमारा सौभाग्य है कि उनका ही दर्शन हमें सुलभ हुआ।' (१३) इस प्रकार सोचते हड़बड़ाहट के साथ पार्श्व के दर्शनों के इच्छुक व्यक्ति 'मैं पहला हूँ, मैं पहला हूँ, ऐसे वचन बोलते हुए और आपस में चर्चा करते हुए गये। (१४) कोई महिला अपने स्तनपान करते हुए बच्चे को ही छोड़कर दौड़ी। कोई एक ही पैर में महावर लगाये हुए दौड़ने लगी और कोई गलते हुए अलते वाली स्त्री दौड़ रही थी। (१५) किसी स्त्री ने भगवान् के मुख को देखकर 'तृप्त हो गई' ऐसा कहा। कोई महिला स्नान सामग्री को भी पटककर (पार्श्व के) पास पहुँची। (१६) कोई नागरिक पूजा करते हुए, कुछ दूसरे कौतूहलवश और अन्य दूसरे देखादेखी पार्श्व को देखने पहुँचे।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मत्तेभलीलया पार्श्वमापतन्तं महेश्वरः ।
धन्याह्वय उपागत्य तत्क्रमौ प्रणनाम सः ॥१७॥
त्रिः परीत्य प्रभुं नत्वा पञ्चाङ्गप्रणतिक्रमैः ।
सन्तुष्टोऽसौ प्रमोदातिरेकात् पुलकिताङ्गकः ॥१८॥
स श्रद्धादिगुणोपेतो महापुण्यसमन्वितः ।
निर्दोषं प्रासुकाहारं ददौ भगवते मुदा ॥१९॥
तद्गेहे रत्नवृष्टिस्तु पपात गगनाङ्गणात् ।
महादानफलश्रेणी सद्यः प्रादुरभूदिव ॥२०॥
दिवोऽपतत् प्रसूनानां वृष्टिः सद्गन्धबन्धुरा ।
महापुण्यलतायाः किं प्रत्यग्रा सुमनस्ततिः ? ॥२१॥
आमन्द्रमानका नेदुर्नादापूरितदिग्मुखाः ।
अवावा पुष्परजसां मन्दं शीतो मरुद् ववौ ॥२२॥
अहो! पात्रम् अहो! दानम् अहो! दातेति खाङ्गणे ।
प्रमोदमेदुरस्वान्तैर्देवैरुज्जगिरे गिरः ॥२३॥
धन्यंमन्यस्तदा धन्यः स्वं कृतार्थममन्यत ।
यत् पार्श्वः स्वपदन्यासैःपुनान्मद्गृहाङ्गणम् ॥२४॥
वनं जगाम भगवान् विधाय स्वतनुस्थितिम् ।
धन्योऽपि तमनुव्रज्य कियद्दूरं न्यवीवृतत् ॥२५॥

(१७) मस्त हाथी की लीला से आते हुए पार्श्व को देखकर धन्य नामक महेश्वर ने समीप जाकर पार्श्व के चरणों में प्रणाम किया। (१८) तीन परिक्रमा करके, पञ्चाङ्गप्रणति से प्रभु को नमस्कार करके वह धन्य प्रसन्नता के भार से अतीव पुलकित गात्र वाला होकर सन्तुष्ट हुआ (१९) श्रद्धादि गुणों से युक्त, महापुण्यों वाले उस राजा ने शुद्ध, निर्दोष आहार भगवान् को प्रसन्नता से दिया। (२०) उसके घर में आकाशमण्डल से रत्नों की वर्षा हुई मानों महादान के फलों की सन्तति तत्काल प्रकट हुई हो। (२१) पुष्पों की सुगन्धित वृष्टि स्वर्ग से होने लगी। महापुण्यलता की क्या वह ताजी पुष्पवर्षा थी ? (२२) दिशाओं के प्रान्तभाग को मुखरित करने वाली दुन्दुभियाँ बजने लगीं, पुष्प के परागों को बहाने वाला शीतल मन्द पवन बहने लगा। (२३) 'अहा ! योग्यपात्र, अहा ! दान, अहा ! दाता,' इस प्रकार से आकाशप्रांगण में प्रमोदनिर्भर मन वाले देवता जोर से वाणी कहने लगे। (२४) धन्य ने अपने को कृतार्थ व धन्य-धन्य समझा कि पार्श्व ने अपने चरणकमलों से मेरे घर के आँगन को पवित्र किया। (२५) अपनी शरीरस्थिति करके (भोजन कार्य करके) पार्श्व भगवान् वन को चले गये। वह धन्य भी थोड़ी दूर तक उनका अनुसरण करके लौट आया।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विधाय पारणां भेजे तपोवनमथो जिनः ।
तपोयोगं समाधाय कायमुत्सृज्य तस्थिवान् ॥२६॥
प्रलम्बितभुजद्वन्द्वः प्रसन्नवदनाम्बुजः ।
दिध्यासुर्विशदध्यानं स तस्थावचलाचलः ॥२७॥
अज्ञानध्वान्तविध्वंसकल्पा तद्देहमन्दिरे ।
सन्मार्गोद्योतिका सद्यो दिद्युते बोधदीपिका ॥२८॥
विज्ञाय हेयोपादेयं गुणदोषान्तरं जिनः ।
विहाय सकलान् दोषानासजत् गुणेष्वलम् ॥२९॥
सर्वसावद्यविरतिं चक्रे सत्यव्रते दृढः ।
अस्तेयनिरतो ब्रह्मचर्यवान्निष्परिग्रहः ॥३०॥
विकालाशनवर्जी स भावयन् व्रतभावनाः ।
व्रते व्रते च प्रत्येकं पञ्च पञ्च प्रपञ्चिताः ॥३१॥
मनोगुप्तीर्यैषणादाननिक्षेपविधानयुक् ।
दृष्टान्नपानाद्यादानमहिंसाव्रतभावनाः ॥३२॥
लोभहास्यभयक्रोधप्रत्याख्यानेन भाषणम् ।
निरवद्यवाचा जल्पो द्वितीयव्रतभावनाः ॥३३॥

---

(२६) जिन भगवान् पारणा करके तपोवन में पहुँचे । (उसके पश्चात्) तपोयोग करके कायोत्सर्ग से स्थित हो गये। (२७) दोनों भुजाएँ लम्बी किये हुए, प्रसन्न मुखकमल वाले विशद ध्यान करने की इच्छावाले वे अचलगिरि की तरह स्थिर रहे । (२८) उनके देहरूपी मन्दिर में अज्ञानान्धकार को नष्ट करने वाली, सन्मार्ग की प्रकाशिका ज्ञानदीपिका शीघ्र ही चमकने लगी। (२९) परित्याज्य व प्राप्तव्य वस्तु के गुणदोष का विभेद जानकर सम्पूर्ण दोषों का परित्याग कर जिनदेव गुणों में ही आसक्त हुए । (३०) सत्यव्रत में दृढ, अचौर्य में रत, ब्रह्मचर्यसम्पन्न और परिग्रहरहित वे सब दोषों से विरत हुए । (३१) वे शाम का भोजन नहीं करते थे (अर्थात् दिन में एक बार ही आहार लेते थे) । (शास्त्र में) विस्तार से जिनका निरूपण किया है उन प्रत्येक व्रत की पाँच-पाँच भावनाओं का वे चिंतन करते थे । (३२) मनोगुप्ति, ईर्यासमिति, एषणासमिति, आदाननिक्षेपणसमिति और आलोकित भोजनपानादि का ग्रहण ये (पाँच) अहिंसाव्रत की भावनाएँ हैं । (३३) लोभप्रत्याख्यान से भाषण, हास्यप्रत्याख्यान से भाषण, भयप्रत्याख्यान से भाषण, क्रोधप्रत्याख्यान से भाषण तथा निर्दोष वाणी से भाषण ये (पाँच) द्वितीय व्रत (सत्य) की भावनाएँ हैं ।

१४

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उचितप्रमिताभीक्ष्ण्यसधर्मावग्रहग्रहः ।
अनुज्ञातान्नपानाशी तृतीयव्रतभावनाः ॥३४॥

स्त्रीणामालोकसंसर्गान् कथाप्राग्रतसंस्मृतीः ।
वर्जयेद् वृष्यमाहारं चतुर्थव्रतभावनाः ॥३५॥

बाह्यान्तर्गतसङ्गेषु चिदचिन्मिश्रवस्तुषु ।
इन्द्रियार्थेष्वनासक्तिः पञ्चमव्रतभावनाः ॥३६॥

धैर्यवत्त्वं क्षमावत्त्वं ध्यानस्यानन्यवृत्तिता ।
परीषहजयश्चैता व्रतेषूत्तरभावनाः ॥३७॥

अष्टमातृपदाढ्यानि सहितान्युत्तरैर्गुणैः ।
निःशल्यानि व्रतान्येवं भावयन् शुभभावनः ॥३८॥

ज्ञानदर्शनचारित्रतपोवीर्यात्मकं च यत् ।
पञ्चधा चरणं साक्षाद् भगवानाचरत्तराम् ॥३९॥

धर्मं दशतयं सानुप्रेक्षं समितिगुप्तिभिः ।
युक्तं परीषहजयैः सम्यक् चारित्रमाचरत् ॥४०॥

---

(३४) उचितस्थानग्रहण, प्रमितस्थानग्रहण, बार बार (अनुज्ञा लेकर) स्थानग्रहण, साधर्मिक के पास से स्थान का ग्रहण और अनुज्ञात अन्न-पान का आहार, ये (पाँच) तृतीयव्रत (अचौर्य) की भावनाएँ हैं। (३५) स्त्रीदर्शन का वर्जन, स्त्रीसंसर्ग का त्याग, स्त्रीकथा का वर्जन, पूर्वानुभूत रतिविलास के स्मरण का त्याग और कामवर्धक आहार का वर्जन ये (पाँच) चतुर्थव्रत (ब्रह्मचर्य) की भावनाएँ हैं। (३६) बाह्येन्द्रिय और अन्तरिन्द्रिय का आकर्षण करने वाले, इन्द्रियग्राह्य सचित्त (सजीव) अचित्त (निर्जीव) और सचित्ताचित्त विषयों में (रूप, रस, गन्ध, स्पर्श और शब्द में) अनासक्ति ये (पांच) पंचम व्रत (अपरिग्रह) की भावनाएँ हैं। (३७) धैर्यवत्ता, क्षमाशीलता, ध्यान की अनन्यवृत्तिता, और परिषह की विजय – ये (चार) व्रतों की उत्तर भावनाएँ हैं। (३८) अष्टप्रवचनमाता से (तीन गुप्ति और पांच समितियों से) आढ्य, उत्तर गुणों से युक्त और शल्यों से (दंभ, भोगलालसा, असत्यासक्ति से) रहित (पांच मूल) व्रतों की (अहिंसा आदि की) भावना शुभभावनावाले वे करते थे। (३९) ज्ञानात्मक, दर्शनात्मक, चारित्रात्मक, तपस्यात्मक, और वीर्यात्मक जो पांच प्रकार के आचार हैं; उनका साक्षात् आचरण भगवान् करते थे। (४०) (अनित्यानुचिंतन, अशरणानुचिंतन, संसारानुचिंतन, एकत्वानुचिंतन, अन्यत्वानुचिंतन, अशुच्यनुचिंतन, आस्रवानुचिंतन, संवरानुचिंतन, निर्जरानुचिंतन, लोकानुचिंतन, बोधिदुर्लभत्वानुचिंतन और धर्मस्वाख्याततत्वानुचिंतन, ये बारह) अनुप्रेक्षा से, (पांच) समितिसे और (तीन) गुप्ति से युक्त दशप्रकार के धर्म का (क्षमा, मार्दव, आर्जव, शौच, सत्य, संयम, तप, त्याग, आकिंचन्य और ब्रह्मचर्य का) वे आचरण करते थे, तथा परीषहजय से युक्त सम्यक् चारित्र का वे आचरण करते थे।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं तपस्यतस्तस्य बिभ्रतोऽसङ्गरङ्गताम् ।
कियान् कालो व्यतीयायाऽन्यदाऽसौ तापसाश्रमम् ॥४१॥

आगाद् दिवाकरश्चास्तमगान्न्यग्रोधशाखिनः ।
बुध्ने तत्रोपकूपं स रात्रौ प्रतिमया स्थितः ॥४२॥

स दध्यौ ब्रह्म चिद्रूपमनन्तज्योतिरात्मसात् ।
तमःपारे स्थितं धाम नित्यमानन्दसुन्दरम् ॥४३॥

यदाप्य भिद्यते ग्रन्थिश्छिद्यन्तेऽखिलसंशयाः ।
क्षयेऽप्यक्षयमद्वैतं तद्धाम शरणं श्रितः ॥४४॥

इतः स कमठात्मा तु मेघमाल्यसुराधमः ।
दृष्ट्वा स्वावधिना वैरं सस्मार स्मयपूरितः ॥४५॥

कृताः क्रोधोद्धुरेणैत्य वेताला वृश्चिका द्विपाः ।
शार्दूलास्तैः शुभध्यानान्नाचालीदचलाचलः ॥४६॥

ततो विचक्रे गगने घनाघनविकुर्वणाम् ।
एनं निमज्जयामीति निश्चित्यासौ सुराधमः ॥४७॥

प्रादुरासन्नभोभागे वज्रनिर्घोषभीषणाः ।
धाराधरास्तडित्वन्तः कालरात्रेः सहोदराः ॥४८॥

---

(४१-४२) इस प्रकार तप करते हुए, अनासक्ति को धारण करते हुए उनका कुछ समय व्यतीत हुआ। एक दिन वे तापसाश्रम में आये। उस समय सूर्यास्त हुआ था। वहाँ बड़ के मूल में कुए के पास रात्रि में वे प्रतिमाध्यान में स्थित हो गये। (४३-४४) चिद्रूप, अनन्तज्योतिरूप, अन्धकार से परे स्थित, नित्यानन्द से सुन्दर और आत्मस्वरूप ब्रह्म का उन्होंने ध्यान किया, जिस ब्रह्म की प्राप्ति होते ही (राग, द्वेष आदि की) सब ग्रन्थियाँ टूट जाती हैं और सब संशय छिन्न हो जाते हैं। क्षय में भी जो अक्षय है ऐसे अद्वैत धाम की उन्होंने शरण ली। (४५) इधर वह कमठात्मा, मेघमाली नामक दुष्ट राक्षस, गर्व से भरा हुआ अपने अवधिज्ञान से पूर्व वैर को स्मरण करने लगा। (४६) (उसने) क्रोधावेश में आकर वेताल, बिच्छू, हाथी, सिंह, आदि बनाये लेकिन पर्वत जैसे अचल वे (जिनभगवान् पार्श्व) उनके द्वारा (बिच्छू आदि द्वारा) शुभ ध्यान से चलित नहीं हुए। (४७) तदनन्तर इस पार्श्व को डुबो दूँगा - ऐसा निश्चय करके उस अधम असुर ने आकाश में कृत्रिम घने मेघ को उत्पन्न किया। (४८) आकाश में वज्र के निर्घोष की तरह भयंकर बिजली युक्त मेघ कालरात्रि के सगे भाई की तरह प्रकट हुए।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कादम्बिनी तदा श्यामाञ्जनभूधरसन्निभा ।
व्यानशे विद्युदत्युग्रज्वालाप्रज्वलिताम्बरा ॥४९॥
नालक्ष्यत तदा रात्रिर्न दिवा न दिवाकरः ।
बभूव धारासम्पातैः वृष्टिर्मुशलमांसलैः ॥५०॥
गर्जितैः स्फूर्जथुध्वानैः ब्रह्माण्डं स्फोटयन्निव ।
भापयंस्तडिदुल्लासैर्वर्षति स्म घनाघनः ॥५१॥
आसप्तरात्रादासारैर्झञ्झामारुतभीषणैः ।
जलाप्लुता मही कृत्स्ना व्यभादेकार्णवा तदा ॥५२॥
आनासाग्रात् पयःपूरः श्रीपार्श्वस्याऽऽगमद् यदा ।
धरणेन्द्रोऽवधेर्ज्ञात्वा तदाऽऽगात् कम्पितासनः ॥५३॥
प्रभोः शिरसि नागेद्रः स्वफणामण्डपं व्यधात् ।
तन्महिष्यग्रतस्तौर्यत्रिकं विदधती बभौ ॥५४॥
वर्षन्तमवधेर्ज्ञात्वा नागेन्द्रो मेघमालिनम् ।
क्रुद्धः साक्षेपमित्यूचे भूयादजननिस्तव ॥५५॥
आः पाप ! स्वामिनो वारिधारा हारायतेतराम् ।
तवैव दुस्तरं वारि भववारिनिधेरभूत् ॥५६॥

---

(४९) श्याम अञ्जन पर्वत के सदृश मेघमाला बिजली की उग्र ज्वालाओं से आकाश को जलाती हुई फैल गई । (५०) उस समय न रात्रि का पता लगता था, न दिन का और न सूर्य का । मूसल जैसी पुष्ट धाराओं से वर्षा होने लगी । (५१) बादलों की गड़गड़ाहट की आवाजों की गर्जनाओं से मानो ब्रह्माण्ड को फोड़ता हुआ और बिजली की चमक से उसको प्रज्वलित करता हुआ घनघोर मेघ बरस रहा था । (५२) सात रात लगातार मूसलाधार वर्षा होने से तथा भीषण झंझावात से भयंकर बनी सम्पूर्ण पृथ्वी जल से पूर्ण एक समुद्र की तरह हो गई । (५३) जब जल का पूर (प्रवाह) पार्श्व की नासिका के अग्रभाग तक आ गया तब कम्पित आसनवाला धरणेन्द्र अवधिज्ञान द्वारा जानकर (वहाँ) आया । (५४) नागेन्द्र (धरणेन्द्र) ने प्रभु पार्श्व के मस्तक पर अपनी फणाओं का मण्डप बना दिया । उस धरणेन्द्र की पत्नी प्रभु के आगे वाद्य गान और नृत्य करती हुई शोभित हुई । (५५) अवधिज्ञान से मेघमाली को वृष्टि करता देखकर नागेन्द्र ने क्रुद्ध होकर आक्षेपपूर्वक कहा–'लानत हो तुम पर । (५६) अरे पापी ! स्वामी के लिए यह जलधारा हार बन गई (गले तक पहुँच गई) और तुम्हारे लिए (यही जलधारा) संसारसागर का दुस्तर जल बन गयी है ।'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रुत्वेति भीतभीतोऽसौ शरण्यशरणं श्रितः ।
नत्वा श्रीपार्श्वमाह स्म क्षमस्व मम विप्रियम् ॥५७॥
प्रभोः शिरस्यहिश्छत्रं शिवापुर्यां दधौ अहम् ।
अहिच्छत्रेति लोके सा तदारभ्य निगद्यते ॥५८॥
सुरा निजाश्रयं जग्मुः भगवानप्रमत्तताम् ।
प्राप्तस्त्र्यशीत्या दिवसैरतिक्रान्तैर्महामनाः ॥५९॥
भगवानप्रमत्तस्तु प्राप्यानन्तगुणां तदा ।
विशुद्धिमुद्धुरां बिभ्रत् क्षपकश्रेणिमासदत् ॥६०॥
आद्यं शुक्लांशमध्यास्य बिभ्राणो ध्यानशुद्धिताम् ।
मोहस्य प्रकृतीः सर्वाः क्षपयामास स क्रमात् ॥६१॥
करणत्रयमासाद्य शुद्धयोऽस्य पृथग्विधाः ।
यथाप्रवृत्तिकरणे शुद्धयः स्युः प्रतिक्षणम् ॥६२॥
पुरः पुरो वर्द्धमानाः सर्वा आचरमक्षणम् ।
अपूर्वकरणे तास्तु स्युरपूर्वा प्रतिक्षणम् ॥६३॥
करणे त्वनिवृत्ताह्वे शुद्धयः स्युः समा मिथः ।
निष्पन्नयोगी याः प्राप्य स्वानन्दान्न निवर्तते ॥६४॥

---

(५७) यह सुनकर भयभीत हुआ मेघमाली शरण्य की शरण में आया । श्रीपार्श्व को प्रणाम कर कहने लगा -'मेरा यह दुष्कृत क्षमा करिये' । (५८) स्वामी के सिर पर शिवापुरी में मैंने अहिछत्र (फणा) धारण किया अतः वह नगरी उस दिन से अहिछत्रा के नाम से कही जाने लगी । (५९) देव अपने स्थान को गये और उदार मनवाले भगवान् तैरासी (८३) दिन बीत जाने पर अप्रमत्तता को प्राप्त हुए । (६०) अप्रमत्त भगवान् पार्श्व अनन्तगुणशालिनी उत्कृष्ट विशुद्धि को धारण करते हुए क्षपकश्रेणि को प्राप्त हुए । (६१-६२-६३) प्रथम शुक्लध्यान का आश्रय करके ध्यानशुद्धि कोधारण करते हुए पार्श्व ने मोह की सभी प्रकृतियों को करणत्रय (यथाप्रवृत्तिकरण, अपूर्वकरण और अनिवृत्तिकरण) के द्वारा क्रमशः नष्ट कर दिया । करणत्रय से सम्पन्न उनकी शुद्धियाँ भिन्न भिन्न प्रकार की थी । यथाप्रवृत्तिकरण में प्रतिक्षण शुद्धियाँ होती रहती हैं और आगे आगे अन्तिम क्षण तक वे सब बढ़ती रहती हैं । अपूर्वकरण में वे शुद्धिया प्रतिक्षण अपूर्व होती हैं । (६४) अनिवृत्तिकरण नाम के करण में शुद्धियाँ आपस में समान मात्रा में होती हैं, जिनको प्राप्त कर निष्पन्नयोगी निजानन्द से च्युत नहीं होते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विशुद्धिभिर्वर्धमानः क्रमात् क्षीणकषायताम् ।
प्राप्याऽधुनाद्रजोऽशेषं स्नातकत्वं प्रपन्नवान् ॥६५॥

समस्तज्ञानदृग्वीर्यादिविघ्नान् घातिसंज्ञकान् ।
शुक्लांशेन द्वितीयेन चिच्छेद समयेऽन्तिमे ॥६६॥

घनघातिविघातेन विश्वदृश्वा जगत्प्रभुः ।
श्रीपार्श्वः केवलं लेभे जगदुद्योतकारणम् ॥६७॥

दीक्षावने त्वशोकाधः पूर्वाह्णे राधया युते ।
चैत्रकृष्णचतुर्थ्यह्नि पार्श्वोऽभूत् केवली तदा ॥६८॥

अनन्तज्ञानदृग्वीर्यचारित्राण्यथ दर्शनम् ।
दानलाभौ च भोगोपभोगावानन्त्यमागताः ॥६९॥

नवकेवललब्धीस्तु भेजे स भगवांस्तदा ।
असुरस्तूपशान्तोऽभूत् ततः सम्यक्त्वमाददे ॥७०॥

अथ जिनपतिरुद्यत्केवलज्ञानभास्वद्—
द्युतिभिरखिलविश्वं द्योतयामास विष्वक् ।
असुरसुरनरेन्द्राः प्राणम भक्तिनम्राः
तमथ वियति चासीद् दुन्दुभेर्मन्द्रनादः ॥७१॥

---

(६५) इस प्रकार उक्त विशुद्धियों से बढ़ते हुए क्रमशः क्षीण कषायता को प्राप्त कर निःशेष (मोहनीय) कर्मरज को झाड़ कर वे स्नातकत्व को प्राप्त हुए। (६६) समस्त ज्ञान-दर्शनवीर्य आदि के प्रतिबन्धक घाति नामक विघ्नों को उन्होंने द्वितीय शुक्लध्यान (ध्यान प्रकार) से अन्तिम समय में खण्डित कर दिया। (६७) विश्वद्रष्टा श्रीपार्श्व ने गाढ़ घातिकर्म के विघात से संसार को प्रकाशित करने वाले केवलज्ञान को प्राप्त कर लिया। (६८) तब दीक्षावन में अशोकवृक्ष के नीचे, पूर्वाह्ण में, अनुराधानक्षत्रयुक्त चैत्रकृष्णा चतुर्थी के दिन पार्श्व प्रभु केवलज्ञानी हो गये। (६९) अनन्तज्ञान, अनन्तदर्शन, अनन्तवीर्य व अनन्त-चारित्र (प्रकट हुए)। लाभ, भोग, उपभोग सभी अनन्त हो गये। (७०) यह होते ही नूतन केवलज्ञानरूप लब्धि उन प्रभु को प्राप्त हुई, असुर उपशान्त हुआ और (परिणामस्वरूप) सम्यक्त्व को प्राप्त हुआ। (७१) इसके पश्चात् जिनदेव प्रभु ने उदित हो रही केवलज्ञान की देदीप्यमान दीप्ति से सम्पूर्ण विश्व को चारों ओर से प्रकाशित कर दिया। असुर, देव तथा मानवों ने भक्तियुक्त होकर उन्हें प्रणाम किया और आकाश में मन्द्रगम्भीर दुन्दुभिनाद होने लगा।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदनुगगनभागादाशु सन्तानकादि–
द्रुमसुरभिसुमानां वृष्टिरुच्चैः पपात ।
कृतजयनिनदास्तेऽवातरन् देवसङ्घा
अहमहमिकया तं भक्तिभारात् प्रणेमुः ॥७२॥

व्यरमयदथ तापं स्वर्नदीवाहगाहा–
दतिशिशिरतरोऽसौ मातरिश्वा विसारी ।
विकचकमलखण्डं कम्पयंल्लीनभृङ्गं
पथि सुरमिथुनानामेष्यतां मन्दमावात् ॥७३॥

व्यरजयदथ कृत्स्नं भूमिभागं समन्तात्
सुरकृतजलवृष्टिर्या पतन्ती नभस्तः ।
अवृजिनजिनधर्माऽऽस्थानविन्यासहेतुं
नवजललवसेकध्वस्तविश्वैकतापा ॥७४॥

विविधमणिगणैस्ते बद्धभूमौ सुरौघा
रजतकनकरत्नैस्त्रीन् सुशालान् विशालान् ।
विदधुरथ चतुर्भिर्गोपुरैः शोभमानान्
उपवनतरुराजीवापिकाम्भोजरम्यान् ॥७५॥

तेषां मध्यगतं हेममाणिक्यरचितं ज्वलत् ।
सिंहासनं तदासीनः श्रीपार्श्वो भगवान् बभौ ॥७६॥

---

(७२) उसके पश्चात् आकाश से संतानक आदि वृक्षों के सुगन्धित पुष्पों की बहुत सी वर्षा हुई । जयजयकार करते हुए देवसमुदाय उतरने लगे । 'मैं पहला, मैं पहला' कहकर भक्तिनम्र होकर वे पार्श्वप्रभु को नमस्कार करने लगे । (७३) गंगानदी में स्नान करने से अतीव शीतल, चारों ओर फैलने वाले वायु ने सन्ताप को दूर कर दिया । लीन भ्रमरों वाले विकसित कमलों को कम्पित करता हुआ वायु मार्ग में आनेवाले सुरमिथुनों के लिए धीरे धीरे बहने लगा । (७४) निष्पाप जिनधर्म ठीक से अपना आसन जमा सके इसलिए नवीन जलबिन्दुओं के सिंचन से विश्व के ताप को नष्ट करने में अद्वितीय, देवों के द्वारा की गई, आकाश से गिरती जलवृष्टि ने चारों ओरसे समस्त पृथ्वी को धूलिरहित कर दिया । (७५) उन देवताओं ने उस बद्धभूमि पर विविध मणिओं से तथा रजत स्वर्ण और रत्नों से विशाल कोट बनाये जो चार गोपुर द्वारों से शोभित थे तथा उपवन, वनराजी, बावड़ी तथा कमलों से सुन्दर लगते थे । (७६) उनके मध्य में स्वर्ण तथा मणि रचित देदीप्यमान सिंहासन था, उस पर बैठे हुए श्रीपार्श्वभगवान् शोभित थे ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शक्राद्याः परिचेरुस्तं भगवन्तं महेज्यया ।
कौसुमैः पटलैर्व्योम प्रोर्णुवानास्ततालिभिः ॥७७॥

विष्वक् समस्तमास्थानं वृष्टिः सौमनसी तता ।
विसृष्टा सुरवाहैर्भ्राम्यद्भृङ्गकुलाकुला ॥७८॥

यस्य पुरस्ताच्चलदलहस्तै–
नृत्यमकार्षीदिव किमशोकः ।
भृङ्गनिनादैः कृतकलगीतः
पृथुतरशाखाभुजवलनैः स्वैः ॥७९॥

त्रैलोक्यस्य श्रियमिव जित्वाऽशेषां
त्रैलोक्येशत्वमथ जिनस्याऽऽचख्ये ।
स्वच्छं छत्रं त्रितयमदस्तद्युक्तं
श्रीमान् पार्श्वस्त्रिभुवनचूडारत्नम् ॥८०॥

चामरालिरिन्दुपादगौरा
दक्षयक्षशस्तहस्तधूता ।
पार्श्वदेवपार्श्वयोः पतन्ती
स्वर्नदीव निर्झरैर्विरेजे ॥८१॥

---

(७७) जिनमें भ्रमर व्याप्त हैं ऐसे पुष्प के समूहों से आकाश को आच्छादित करते हुए इन्द्रादि देव भगवान् की महती पूजा से सेवा करते थे। (७८) सम्पूर्ण बैठक के चारों ओर पुष्पों की वृष्टि फैल गई। देवसमुदायों के द्वारा छोड़ी गई वह पुष्पवृष्टि चञ्चल भ्रमरों के समुदाय को आकुल करने वाली थी। (७९) लम्बी शाखाओं रूप अपनी भुजाओं की विविध भङ्गीओं को धारण कर, भ्रमरों के गुंजन रूप मधुर गीत गाते हुए अशोकवृक्ष ने अपने चंचल पत्रों रूप हस्तों से उनके (पार्श्व के) सम्मुख मानो नृत्य किया। (८०) उदित शुभ्र द्युतिवाला छत्रत्रय मानों सूचित करता है कि जिनेश्वर ने तीनों लोकों का आधिपत्य प्राप्त किया है और ऐसे श्रीसम्पन्न पार्श्व त्रिभुवन की चूडामणि बन गये हैं। (८१) चन्द्र किरणों के समान गौर चामरों की पंक्ति जो दक्ष यक्षों के प्रशस्त हाथों से पार्श्वप्रभु के दोनों ओर हिलाई जा रही थी, वह पार्श्वदेव के दोनों ओर झरनों से युक्त गिरती हुई गंगानदी के समान शोभित हो रही थी।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दिवि दुन्दुभयः सुरपाणविकै–
निहताः सुतरां घनकोणगणैः ।
न्यगदन्निव ते ध्वनिभिर्भविकान्
श्रयतैनमिमं स्वहिताय जनाः ॥८२॥

यत्र विभुर्निजपादपदानि
न्यस्यति स स्म सुरासुरसङ्घाः ।
हेममयाम्बुरुहाणि नितान्तं
तत्र नवानि रुचा रचयन्ति ॥८३॥

देवं प्राचीमुखं तं समसृतिमहीसंस्थितं सभ्यलोकाः
प्रादक्षिण्येन तस्थुर्मुनिसुरललनार्यास्त्रिकं च क्रमेण ।
ज्योतिर्वन्येशदेवीभवनजरमणीभावनव्यन्तरौघा
ज्योतिष्काः स्वर्गनाथाः समनुजवनिता द्वादश स्युः समव्याः ॥८४॥

जिनपतिवदनाब्जान्निर्जगामाऽथ दिव्य–
ध्वनिरचलगुहान्तः प्रश्रुतिध्वानमन्द्रः ।
प्रसृमरतर एकोऽनेकतां प्राप सोऽपि
स्फुटमिव तरुभेदात् पात्रभेदात् जलौघः ॥८५॥

---

(८२) स्वर्ग में देवता रूप पाणविकों द्वारा घनकोणों से बजाई हुई दुन्दुभियाँ अतीव ध्वनि कर रही थीं । अपनी ध्वनि से भव्यजनों को मानो यह कह रही थीं कि हे लोगो ! अपने कल्याण के लिए इन पार्श्वनाथ की शरण ले लो । (८३) जहाँ प्रभु पार्श्वनाथ अपने चरणकमल रखते थे वहाँ सुर और असुर समुदाय कान्ति से नये नये सुवर्णमय कमलों को बना दिया करते थे । (८४) पूर्व दिशा की ओर मुख किये हुए समवसरण भूमि में स्थित प्रभु की क्रम से मुनि, देवांगनायें और आर्य लोग प्रदक्षिणा करके खड़े रहे । ज्योतिष्कदेवयाँ, व्यन्तरदेवियां, भवनपति देवों की देवियां, भवनपति देव, व्यन्तरदेव, ज्योतिष्कदेव और मानुषी स्त्रियों के साथ बारह प्रकार के वैमानिकदेव सभा में उपस्थित हुए । (८५) पर्वतीय गुफा के अन्तःस्थल से निकली हुई ध्वनि के समान धीर–गंभीर दिव्य ध्वनि जिनदेव के मुखकमल से निकली । वह फैली हुई एक ध्वनि अनेकता को प्राप्त हुई जिस प्रकार जल का समूह स्पष्ट रीति से तरुभेद एवं पात्रभेद से अनेकता (या विशेषता) को प्राप्त होता है ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

भो भव्याः श्रूयतामेष तत्त्वनिर्णयविस्तरः ।
यो भवाब्धिपतज्जन्तुजातहस्तावलम्बनम् ।।८६।।

जीवाजीवौ द्विधा तत्त्वं जीवो द्वेधा विनिश्चितः ।
मुक्तो भवस्थो विज्ञेयो भवस्थस्तु द्विधा भवेत् ।।८७।।

भव्यश्चाभव्य इत्येवं जीवश्चैतन्यलक्षणः ।
अनादिनिधनो ज्ञाता द्रष्टा तनुमितिर्गुणी ।।८८।।

कर्ता भोक्ता विशुद्धोऽयं लोकालोकप्रकाशकः ।
मुक्तः स्यादूर्ध्वगमनस्वभावोऽयं सनातनः ।।८९।।

पूर्वप्रयोगतोऽसङ्गत्वाद् वा बन्धविभेदनात् ।
गतेश्च परिणामात् स्यादूर्ध्वगामित्वमात्मनः ।।९०।।

उपसंहारविस्तारपरिणामः प्रदीपवत् ।
तस्येमे मार्गणोपाया मृग्याः संसारिणस्सदा ।।९१।।

गतिरिन्द्रियकायौ च योगा वेदाः कषायकाः ।
ज्ञानसंयमदृग्लेश्या भव्यसम्यक्त्वसंज्ञिनः ।।९२ ।।

आहारकश्चैषु मृग्यो मार्गणास्थानकेष्वसौ ।
स नामस्थापनाद्रव्यभावतो न्यस्यते बुधैः ।।९३।।

---

(८६) हे भव्यजीवों !, यह तत्त्वनिर्णय का विस्तार सुनो, जो भवसागर में पड़े हुए जन्तुओं (प्राणिओं) के लिए हाथ में आया आलम्बन है । (८७-८९) तत्त्व दो हैं–जीव एवं अजीव । जीव दो प्रकार का निश्चित है— मुक्त व भवस्थ (संसारी) । संसारी जीव पुनः दो प्रकार का है–भव्य और अभव्य । जीव का लक्षण चैतन्य है । जीव अनादि-निधन, ज्ञाता, द्रष्टा, शरीरपरिमाण, गुणी, कर्ता, व भोक्ता है । जो जीव विशुद्ध है (वीतराग है) वह लोक और अलोक दोनों को जानता है । जीव का सनातन स्वभाव ऊर्ध्वगमन करने का है । (अतः मुक्त होते ही जीव ऊर्ध्वगमन करता है) । (९०) उसकी ऊर्ध्वगति में पूर्वप्रयोग, असङ्गता, बन्धच्छेद और गतिपरिणाम कारण हैं । (९१-९३) जीव प्रदीप की तरह संकोच–विकासशील है । संसारी जीव का विचार गति, इन्द्रिय, काय, योग, वेद, कषाय, ज्ञान, संयम, दर्शन, लेश्या, भव्यत्व, सम्यक्त्व, संज्ञित्व, आहारकत्व आदि दृष्टियों से (मार्गणास्थानों से) किया जाना चाहिए । जीव का विचार नाम, स्थापना, द्रव्य और भाव इन चार निक्षेपों से भी विद्वानों द्वारा किया जाता है ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जीवादीनां पदार्थानां प्रमाणाभ्यां नयैरपि ।
भवेदधिगमो यद्वा निर्देशादाधिपत्यतः ॥९४॥

स्यात् साधनादधिष्ठानात् स्थितेरथ विधानतः ।
सत्संख्याक्षेत्रसंस्पर्शकालभावान्तरैरपि ॥९५॥

भागेनाल्पबहुत्वेन तेषामधिगमो भवेत् ।
जीवस्य तूपशमिकः क्षायिको मिश्रनामकः ॥९६॥

स्वभाव उदयोत्थश्च भावः स्यात् पारिणामिकः ।
इत्यादिभिर्गुणैर्जीवो लक्ष्यते तस्य तु द्विधा ॥९७॥

उपयोगो भवेद् ज्ञानदर्शनद्वयभेदतः ।
ज्ञानमष्टतयं च स्याद् दर्शनं तु चतुष्टयम् ॥९८॥

भेदग्रहत्वात् साकारं ज्ञानं सामान्यमात्रतः ।
प्रतिभासादनाकारं दर्शनं तद् विदुर्बुधाः ॥९९॥

क्षेत्रज्ञः पुरुषः सोऽयं पुमानात्मा सनातनः ।
जीवः प्राणी स्वयंभूश्च ब्रह्म सिद्धो निरञ्जनः ॥१००॥

द्रव्यार्थिकनयान्नित्यः पर्यायार्थनयादयम् ।
अनित्यः स्यादुभाभ्यां तु नित्यानित्यात्मकं जगत् ॥१०१॥

---

(९४-९६अब ) जीव आदि तत्त्वों का ज्ञान प्रमाण और नय से होता है । इन जीव आदि तत्त्वों का विचार निर्देश, आधिपत्य, साधन, अधिष्ठान, स्थिति और विधान इन दृष्टिओं से भी होता है । इन जीवादि तत्त्वों का ज्ञान और विचार सत्, संख्या, क्षेत्र; स्पर्शन, काल, भाव, अन्तर और अल्पबहुत्व इन दृष्टियों से भी होता है । (९६कड-९८) जीव के (पाँच) भाव हैं – औपशमिक, क्षायिक, मिश्र, औदयिक और पारिणामिक । इन सब गुणों से जीव जाना जाता है । जीव का उपयोग दो प्रकार का है–ज्ञानोपयोग और दर्शनोपयोग । ज्ञान के आठ प्रकार हैं तथा दर्शन के चार प्रकार हैं । (९९) विशेष को ग्रहण करने के कारण ज्ञान को साकार कहा गया है और सामान्यमात्र को ग्रहण करने के कारण दर्शन को विद्वानों ने अनाकार समझा है । (१००) वह क्षेत्रज्ञ है, पुरुष है, पुमान् है, सनातन आत्मा है, जीव है, प्राणी है, स्वयंभू है, ब्रह्म है और निरंजनसिद्ध है । (१०१) द्रव्यार्थिक नय से जीव नित्य है; पर्यायार्थिक नय से जीव अनित्य है; और दोनों नय से जीव और जगत् नित्यानित्य है ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्रव्यतः शाश्वतो जीवः पर्यायास्तस्य भङ्गुराः ।
षड्द्रव्यात्मकपर्यायैरस्योत्पत्तिविपत्तयः ॥१०२॥

अभूत्वा भाव उत्पादो भूत्वा चाभवनं व्ययः ।
तादवस्थ्यं पुनर्ध्रौव्यमेवं जीवादयस्त्रिधा ॥१०३॥

एवं स्वरूपमात्मनं दुर्दृशो ज्ञातुमक्षमाः ।
विवदन्ते स्वपक्षेषु बद्धकक्षाः परस्परम् ॥१०४॥

एके प्राहुरनित्योऽयं नास्त्यात्मेत्यपरे विदुः ।
अकर्तेत्यपरे प्राहुरभोक्ता निर्गुणः परे ॥१०५॥

आत्मास्त्येव परं मोक्षो नास्तीत्यन्ये हि मन्वते ।
अस्ति मोक्षः परं तस्योपायो नास्तीति केचन ॥१०६॥

इत्थं हि दुर्नयान् कक्षीकृत्य भ्रान्ताः कुदृष्टयः ।
हित्वा तान् शुद्धदृक् तत्त्वमनेकान्तात्मकं श्रयेत् ॥१०७॥

भवो मोक्षश्चेत्यवस्थाद्वैतमस्यात्मनो भवेत् ।
भवस्तु चतुरङ्गे स्यात् संसारे परिवर्तनम् ॥१०८॥

---

(१०२) द्रव्यदृष्टि से जीव शाश्वत है । जीव के पर्याय विनाशी हैं । छः द्रव्यों की पर्यायों के द्वारा जीव में उत्पत्ति और नाश होता है । (१०३) जो पहले न हो, उसका होना—यही उत्पाद है। होने के पश्चात् न होना—यह नाश है । और वैसे का वैसा रहना—यही ध्रौव्य है । जीवादि सभी द्रव्य उत्पाद, व्यय और ध्रौव्य तीनों से युक्त है। (१०४–१०७) आत्मा का इस प्रकार का स्वरूप मिथ्या दृष्टि रखने वाले लोग जान नहीं पाते । इसीलिए वे अपने ही पक्ष को पकड़ कर आपस में विवाद करते हैं । मिथ्यादृष्टि वालों का एक वर्ग (बौद्ध) आत्मा को अनित्य मानता है, दूसरा (चार्वाक) आत्मा के अस्तित्व का इन्कार करता है, तीसरा (सांख्य-वेदान्त) आत्मा को अकर्ता, अभोक्ता ओर निर्गुण मानता है, चौथा आत्मा को मानते हुए भी मोक्ष नहीं मानता है, पांचवां मोक्ष मानते हुए भी मोक्ष का उपाय नहीं है—ऐसा मानता है । इसी प्रकार दुर्नयों का आश्रय करके ये मिथ्यादृष्टि लोग भ्रान्ति में पड़े हुए हैं । इन दुर्नयों को छोड़कर जो सम्यक्दृष्टि हैं उनको अनेकान्तात्मक शुद्ध तत्त्व का स्वीकार करना चाहिए । (१०८) भव और मोक्ष—ये दो आत्मा की अवस्थाएँ हैं । भव का अर्थ है चार गति (देव, मनुष्य, तिर्यञ्च और नारक) वाले संसार में गति-आगति (आना-जाना, परिवर्तन, जन्म-मरण) ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बन्धहेतोरभावात् स्यान्निर्जराकरणादपि ।
यः कृत्स्नकर्मनिर्मोक्षो मोक्षोऽनन्तसुखात्मकः ॥१०९॥

तस्योपायस्त्रिधा सम्यग्ज्ञानदृग्वृत्तलक्षणः ।
जीवाजीवौ पुण्यपापाश्रवसंवरनिर्जराः ॥११०॥

बन्धमोक्षौ नवैते स्युः पदार्थाः सत्यतामिता ।
भव्योऽभव्यस्तथा मुक्तस्त्रिधा जीवनिरूपणा ॥१११॥

अजीवः पञ्चधा धर्माधर्मकालखपुद्गलाः ।
गत्युपग्रहकृद्धर्मो मत्स्यानां सलिलं यथा ॥११२॥

अधर्मः स्थित्यवष्टम्भः तरुच्छाया नृणामिव ।
अवगाहप्रदं व्योमाऽमूर्तं यद् व्यापि निष्क्रियम् ॥११३॥

वर्तनालक्षणः कालः सा तु स्वपरसंश्रयैः ।
पर्यायैर्नवजीर्णत्वकरणं वर्तना मता ॥११४॥

स मुख्यो व्यवहारात्मा द्वेधा कालः प्रकीर्तितः ।
मुख्योऽसंख्यैः प्रदेशैः स्वैश्चितो मणिगणैरिव ॥११५॥

---

(१०९) बन्ध के हेतुओं का अभाव होने के कारण कर्मों से अत्यन्त मुक्ति होती है । निर्जरा से भी कर्म से अत्यन्त मुक्ति होती है । यही मोक्ष है । मोक्ष अनन्त सुखात्मक है । (११०– १११) मोक्ष का उपाय सम्यक्ज्ञान, सम्यक्दर्शन, और सम्यक् चारित्र्य ये तीनों मिलकर हैं । जीव, अजीव, पुण्य, पाप, आस्रव, संवर, निर्जरा, बन्ध, मोक्ष-ये नौ तत्त्व हैं । जीव के तीन भेद हैं—भव्य, अभव्य व मुक्त । (११२–११३) अजीव पाँच प्रकार का है–धर्म, अधर्म, काल, आकाश व पद्गल । धर्म गति का सहायक कारण है । उदाहरणतः जैसे जल मत्स्य की गति में सहायक होता है वैसे धर्म (जीव और पुद्गल की) गति में सहायक होता है । अधर्म स्थिति का सहायक कारण है । मुसाफर की स्थिति में जिस प्रकार तरु की छाया सहायक होती है उसी प्रकार (जीव और पुद्गल की स्थिति में) अधर्म सहायक है । आकाश द्रव्यों को रहने की जगह देता है । वह अमूर्त है, व्यापक है, निष्क्रिय है । (११४) काल का लक्षण वर्तना है । स्वाश्रित पर्यायों के द्वारा या पराश्रित पर्यायों के द्वारा नवत्व–जीर्णत्व करना ही वर्तना मानी गई है । (११५) काल दो प्रकार का कहा गया है–व्यवहारकाल व मुख्यकाल । जो मुख्यकाल है वह अपने असंख्यप्रदेशों का मणियों के ढेर के समान ढेर है ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रदेशप्रचयाऽभावादस्य नैवास्तिकायता ।
समयावलिकाद्यात्मा व्यवहारात्मकः स च ॥११६॥

अन्ये पञ्चास्तिकायाः स्युर्धर्माधर्मौ नभस्तथा ।
काल एते त्वमूर्ताः स्युर्मूर्तद्रव्यं तु पुद्गलः ॥११७॥

वर्णगन्धरसस्पर्शलक्षणाः पुद्गला मताः ।
अमूर्ताः स्कन्धदेशप्रदेशभेदात् त्रिधा मताः ॥११८॥

मूर्तद्रव्यं चतुर्धा स्यात् स्कन्धदेशप्रदेशतः ।
परमाणुस्त्वप्रदेशः स्कन्धादेर्मूलकारणम् ॥११९॥

द्व्यणुकादिमहास्कन्धरूपः स्कन्धः पृथग्विधः ।
घर्मछायातमोज्योत्स्नामेघवर्णादिभेदभाक् ॥१२०॥

कार्यानुमेयास्त्वणवो द्विस्पर्शाः परिमण्डलाः ।
वर्णो गन्धो रसश्चैकस्तेषु नित्या भवन्ति ते ॥१२१॥

अनित्याः पर्ययैरेव सूक्ष्मसूक्ष्मो भवेद्द्व्यणुः ।
सूक्ष्मास्तु कार्मणस्कन्धाः सूक्ष्मस्थूलाः पुनर्मताः ॥१२२॥

शब्दगन्धरसस्पर्शाः स्थूलसूक्ष्माः पुनर्मताः ।
छायाज्योत्स्नाऽऽतपाद्याश्च स्थूलद्रव्यं जलादि च ॥१२३॥

---

(११६) कालद्रव्य में प्रदेशप्रचय का अभाव है। इसीलिए काल अस्तिकाय नहीं है। व्यवहारात्मककाल समय, आवलिका आदि रूप है। (११७) (काल के सिवाय) अन्य पाँच द्रव्य पञ्चास्तिकाय कहे जाते हैं। धर्म, अधर्म, आकाश और काल ये अमूर्त द्रव्य हैं। पुद्गल मूर्तद्रव्य है। (११८-११९)पुद्गल के लक्षण हैं-वर्ण, गन्ध, रस और स्पर्श। अमूर्त द्रव्यों के तीन भेद होते हैं-स्कन्ध, देश व प्रदेश। मूर्त द्रव्य के चार भेद हैं- स्कन्ध, देश, प्रदेश और अप्रदेश (परमाणु) परमाणु, स्कन्ध आदि का मूलकारण है। (१२०) द्व्यणुक से लेकर महास्कन्ध तक अनेकों प्रकार के स्कन्ध होते हैं— जैसे घर्म, छाया, तमस्, ज्योत्स्ना, मेघ, वर्ण आदि। (१२१-१२२अब) अणुएँ अपने कार्य से अनुमेय है। परमाणु में दो स्पर्श, परिमण्डल, एक वर्ण, एक गन्ध और एक रस सदा होते हैं। पर्याय। के द्वारा परमाणु अनित्य होते हैं। (१२२कड-१२४अब) परमाणु सूक्ष्म-सूक्ष्म होता हैं। कार्मण स्कन्ध सूक्ष्म होते हैं। शब्द, गन्ध, रस और स्पर्श सूक्ष्मस्थूल होते हैं। छाया, ज्योत्स्ना, आतप आदि स्थूलसूक्ष्म होते हैं। जल आदि स्थूल द्रव्य होते हैं। पृथवी आदि स्थूल-स्थूल होते हैं। ये सब स्कन्ध के भेद हैं।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्थूलस्थूलं पृथिव्यादि स्कन्धभेदा इमे स्मृताः ।
शुभायुर्नामगोत्राणि सद्वेद्यं पुण्यमुच्यते ॥१२४॥
द्विचत्वारिंशता भेदैः विस्तरेण निवेदितम् ।
पुण्यादन्यत् पुनः पापं तद् द्व्यशीतिविधं स्मृतम् ॥१२५॥
कायवाङ्मनसां योगैः कषायैरिन्द्रियाऽव्रतैः ।
पञ्चविंशतिमात्राभिः क्रियाभिः स्यादिहाश्रवः ॥१२६॥
शुभाश्रवस्तु पुण्यस्य पापस्य त्वशुभाश्रवः ।
आश्रवाणां तु सर्वेषां निरोधः संवरो मतः ॥१२७॥
स द्विधा द्रव्यभावाभ्यां भवहेतुक्रियोज्झनम् ।
स भावसंवरः कर्मपुद्गलादानविच्छिदा ॥१२८॥
स्याद् द्रव्यसंवरः सोऽपि धर्मैः समितिगुप्तिभिः ।
अनुप्रेक्षासचारित्रपरीषहजयैर्युतः ॥१२९॥
तपसा निर्जरा द्वेधा तपः स्याद् बाह्यमान्तरम् ।
बाह्यं तपः षड्विधं स्यात् तथैवाऽऽभ्यन्तरं मतम् ॥१३०॥
सविपाकाऽविपाका सा स्यादुपायात् स्वतोऽपि वा ।
मिथ्यात्वं सकषायाश्च योगा अविरतिस्तथा ॥१३१॥
प्रमादश्चेत्यमी बन्धहेतवः स्युरिहाङ्गिनाम् ।
प्रकृतिश्च स्थितिरनुभागः प्रदेश इत्यमी ॥१३२॥

---

(१२४कड–१२५) शुभायु, शुभनाम, शुभगोत्र, सातावेदनीय—ये चार प्रकार के कर्म पुण्य कहलाते है। इनके सब मिलकर बयालीस (४२) भेद कहे गये हैं। पुण्य से विरुद्ध पाप हैं। पाप के बरासी (८२) भेद हैं। (१२६) मन, वचन और काया की प्रवृत्ति से, (चार) कषायों से, (पाँच) इन्द्रियों से, (पाँच) अव्रतों से और पच्चीस क्रियाओं से आस्रव होता है। (१२७) शुभ आस्रव पुण्य का कारण है, अशुभ आस्रव पाप का। सब प्रकार के आस्रवों का निरोध संवर कहा जाता है। (१२८-१२९) संवर के दो प्रकार हैं–द्रव्यसंवर और भावसंवर। संसार के हेतु रूप क्रिया का त्याग भावसंवर है। कर्म पुदगल के आने को रोक देना यह द्रव्यसंवर है। संवर के उपाय धर्म, समिति, गुप्ति, अनुप्रेक्षा, चारित्र्य और परीषहजय है। (१३०) तप से निर्जरा होती है। तप दो प्रकार का है–बाह्य और आन्तरिक। बाह्य तप के छः भेद हैं। वैसे ही आन्तर तप के भी छः भेद हैं। (१३१–१३२) निर्जरा दो प्रकार की होती है–विपाकसहित और विपाकरहित। निर्जरा उपाय से भी होती है, स्वतः भी होती है। मिथ्यात्व, कषाय, योग, अविरति और प्रमाद संसारी के बन्ध के हेतु हैं। बन्ध के ये चार भेद हैं–प्रकृतिबन्ध, स्थितिबन्ध, अनुभागबन्ध और प्रदेशबन्ध।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बन्धभेदा मोहरागद्वेषस्पन्दादिसम्भवाः ।
अणूनां स्निग्धरूक्षत्वात् परिणामात् यथात्मनः ॥१३३॥
निःशेषकर्मनिर्मोक्षो मोक्षः स प्रागुदीरितः ।
आलोकान्तादूर्ध्वगाः स्युः सिद्धा मोक्षपदस्थिताः ॥१३४॥
ते पञ्चदशधा साध्याः नृगतित्रसभव्यजैः ।
पञ्चेन्द्रिययथाख्यातक्षायिकत्वभवैर्गुणैः ॥१३५॥
अनाहारकसंज्ञित्वकेवलज्ञानदृग्भवैः ।
मार्गणास्थानकैरेतैर्न शेषैस्ते यथायथम् ॥१३६॥
सत्पदाद्यनुयोगैस्तु साध्या नवभिरन्वहम् ।
न तेषां पुनरावृत्तिः संसृतौ क्वापि संसृतिः ॥१३७॥
नात्मशून्या भवेत् तावत् सिद्धाः संसारिणां पुनः ।
भागेऽनन्ते वर्तमानास्तेऽनन्ताः शाश्वता अपि ॥१३८॥
बद्धानामपि मुक्तत्वे स्याद्धानिर्न क्षयः क्वचित् ।
आनन्त्यं हेतुरेवात्र धर्माणामिव वस्तुनः ॥१३९॥
इत्यमीषां पदार्थानां श्रद्धानं प्रीतिपूर्वकम् ।
तत्सम्यग्दर्शनं ज्ञातं तेषां भेदप्रकाशकम् ॥१४०॥

---

(१३३) ये सब प्रकार के बन्ध मोह, राग, द्वेष, स्पन्दन आदि से उत्पन्न होते हैं । जैसे एक अणु का दूसरे अणु से बन्ध स्निग्धता और रुक्षता से होता है उसी प्रकार आत्मा का कर्मों से बन्ध (मोह-राग-द्वेषादि रूप) परिणाम के कारण होता है । (१३४) निःशेष कर्मों का क्षय मोक्ष है । उसका निरूपण पहले किया गया है । (मुक्त होते ही जीव) लोक के अग्रभाग तक ऊर्ध्वगमन करता है । जिन्होंने मोक्षपद प्राप्त किया है वे सिद्ध हैं । (१३५–१३६) सिद्धों के पन्द्रह (१५) प्रकार माने गये है । इन सब प्रकारों में नृगति, त्रस, भव्यत्व, पञ्चेन्द्रियत्व, यथाख्यात चारित्र्य, क्षायिकत्व, अनाहाराकत्व, संज्ञित्व, केवलज्ञान, केवलदर्शन–इन मार्गणास्थनों से ही, अन्य मार्गणास्थानों से नहीं, यथायोग्य विचार किया जाता है । (१३७–१३९) सत्पदादि नव अनुयोगों से भी ये पन्द्रह प्रकार के सिद्धों की प्रतिदिन विचारणा की जाती है । सिद्ध संसार में पुनः नहीं आते । संसार कभी आत्माओं से रहित नहीं होता क्योंकि सिद्धों की संख्या अनन्त होते हुए भी संसारी जीवों की जितनी संख्या है उसके अनन्त भाग की ही सदैव रहेगी । इसलिए संसारी जीव मुक्त होते रहते हैं फिर भी संसारी जीवों का क्षय (संसार में से) नहीं होता, केवल उनकी कमी ही होती है । (१४०) इन सब पदार्थों में प्रीतिपूर्वक श्रद्धा सम्यक् दर्शन माना गया है । सम्यक् दर्शन ही इन सब पदार्थों का भेद ग्रहण कराता है ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वभावेष्वनेकान्तो धर्माणां युगपद्यदा ।
स्वस्वद्रव्यक्षेत्रकालभावैर्द्रव्यगुणादिभिः ॥१४१॥
सर्वं स्यादस्ति स्यान्नास्तीत्यस्ति नास्ति द्वयं समम् ।
स्यादवक्तव्यमेव स्यादस्त्यवक्तव्यमेव तत् ॥१४२॥
नास्त्यवक्तव्यमेव स्यात् क्रमेण च बुभुत्सया ।
स्यादस्ति नास्त्यवक्तव्यमादेशात् सप्तधा भवेत् ॥१४३॥
परिणामः क्रमेणैषामक्रमेण तथा भवेत् ।
गुणपर्यायवद् द्रव्यं गुणास्तु सहभाविनः ॥१४४॥
पर्यायाः क्रमजाः सत्त्वं ध्रौव्योत्पादव्ययात्मकम् ।
अनन्तधर्मव्याख्यायां सापेक्षा नयसंहतिः ॥१४५॥
नयः सदिति विज्ञानात् सदेवैकान्तदुर्नयः ।
तथा स्यात् सत्प्रमाणं स्यात् सर्वं स्याद्वादवादिनाम् ॥१४६॥
सप्तभङ्गीप्रसादेन शतभङ्ग्यपि जायते ।
इति मीमांसया तत्त्वं जानतो ज्ञानदर्शने ॥१४७॥
व्यवहारात्मके स्यातां ते पुनर्निश्चयात्मके ।
स्वसंवेद्यचिदानन्दमयस्वात्मावलोकनात् ॥१४८॥

---

(१४१) सभी वस्तु अनेकान्तात्मक हैं । एक ही समय स्वद्रव्य, स्वक्षेत्र, स्वकाल और स्व-भाव से वस्तु सत् है और परद्रव्य, परक्षेत्र, परकाल और परभाव से वस्तु असत् है । इस प्रकार सभी द्रव्य, गुण आदि को लेकर विचार किया जा सकता है । (१४२-१४३) अमुक दृष्टि से वस्तु है, अमुक दृष्टि से वस्तु नहीं है । दोनों दृष्टियों से, क्रम से, वस्तु है और नहीं भी है । दोनों ही दृष्टियों से एक साथ वस्तु का वर्णन करना मुश्किल है अर्थात् वस्तु अवक्तव्य है । वस्तु है और अवक्तव्य है। वस्तु नहीं है और अवक्तव्य है । वस्तु है, नहीं है और अवक्तव्य है। इस तरह वस्तु का वर्णन सप्तभङ्गीरूप सात वाक्यों से होता है । (१४४) (द्रव्यों का) परिणाम क्रम से और अक्रम से होता है । द्रव्य गुणपर्यायात्मक है । गुण सहभावी होते हैं । (१४५) पर्याय क्रम से होते हैं । वस्तु का जो सत्त्व है वह उत्पाद, व्यय और ध्रौव्य से व्याप्त है । वस्तु में अनन्त धर्म होते हैं । अतः वस्तु का वर्णन अपेक्षाभेद (नयों) से होता है । (१४६) "है"– ऐसा ज्ञान नय है । "है ही"—ऐसा ज्ञान दुर्नय है। और "अमुक अपेक्षा से है"- ऐसा ज्ञान प्रमाण है । यह सब स्याद्वादवादियों को मान्य है । (१४७–१४८) सप्तभङ्गी के आधार पर शतभङ्गी भी हो सकती है । ज्ञान और दर्शन जब इस प्रकार की मीमांसा के द्वारा तत्त्व को जानते हैं तब वे व्यवहारात्मक कहलाते हैं । जब वे स्वसंवेद्य चिदानन्दमय अपनी आत्मा को देखते हैं तब वे ज्ञान और दर्शन निश्चयात्मक कहलाते हैं ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वसावद्ययोगानामुज्झनं चरणं विदुः ।
सत्येव दर्शने ज्ञानं चारित्रं स्यात् फलप्रदम् ।।१४९।।

दर्शनज्ञानविकलं चारित्रं विफलं विदुः ।
त्रिषु द्व्येकविनाभावात् षोढा स्युर्दुर्नयाः परे ।।१५०।।

दर्शनादित्रयं मोक्षहेतुः समुदितं हि तत् ।
महाव्रतोऽनगारः स्यात् सागारोऽणुव्रती गृही ।।१५१।।

आप्तो यथार्थवादी स्यादाप्ताभासास्ततः परे ।
आप्तोक्तिरागमो ज्ञेयः प्रमाणनयसाधनः ।।१५२।।

विपर्यस्तस्तदाभास इति तत्त्वस्य निर्णयः ।
य एनां तत्त्वनिर्णीतिं मत्वा याथात्म्यमात्मसात् ।।१५३।।

श्रद्धत्ते स तु भव्यात्मा परं ब्रह्माधिगच्छति ।
पुरुषं पुरुषार्थं च मार्गं तत्फलमाह सः ।।१५४।।

लोकनाडीं समस्तां च व्याचख्ये त्रिजगद्गुरुः ।
भवद् भूतं भविष्यच्च द्रव्यपर्यायगोचरम् ।।१५५।।

---

(१४९) सब प्रकार की दोषयुक्त प्रवृत्ति के त्याग को चारित्र कहते हैं। सम्यक् दर्शन हो तभी ज्ञान और चारित्र फलप्रद होते हैं। (१५०) दर्शन और ज्ञान से रहित चारित्र विफल है– ऐसा विद्वान लोग समझते हैं। इन तीनों में से एक या दो से रहित छः विकल्प होते है, जो दुर्नय हैं। (१५१) दर्शन आदि ये तीन मिलकर मोक्ष का एक ही उपाय बनता है। महाव्रतधारी अनगार है। अणुव्रतधारी श्रावक है। (१५२) जो यथार्थवादी है वह आप्त है, बाकी सब आप्त न होते हुए भी आप्त की भ्रान्ति करने वाले हैं। आप्तवचन ही आगम है, ऐसा समझना चाहिए। प्रमाण और नय आगम के साधन है, उपाय है। (१५३–१५४) इस लक्षण से रहित जो वचन है वह आगमाभास है। आगम में तत्त्व का जो निर्णय किया गया है उसको सचमुच तत्त्वनिर्णय मान कर जो यथायोग्य भावपूर्वक श्रद्धा रखता है वह भव्यात्मा है। वह (मुक्त होता है अर्थात्) परमब्रह्म को प्राप्त करता है। फिर उन्होंने (अर्थात् पार्श्वनाथने) पुरुष, पुरुषार्थ, मार्ग और मार्गफल कहा। (१५५) उपरांत, तीनों जगत् के गुरु पार्श्व ने समस्त लोकनाडी की व्याख्या की। भूत, भविष्य, वर्तमान (सब) द्रव्य के (सभी) पर्याय (उनके ज्ञान का) विषय था।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आगतिं गतिमुत्पत्तिच्यवने जन्मिनां जगौ ।
शलाकापुरुषान् सर्वान् कर्मणां वर्गवर्गणाः ॥१५६॥
स्पर्द्धकादिव्यवस्थां च कृतं यत् प्रतिसेवितम् ।
आविः कर्म रहः कर्म भुक्ति मुक्तिमुपादिशत् ॥१५७॥
श्रुत्वेति भगवद्व्याख्यां घनस्तनितजित्वरीम् ।
भव्या निष्पीतपीयूषा इव प्रमुदमाययुः ॥१५८॥
जगृहुः केऽपि सम्यक्त्वं केचित् पञ्चमहाव्रतान् ।
गृहिधर्मं परे सम्यग्दर्शनज्ञानपूर्वकम् ॥१५९॥
श्रीमत्पार्श्वघनाघनाद्विलसितं मन्द्रं ध्वनेर्गर्जितं
ते सामाजिकचातकाः श्रुतिगतं सम्पाद्य सोत्कण्ठिताः ।
पीत्वा धर्मरसामृतं मृतिजराशून्यं पदं लेभिरे
भूयान्मङ्गलसङ्गमाय भविनां सैवाऽऽर्हती भारती ॥१६०॥

इति श्रीमत्परापरपरमेष्ठिपदारविन्दमकरन्दसुन्दररसास्वादसम्प्रीणितभव्यभव्ये पं० पद्ममेरुविनेयपं० श्रीपद्मसुन्दरविरचिते श्रीपार्श्वनाथमहाकाव्ये श्रीपार्श्वसमवसृतिधर्मदेशनोपश्लोकनं नाम षष्ठः सर्गः ।

---

(१५६–१५७) संसारी जीवों की आगति, गति, उत्पत्ति, च्यवन की बात भी उन्होंने कही। उन्होंने सभी शलाकापुरुषों का चरित्र वर्णित किया, कर्मों की वर्गणाओं का निरूपण किया, कर्मों की स्पर्द्धक आदि के द्वारा व्यवस्था की। उन्होंने प्रतिसेवना, प्रकट या उदित कर्म, अप्रकट या अनुदित कर्म, कर्मफलभोग और कर्म से मुक्ति -- इन सब बातों का उपदेश दिया। (१५८) प्रभु पार्श्व का घनगर्जना से अधिक गंभीर उपदेश सुन कर भव्य जीव अत्यन्त आनन्दित हुए मानों उन्होंने सुधा का आकंठ पान किया हो। (१५९) कुछ जीवों ने सम्यक्त्व धारण किया, कुछ ने पाँच महाव्रतों को स्वीकार किया, अन्य ने सम्यग् ज्ञान-दर्शनपूर्वक श्रावक धर्म को अपनाया। (१६०) श्रीपार्श्वनाथरूपी घने बादलों से जनित गम्भीर ध्वनि की गर्जना को सुन कर वे श्रोतारूपी चातक (धर्मरसामृत पीने के लिए) उत्कण्ठित हो गये। फिर धर्मरसामृत का पान करके वे जरामरणरहित पद को प्राप्त हुए। अर्हत्देव की वाणी भव्य जीवों के मंगल की प्राप्ति के लिए हो!

इति श्रीमान् परमपरमेष्ठि के चरणकमल के मकरन्द के सुन्दर रस के स्वाद से भव्यजनों को प्रसन्न करने वाला, पं० श्री पद्ममेरु के शिष्य पं० श्रीपद्मसुन्दर कवि द्वारा रचित श्रीपार्श्वनाथ महाकाव्य में 'श्रीपार्श्वसमवसृति और धर्मदेशना का विवेचन' नामक षष्ठ सर्ग समाप्त हुआ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## सप्तमः सर्गः

अथोदयाद्रिमूर्धस्थमिव मार्तण्डमण्डलम् ।
मणिरत्नपरार्द्ध्यर्द्धासीनं हरिविष्टरे ॥१॥

चलच्चामरसंवीज्यमानदेहं जिनेश्वरम् ।
अशोकतरुबुध्नस्थं छत्रत्रितयभासुरम् ॥२॥

प्रावृषेण्यमिवाम्भोदं गम्भीरध्वनिगर्जितम् ।
गिरां विरामे सुत्रामा नत्वा तं भक्तिनिर्झरः ॥३॥

प्रमोदविकसन्नेत्रसहस्रः प्राञ्जलिः प्रभोः ।
समारेभे स्तुतिं कर्तुमेकतानः प्रसन्नधीः ॥४॥ ॥कलापकम्॥

त्वं स्वयम्भूः परंज्योतिः प्रभविष्णुरयोनिजः ।
महेश्वरस्त्वमीशानो विष्णुर्जिष्णुरजोऽरजाः ॥५॥

भवानिव जगल्लोकमशोकं कुरुते तरुः ।
अशोकोऽपि निजच्छायासंश्रितं त्वदुपास्तितः ॥६॥

उदस्तहस्तैस्ते दक्षैर्यक्षैरुद्धतचामराः ।
धुनन्ति स्मेव भव्यानां रजांसि प्रचितान्यपि ॥७॥

तव च्छत्रत्रयं भाति मुक्ताजालविलम्बितम् ।
लीलास्थलमिवाऽऽपाण्डु जगल्लक्ष्म्याः समुच्छ्रितम् ॥८॥

---

(१-४) अब उदयाचलपर्वत की चोटी पर स्थित सूर्यमण्डल की भाँति अमूल्यमणि-खचित अर्ध सिंहासन पर विराजमान, चलती चामरों से जिस पर पंखा किया जा रहा है ऐसे शरीरवाले, अशोकवृक्ष के नीचे बैठे हुए, तीन छत्रों से सुशोभित और गम्भीरध्वनि से गर्जना करते वर्षाकालीन बादल के समान जिनदेव को, अपनी वाणी के विश्रान्त होने पर नमस्कार करके भक्ति के निर्झरवाले, प्रसन्नता से विकसित सहस्रनेत्रवाले, प्रसन्नबुद्धिवाले और एकाग्रचित्त इन्द्र ने हाथ जोड़कर प्रभु की स्तुति करनी प्रारम्भ की। (५) हे प्रभो !, आप स्वयंभू हैं, परम ज्योतिरूप हैं, समर्थ और अयोनिज हैं। आप ही महेश्वर हैं, विष्णु हैं, अज हैं एवं अरज हैं। (६) आपकी उपासना के कारण अशोकवृक्ष भी आपकी तरह अपनी छाया का आश्रय लेने वाले जगत् के लोगों को शोकमुक्त करता है। (७) उन्नत हाथ वाले दक्ष यक्षों के द्वारा हिलाये हुए चामर भव्य लोगों की संचित रज को दूर करते हैं। (८) हे प्रभो !, मुक्ताजाल से लटकता हुआ आपका छत्रत्रय अतीव शोभा देता है। मानो यह छत्रत्रय जगत्लक्ष्मी का समुन्नत श्वेत क्रीडास्थल है।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुरास्त्वयि वितन्वन्ति नभस्तः सुमनोऽञ्जलीन् ।
स्वर्गश्रियेव निर्मुक्तान् प्रमोदाश्रुकणानिव ।।९।।

अप्रत्नरत्नरचितं तव सिंहासनं विभोः ।
त्वदास्यायै समानीतं मेरोः शृङ्गमिवामरैः ।।१०।।

जगत्त्रयपवित्रत्वविधानायेव यस्यति ।
तव वर्ष्मप्रभाभाराक्रान्तं शालत्रयं विभो ! ।।११।।

तव यो दुन्दुभिध्वानडम्बरो व्यानशेऽम्बरम् ।
शब्दब्रह्मात्र विश्रान्तमितीव जगतां जगौ ।।१२।।

तव वाक्किरणौघोऽयमनन्तज्ञानभास्वतः ।
प्रसर्पन् व्यधुनोद् ध्वान्तं जगज्जनमनोगतम् ।।१३।।

अहार्यप्रातिहार्याणि नान्यसाधारणानि ते ।
स्वयं प्रकाशयन्त्येव जगत्साम्राज्यवैभवम् ।।१४।।

सत्यामिन्द्रियसामग्र्यां त्वयि ज्ञानमतीन्द्रियम् ।
जागर्त्यचिन्तनीया हि प्रभूणां खलु शक्तयः ।।१५।।

तव कल्पद्रुमस्येव भक्तिः शक्तिगरीयसी ।
दभ्राऽपि पम्फुलीत्येव फलसम्पदमद्‌भुतम् ।।१६।।

---

(९) देवता लोग आप पर आकाश से पुष्पों की वर्षा करते हैं, मानों स्वर्ग की लक्ष्मी के आनन्दाश्रु की बूँदें गिर रही हों। (१०) हे प्रभो !, आपका यह नवीनरत्न-जटितसिंहासन ऐसा लगता है मानो आपके ही बैठने के लिए देवतालोग सुमेरुपर्वत के शिखर को लाये हों। (११) हे प्रभो !, आपके शरीर की कान्ति के भार से व्याप्त शालत्रय (तीन किले) मानों तीनों लोकों को पवित्र करने का प्रयत्न करते हैं। (१२) दुन्दुभि की ध्वनि जैसी आपकी आवाज आकाश में प्रसृत है, वह मानों 'शब्दब्रह्म यहाँ विश्रान्त है' ऐसा तीन जगत् को कहती है। (१३) अनन्त ज्ञान से दीप्त ऐसी आपकी वाणीरूपी किरणों का समुदाय संसार के लोगों के फैलते हुए मानस अन्धकार को दूर करता है। (१४) आपका यह अनन्यसाधारण अहार्य प्रातिहार्य स्वयं जगत् साम्राज्य के वैभव को प्रकाशित करता है। (१५) इन्द्रियसामग्री के होने पर भी आपका ज्ञान अतीन्द्रिय है। समर्थ व्यक्तियों की अचिन्तनीय शक्तियाँ जाग्रत होती हैं। (१६) आपकी भक्ति, कल्प-वृक्ष की भाँति अत्यन्त शक्तिवाली है, अल्प होने पर भी अद्‌भुत फलसम्पत्ति को विकसित करती है।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवद्वागमृतास्वादादेव ! देवामरा वयम् ।
सुधान्धसामपि सुधा मुधाऽद्य प्रतिभाति नः ॥१७॥

देवाधिदेवस्त्वं स्रष्टा परमेष्ठी पुरुः परः ।
शम्भुः स्वयंभूर्भगवांस्त्वं पुमानादिपूरुषः ॥१८॥

त्वं विश्तोमुखो विश्वराड्ड् विराड्ड् विश्वदृग् विभुः ।
विश्वव्यापी विश्वयोनिः वियोनिर्विश्वभुक् प्रभुः ॥१९॥

त्वमनादिरनन्तश्च परमात्मा परापरः ।
हिरण्यगर्भोऽधिज्योतिस्त्वमिनस्त्वमयोनिजः ॥२०॥

त्वमक्षरोऽजरोऽक्षय्योऽनक्षरोऽनक्ष ईश्वरः ।
त्वमच्युतो हरो भव्यबन्धुस्त्वं भव्यभास्करः ॥२१॥

त्वं शंभुः शंभवः शम्बदः शरण्यश्च शङ्करः ।
त्वं पुराणकविर्वाग्मी त्वं स्याद्वादवदावदः ॥२२॥

योगीश्वरो योगविदां वरस्त्वं धर्मतीर्थकृत् ।
त्वं धर्मादिकरो धर्मनायको धर्मसारथिः ॥२३॥

धर्मध्वजो धर्मपतिः कर्मारातिनिबर्हणः ।
त्वमर्हन्नरिहा सार्वः सर्वज्ञः सर्वदर्श्यसि ॥२४॥

---

(१७) हे प्रभो !, आपकी अमृतवाणी के रसास्वादन से हम अमर बने हैं । अमृत जिनका भोजन है ऐसे हमको आज अमृत व्यर्थ मालूम पड़ता है । (१८) आप देवाधिदेव हैं, स्रष्टा हैं, परमेष्ठी हैं, पुरु हैं, परः हैं, शंभु हैं, स्वयंभू हैं, भगवान् हैं, पुमान् हैं एवं आदिपुरुष हैं । (१९) आप विश्तोमुख हैं, विश्वराट् हैं, विराट् हैं, विश्वदृक् हैं, विभु हैं, विश्वव्यापी हैं, विश्वयोनि हैं, वियोनि हैं, विश्वभुक् है एवं प्रभु हैं । (२०) आप अनादि हैं, अनन्त हैं, परमात्मा हैं, परात्पर हैं, हिरण्यगर्भ हैं, अधिज्योति हैं, इन है, एवं अयोनिज हैं । (२१) आप अक्षर हैं, अजर हैं, अक्षय्य हैं, अनक्षर हैं, अनक्ष हैं, ईश्वर हैं, अच्युत हैं, हर हैं, भव्यबन्धु हैं, एवं भव्यभास्कर हैं । (२२) आप शंभु हैं, शंभव हैं, शम्बद हैं, शरण्य हैं, शंकर हैं, पुराणकवि हैं, वाग्मी हैं, एवं स्याद्वादवदावद हैं । (२३) आप योगीश्वर है, योगविदांवर हैं, धर्मतीर्थकृत् हैं, धर्मादिकर हैं, धर्मनायक हैं, एवं धर्मसारथि हैं । (२४) आप धर्मध्वज हैं, धर्मपति हैं, कर्मारातिनिबर्हण हैं, अर्हन् हैं, अरिहा हैं, सार्व हैं, सर्वज्ञ हैं, एवं सर्वदर्शी हैं ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्वं बुद्धस्त्वं स्वयंबुद्धस्त्वं सिद्धः पुरुषोत्तमः ।
सूक्ष्मो निरञ्जनोऽव्यक्तो महनीयो महानपि ॥२५॥

अणीयांश्च गरीयांश्च स्थवीयानुत्तमो जिनः ।
अनुत्तरोऽनश्वरस्त्वं स्थास्नुर्भूष्णुर्भवान्तकः ॥२६॥

ब्रह्म ब्रह्मविदां ध्येयः शान्तस्त्वं तारकः शिवः ।
आप्तः पारगतोऽपारश्चिद्रूपोऽनन्तदर्शनः ॥२७॥

निर्मदस्त्वं हि निर्मायो निर्मोहो निर्ममः स्वराट् ।
निर्द्वन्द्वो वीतदम्भस्त्वं निष्कलो निर्मलो जयी ॥२८॥

वीतरागोऽनन्तवीर्योऽनन्तज्ञानविलोचनः ।
निष्कलङ्को निर्विकारो निराबाधो निरामयः ॥२९॥

त्वमेव परमज्योतिश्चिदानन्दमयः स्वयम् ।
नाम्नामष्टोत्तरशतं नीत्वा स्वस्मृतिगोचरम् ॥३०॥

संस्तौमि त्वां जगत्स्तुत्यं श्रीमत्पार्श्वजिनेश्वरम् ।
वामेयं महिमाऽमेयमश्वसेननृपाङ्गजम् ॥३१॥

नमस्तेऽनन्तसौख्यायाऽनन्तज्ञानात्मने नमः ।
नमोऽनन्तदृशेऽनन्तवीर्याय भवते नमः ॥३२॥

---

(२५) आप बुद्ध हैं, स्वयंबुद्ध हैं, पुरुषोत्तम हैं, सूक्ष्म हैं, निरंजन हैं, अव्यक्त हैं, महनीय हैं एवं महान् हैं। (२६) आप अणीयान् हैं, गरीयान् हैं, स्थवीयान् हैं, उत्तम हैं, जिन हैं, अनुत्तर हैं, अनश्वर हैं, स्थास्नु हैं, भूष्णु हैं एवं भवान्तक हैं। (२७) आप ब्रह्म हैं, ब्रह्मविदांध्येय हैं, शान्त हैं, तारक हैं, शिव हैं, आप्त हैं, पारगत हैं, अपार हैं, चिद्रूप हैं एवं अनन्तदर्शन हैं। (२८) आप निर्मद हैं, निर्माय हैं, निर्मोह हैं, निर्मम हैं, स्वराट् हैं, निर्द्वन्द्व हैं, वीतदम्भ हैं, निष्कल हैं, निर्मल हैं, जयी हैं। (२९) आप वीतराग हैं, अनन्तवीर्य हैं, अनन्तज्ञानविलोचन हैं, निष्कलङ्क हैं, निर्विकार हैं, निराबाध हैं एवं निरामय हैं। (३०-३१) आप स्वयं परमज्योति हैं एवं चिदानन्दमय हैं। आपके एक सौ आठ नामों का स्मरण करके मैं जगत के स्तुतियोग्य तथा अमेयमहिमा-वाले वामा-अश्वसेन के पुत्र आप श्रीमत्पार्श्वजिनेश्वर की स्तुति कर रहा हूँ। (३२) अनन्तसुखयुक्त, अनन्तज्ञानस्वरूप, अनन्तदर्शनस्वरूप तथा अनन्तवीर्य आपको नमस्कार है।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जय त्वं त्रिजगद्बन्धो ! जय त्वं त्रिजगद्धित ! ।
जय त्वं त्रिजगत्त्रातर्जय त्वं त्रिजगत्पते ! ॥३३॥

त्वद्ध्यानात् पूतचित्तोऽहं त्वन्नुतेः पूतवागहम् ।
त्वन्नतेरस्मि पूताङ्गो धन्यस्त्वद्दर्शनादहम् ॥३४॥

त्वत्पादनखरप्रांशुकिरणाम्बुनिमज्जनैः ।
मूर्धाऽभिषिक्त इव मे भाति नम्रस्य पावनैः ॥३५॥

तव स्तोत्रार्जितात् पुण्यादित्येवाऽऽशास्महे फलम् ।
भूयान्नः कर्मरजसां त्वयि भक्तिरवावरी ॥३६॥

इदं ते पावनं स्तोत्रमश्रान्तं यः स्मरेत् सुधीः ।
लभते स सदानन्दमङ्गलश्रीपरम्पराम् ॥३७॥

शतक्रतुरिति स्तुत्वा श्रीपार्श्वं विश्वपावनम् ।
अथ तीर्थविहारस्याऽकरोत् प्रस्तावनामिति ॥३८॥

भगवन् ! पापसन्तापतप्तानामङ्गिनां तव ।
व्याख्यासुधारसस्यन्दैः प्रीणनावसरोऽधुना ॥३९॥

निःश्रेयसाय भव्यानामुज्जिहीर्षुर्भवाम्बुधेः ।
करोतु भगवानद्य धर्मतीर्थप्रवर्त्तनम् ॥४०॥

---

(३३) तीनों जगत के बन्धु आपकी जय हो, तीनों जगत् के हितकारी आपका जय हो। तीनों जगत के रक्षक आपकी जय हो, त्रिजगत्पति आपकी जय हो। (३४) आपका ध्यान करने से मैं पवित्रहृदय हो गया हूँ। आपकी स्तुति करने से मैं पवित्र वाणी वाला हो गया हूँ। आपको नमस्कार करने से में पवित्रात्मा हूँ तथा आपके दर्शन से मैं धन्य हो गया हूँ। (३५) आपके चरणों के नखों के ऊर्ध्वगामी किरणरूप जल के पवित्रस्नान से मस्तक पर अभिषिक्त की भाँति झुके हुए शीशवाला मैं महसूस करता हूँ। (३६) आपके स्तोत्र (स्तुति) से अर्जित पुण्य से हम यही फल चाहते हैं कि कर्म धूलि को हटाने वाली (हमारी) भक्ति आप में हो। (३७) यह आपका पवित्र स्तोत्र लगातार जो बुद्धिमान स्मरण करता है वह सदानन्ददायी मङ्गलकारक लक्ष्मीपरम्परा को प्राप्त करता है। (३८) इन्द्रदेव इस प्रकार विश्व को पवित्र करने वाले श्रीपार्श्व की स्तुति करके तीर्थ-विहार के लिए प्रस्तावना करने लगे। (३९) हे प्रभो !, पाप-सन्ताप से दुःखी शरीर-धारियों को व्याख्यानरूपी अमृतरसास्वादन से संतृप्त करना – यह अब आपका अवसर है। (४०) भव्य प्राणियों के संसारसागर से उद्धार के इच्छुक आप भगवान उनके कल्याण (मोक्ष) के लिए आज धर्मतीर्थ की प्रवर्त्तना करें।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति प्रबुद्धोऽपि जिनो विज्ञप्तोऽथ बिडौजसा ।
विजहार महीपीठे धर्ममार्गं प्रवर्त्तयन् ॥४१॥

परार्द्ध्यप्रातिहार्यर्द्धिभूषितः सुरकोटिभिः ।
सेव्यमानः स भगवान् विजहार वसुन्धराम् ॥४२॥

अष्टौ गणधरास्तस्याभवँल्लब्धिविभूषिताः ।
सर्वपूर्वधराश्चासन् सार्द्धत्रिशतसम्मिताः ॥४३॥

अवधिज्ञानिनस्तस्य चतुर्दशशतप्रमाः ।
सहस्रं केवलालोका एकादशशतप्रमाः ॥४४॥

वैक्रियर्द्धियुतास्तस्य सार्द्धसप्तशतप्रमाः ।
समनःपर्ययास्तस्य तथाऽनुत्तरगामिनः ॥४५॥

द्वादशैव शतान्यासन् षट्शती वादिनामपि ।
मुनयस्त्वार्यदत्ताद्याः सहस्राणि तु षोडश ॥४६॥

आर्यिकाः पुष्पचूलाद्या अष्टत्रिंशत् सहस्रमाः ।
लक्षमेकं चतुःषष्टिसहस्राण्यास्तिका विभोः ॥४७॥

लक्षत्रयं च सप्तविंशतिसहस्रसंयुतम् ।
*श्राविकास्तस्य सद्धर्मं दिशतः सर्वतोऽभवन् ॥४८॥*

एवं निजगणैर्युक्तो भगवान् प्रत्यबूबुधत् ।
भव्यपद्माकरान् धर्मे केवलज्ञानभास्करः ॥४९॥

---

(४१) प्रबुद्ध होने पर भी इन्द्र के द्वारा इस प्रकार स्तुति किए हुए जिनदेव ने महापीठ पर धर्ममार्ग का प्रवर्तन करते हुए विहार किया । (४२) परार्द्ध प्रतिहार्य समृद्धि से भूषित वह भगवान जिनदेव पृथ्वी पर विहार करने लगे । (४३–४८) सर्वत्र धर्म को फैलाने वाले उन भगवान के आठ गणधर थे जो लब्धियों से विभूषित थे, तीन सौ पचास सब पूर्वों के जानकार पूर्वधर थे; चौदह सौ अवधिज्ञानी थे; एक हजार केवलज्ञानी थे, ग्यारह सो वैक्रियलब्धिवाले थे, सातसो पचास मनःपर्यायज्ञानी थे, बारह सौ अनुत्तरगामी थे, छःसो वादी थे, सोलहहजार आर्यदत्त आदि मुनि थे; अड़तीसहजार पुष्पचूला आदि आर्यिकायें थीं, एक लाख चौसठ हजार आस्तिक श्रावक थे और तीन लाख सत्ताइसहजार श्राविकायें थीं ।(४९) इस प्रकार अपने गणों से युक्त केवलज्ञान के कारण भास्कररूप भगवान ने धर्म में भव्यजनोंरूपी कमलों को प्रबुद्ध किया ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं त्र्यशीतिदिवसैरूनान् सप्ततिवत्सरान् ।
विहृत्य भगवान् पार्श्वः प्रान्ते सम्मेतमासदत् ।।५०।।
आयुर्वर्षशतं पूर्णं समापय्य महामनाः ।
संलिख्य मासभक्तेन प्रलम्बितभुजद्वयः ।।५१।।
स्वयं योगनिरोधार्थं समुद्घातं तदाऽकरोत् ।
पूर्वं दण्डं कपाटं च मन्थानं लोकपूरणम् ।।५२।।
चतुर्भिः समयैर्विश्वमापूर्य व्यानशे विभुः ।
सञ्जहारान्तरं मन्थं कपाटं दण्डमुत्क्रमात् ।।५३।।
प्रदेशानुपसंहृत्याऽघातिस्थित्यंशसंहतीः ।
असङ्ख्येया निराकृत्यानुभागस्य च कर्मणाम् ।।५४।।
भागाननन्तान् सोऽप्यन्तर्मुहूर्ताद्योगरुन्धनम् ।
कुर्वाणो वाङ्मनोयोगौ सूक्ष्मीकृत्याश्रयात् तनोः ।।५५।।
ततश्च काययोगं च सूक्ष्मीकृत्याविनश्वरम् ।
दध्यौ सूक्ष्मक्रियाध्यानं रुद्धयोगो गतास्रवः ।।५६।।
अयोगी स समुच्छिन्नक्रियं ध्यानमनश्वरम् ।
पञ्चह्रस्वाक्षरैर्ध्यायन् शैलेशीकरणं गतः ।।५७।।

---

(५०) इस प्रकार सत्तर (७०) वर्षों में तरासी (८३) दिन कम विहार करके भगवान पार्श्व अन्तकाल में सम्मेतशिखर पर्वत पर गये । (५१--५७) उदारमनवाले, प्रलम्बित महाभुजावाले पार्श्वप्रभु ने सौ वर्ष की पूर्ण आयु समाप्त कर मासभक्त की संलेखना करके स्वयं प्रवृत्ति को रोकने के लिए समुद्घात किया । सर्वप्रथम दण्ड की तरह ऊर्ध्व और अधोदिशाओं में, फिर कपाट की तरह चारों दिशाओं में, फिर मन्था की तरह अन्तरालों में आत्मप्रदेशों को फैलाकर लोक को उन्होंने भर दिया । इस तरह चार क्षणों में विश्व का आत्मप्रदेशों से भरकर प्रभु व्यापक हो गये । बाद में उल्टे क्रम से मन्था, कपाट और दण्ड की तरह उन्होंने आत्मप्रदेशों का संकोच किया । आत्मप्रदेशों का संकोच कर अघाती कर्मों के असंख्येय भाग स्थितिबन्ध को उन्होंने नष्ट कर दिया तथा उन कर्मों के अनुभागबन्ध के अनन्त भागों को भी नष्ट कर दिया । तदनन्तर अन्तर्मुहूर्त में शरीर की सूक्ष्मक्रिया का आश्रय कर उन्होंने वाणी और मन की प्रवृत्ति का निरोध किया । बाद में शरीर की क्रिया को सूक्ष्म कर प्रवृत्तिनिरोधवाला और आस्रवरहित वह अविनश्वर सूक्ष्मक्रिया ध्यानने लगा कर । उसके पश्चात् प्रवृत्तिरहित वह पाँच ह्रस्व अक्षर के उच्चारण में जितनाकाल लगता है उतने काल तक अविनश्वर समुच्छिन्नक्रिया ध्यान करके शैलेशीकरण को प्राप्त हुआ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्रयोदशास्य कर्मांशाः प्रक्षीणाश्चरमे क्षणे ।
द्वासप्ततिरुपान्त्येऽथ निर्लेपो निष्कलः शिवः ॥५८॥

श्रावणे धवलाष्टम्यां त्रयस्त्रिंशत् तपोधनैः ।
पूर्वाह्णे तु विशाखायां श्रीपार्श्वो निर्ववौतराम् ॥५९॥

सम्भूयाथ सवासवाः सुरगणाः श्रीपार्श्वदेहं शुचि
ज्वालाजालपरिष्कृते हुतभुजि प्रक्षिप्य गन्धोद्धुरैः ।
गोशीर्षैःमसमेधिते परिलसत्काश्मीरजैश्चन्दनै-
रभ्यर्च्याक्षतपुष्पमाल्यनिवहैस्ते भस्मसाच्चक्रिरे ॥६०॥

क्षीरोदे च निचिक्षिपुर्जिनपतेर्भूतिं पवित्राङ्गजां
बालादित्यसपत्नरत्नविलसत्कोटीरकोटीधरैः ।
नत्वा तां निजमूर्द्धभिः सुरगणाः सेन्द्राः समस्तास्ततो ।
जग्मुः स्वालयमेव ते कृतमहानिर्वाणपूजोद्धवाः ॥६१॥

शक्रस्तूपरिगां च दक्षिणहनुं जग्राह चेशानपो
वामां तां चमरोऽग्रियां द्रुतमधःस्थां वामजातां बलिः ।
अङ्गोपाङ्गगतास्थिवृन्दमपरे शेषाः सुराः सादरं
कृत्वा स्तूपविधानमत्र सकला नन्दीश्वरादौ ययुः ॥६२॥

---

(५८) उनके (पार्श्व के) तेरह कर्म के अंश चरम (अन्तिम) क्षण में नष्ट हो गये और उपान्त्य क्षण में बहत्तर (७२) कर्म के अंश भी नष्ट हुए । तदनन्तर वे निर्लेप, निष्कल व शिव हो गए । (५९) श्रावणमास में शुक्लाष्टमी के दिन तेतीस तपोधन मुनियों के साथ विशाखानक्षत्र में, पूर्वाह्न में श्रीपार्श्व ने निर्वाणपद प्राप्त किया । (६०) इन्द्रसहित सभी देवताओं ने एकत्रित होकर श्रीपार्श्व के पवित्र देह को कान्तिमान सुगन्धित केसर एवं चन्दन से तथा अक्षत, पुष्प और मालाओं से सजा कर, ज्वालाओं से परिष्कृत और गोशीर्षचन्दन के इन्धन से प्रज्ज्वलित अग्नि में रख कर भस्मीभूत कर दिया । (६१) उन्होंने जिनपति श्रीपार्श्व के पवित्र अंग से उत्पन्न भस्म को क्षीर समुद्र में विसर्जित किया । प्रातःकालीन सूर्य के समान विलसित मणियों से जटित मुकुट की कोटि को धारण करने वाले अपने अपने मस्तकों से नमस्कार कर (झुककर) इन्द्रसहित वे सभी देवता वहाँ से अपने स्थान को महानिर्वाणपूजा का उत्सव कर चले गये ।(६२) इन्द्र ने ऊपर की दुड्डी को ग्रहण किया और दाहिनी दुड्डी को ईशानेन्द्र ने और बायी दुड्डी को चमरेन्द्र ने तथा बलि ने अधोस्थित वाम हनु के अग्रभाग को लिया । अन्य देवताओंने अंग व उपांगों के अस्थिसमूह को ग्रहण किया । स्तूपविधान करके सब नन्दीश्वर आदि स्थानों को प्रस्थान कर गये ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्गर्भोद्भव–संयमग्रह-महाकैवल्य-निर्वाणता–
कल्याणेषु सुरासुराः सुरपतिव्रातैः समं सादराः ।
स्फूर्जद्रत्नकिरीटकोटिमणिभिर्नीराजयन्तो जग–
च्चक्षुस्फीतमहामहं स तनुतात् पार्श्वः सतां मङ्गलम् ।।६३।।

पूर्वं यो मरुभूतिरास स गजो देवश्च विद्याधर–
स्तस्मादच्युतनिर्जरो नरपतिः श्रीवज्रनाभिर्बभौ ।
पश्चान्मध्यममध्यमे त्रिदिवपो हेमप्रभश्चक्रयभूद्
गीर्वाणः स च पार्श्वनाथजिनपो भूयात् सतां भूतये ।।६४।।

यः शत्रौ कमठे प्रसादविशदां दृष्टिं कृपामन्थरां
व्यातेने भगवान् शतामृतरसाम्भोधिश्च तस्मै ददौ ।
सम्यक्त्वश्रियमेष शेखरतया ख्यातस्तितिक्षावतां
गाम्भीर्यैकपयोनिधिः स तनुतान्नः पार्श्वनाथः शिवम् ।।६५।।

आनन्ददोदयपर्वतैकतरणेरानन्दमेरोर्गुरोः
शिष्यः पण्डितमौलिमण्डनमणिः श्रीपद्ममेरुर्गुरुः ।
तच्छिष्योत्तमपद्मसुन्दरकविः श्रीपार्श्वनाथाह्वयं
काव्यं नव्यमिदं चकार सरसालङ्कारसंदर्भितम् ।।६६।।

---

(६३) जिन भगवान् पार्श्व की गर्भ से उत्पत्ति, संयमग्रहण, केवलज्ञान और निर्वाण कल्याणकों ,में इन्द्र के साथ सुर और असुर सभी आदर के साथ देदीप्यमान रत्नमुकुटों की कोटि के मणियों से जगच्चक्षुरूप (जिस भगवान की ) आरती करते हैं वह पार्श्वप्रभु सज्जनों के विस्तृत महोत्सव वाले मंगल को करें । (६४) पहले जो ( प्रथम भव में ) मरुभूति थे, वही ( द्वतीय भव में ) हाथी बने, ( तृतीय भव में ) देव हुए, ( चतुर्थ भव में ) विद्याधर देव हुए, उसके पश्चात् (पंचम भव में) अच्युतदेव हुए, और (षष्ट भव में) नरपति श्रीवज्रनाभि राजा (रूप से) शोभित थे । तत्पश्चात् (सप्तम भव में) मध्यममध्यम नामक स्वर्ग में इन्द्र हुए, (अष्टम भव में ) हेमप्रभ चक्री हुए, पश्चात् देव हुए । ऐसे पार्श्वनाथ जिनदेव सज्जनों के ऐश्वर्य के लिए हों ( अर्थात् उनका कल्याण करें ) । (६५) जिस प्रभु ने दुष्ट शत्रु कमठ में प्रसन्नता से निर्मल और कृपायुक्त दृष्टि रक्खी, जिस शतामृत–रससागर प्रभु ने उसे सम्यक्त्व प्रदान किया और जो सहनशीलता वालों में श्रेष्ठ हैं और जो गम्भीरता के उत्तमसागर हैं ऐसे पार्श्वनाथ प्रभु हमारा कल्याण करें । (६६) आनन्दोदयपर्वत के एकमात्र सूर्य आनन्दमेरु गुरुजी के शिष्य, पण्डितों के मुकुट के मणिरूप श्रीपद्ममेरु थे । उनके उत्तम शिष्य पद्मसुन्दरकवि ने पार्श्वनाथ नामक यह नूतन काव्य रस तथा अलंकारों से युक्त रचा है ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति श्रीमत्परापरपरमेष्ठिपदारविन्दमकरन्दसुन्दररसास्वादसम्प्रीणितभव्य-भव्ये पं०श्रीपद्ममेरुविनेय पं०पद्मसुन्दरविरचिते श्रीपार्श्वनाथ-महाकाव्ये श्रीपार्श्वनिर्वाणमङ्गलं नाम

सप्तमः सर्गः ॥

इति श्रीमान् परमपरमेष्ठी के चरणकमलरूपी मकरन्द के सुन्दर रस के स्वाद से भव्यजनों को प्रसन्न करने वाले, पं० श्रीपद्ममेरु के शिष्य पं० श्रीपद्मसुन्दरकवि द्वारा रचित श्रीपार्श्वनाथ-महाकाव्य में "श्रीपार्श्वनिर्वाणमंगल" नामक सातवाँ (अन्तिम) सर्ग समाप्त हुआ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परिशिष्ट–१

# पार्श्वनाथचरित में प्रयुक्त अलंकार

**अतिशयोक्ति** २. ७ । ३. ७, १२, ४८, १४६ । ४. २, ३, ४, ३०, ३२, ६५, ६६, ६७, १३५ । ५. २६ ।

**अनन्वय** ५. १४

**अनुप्रास** ४. ३९, ६२ । ५. २, ७, २५, २९, ३३, ४७, ७२, ८५, ८७, ६. ४६, ६७, ८१ । ७. १९–२९ ।

**अनुमान** ३. ८, १५६

**अर्थान्तरन्यास** १. १९, २६, ४६, ४८, ५० । २. १२, ३५, ६८, ७७ । ३. १५२, २०४ । ४. ८६, ९०, १३०, १८०, १८६ । ५. १, ३७, ३९, ४२, ४९, ६२, ६३, ६९, ७३, ७५, ७६, ८० । ७. १५

**आरोप** १. १६

**उत्प्रेक्षा** १. १, ३, ५, १९, २६ । २. ३, ४, १६ । ३, ३, ४, ११, १५, ४०, ४१, १५३, १५५, १७१, १८८, २०१ । ४. २, १८, २६, ५१, ५६, ५७, ५९–६१, ६३, ६४, १३८, १३९, १४६, १४७, १५१, १५५, १६८, १७१ । ५. ५, ६, १४, १७, २५, २८, २९, ३१, ३५ । ६. २०, ५१, ७९, ८०, ८२ । ७. ८

**उपमा.** १. ६, १५, १६, १८, ३४. ६९ । २. १, २, ५, ७, १४, १७, २२, ५० । ३. १, २, ५, १७, १८, ४२, ६२-६५, ६९, १०३, १०४, १२१, १४७, १४९, १५१, १५४, १५७–१६०, १७३, १८७, १८९, १९०, १९३–१९७, २०५, २०६ । ४. १७, १९, २२, २८, ४२–४६, ४८–५०, ५२–५५, ५८, ६२, ६५, ६८, ९४, ९६, १३७, १४०, १४२, १४३, १४९, १५९, १६०, १६५, १७२, १७३, १७४, १७६, १७७, १८१, १८२, १८५, १८६ । ५. ६, ७, १०, ११, १८, १९, ३२, ६१, ७९, १०१ । ६. ८१, ८५, ११२, ११३, ११५, १३९, १५८ । ७. ६–१२, १६, ३५,

**कारणमाला** ४. ९ ।

**भ्रान्तिमान्** ३. १६१ । ४. ३

**दृष्टान्त** ५. ३८, ४१, ७९, ८१, ८८,

**मालोपमा** १. १७ । ४. ९ । ७. १

**यमक** १. २५, ३८ । ४. ४० । ५. १२, १५, १०६ । ६. ८०, ७१, ७५, ७८, १०१, १५६, १६०

**रूपक** २. १०, ५१ । ४. १६०, १७२, १८५ । ५. ९, २२, २४, ८६ । ६. २१, २८, ७९, ८६ । ७. ६६.

**विभावना** २. १०

**विषम** १. ५०, ५६

**व्यतिरेक** १. ७० । ३. २०० । ५. १३, २४

**संदेह** ५. १६ । ६. २१

**स्वभावोक्ति** १. २७, २८

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## परिशिष्ट–२

# पार्श्वनाथचरित में प्रयुक्त छन्द

अनुष्टुभ् १. १४-२८, ४१-४९, ५१-६७ । २. १-७०, ७२-७७ । ३. १-२२८ । ४. १-१४९, १५२-१८४ । ५. ६१-६६ । ६. १-७०, ७६-७८, ८६-१३२ । ७. १-५६ ।

आर्या १. ११, ६८-८३

इन्द्रवज्रा १. १२

कुड्मलदन्ती ६. ७९

जलधरमाला ६. ८०

तोटक ६. ८२

दोधक ६. ८३

द्रुतविलम्बित १. ४० । ४. १८८–१९४

मयूरसारिणी ६. ८१

मालिनी २. ७१ । ६. ७१–७५, ८५

रथोद्धता १. ३०–३६ । ५. ९६–१०६

वसन्ततिलका १. ३–५, ७, २९, ३७–३९ । ५. ४४–६०, ६७–७१, ९१–९३, ९५

वंशस्थ ५. १–४३

शार्दूलविक्रीडित १. २, ६, ५०, ८४ । ३. २२९ । ४. १८५-१८७, १९५ । ५. ९४, १०७ । ७. ६०–६६

शालिनी १. ८–१०, १३ । ४. १५१ । ५. ७२–९०

स्रग्धरा १. १ । ४. १५० । ६. ८४

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## परिशिष्ट–३

# पाठान्तर

| | |
|---|---|
| (१) प्रणयन्त्यमी ब | सर्ग २. श्लोक ५५, पंक्ति ड. |
| (२) चरिता ब | २. ५७ ड. |
| (३) तोयधारा ब | ३. ७७ क. |
| (४) मन्दिरम् ब | ३. ११४ ब, |
| (५) शातकुम्भ अ | ३. १२९ ब. |
| (६) सेवधिः ब | ३. १९५ ड. |
| (७) स्थितिरिति ब | ४. १२३ क. |
| (८) स्वयार्ति ब | ४. १२७ फ. |
| (९) प्रहतः निःस्वान ब | ४. १६१ अ |
| (१०) रतियौवनश्रियोः अ | ५. १८ ब. |
| (११) मा स्म ब | ६. ८३ ब. |
| (१२) स्वापेक्षा अ | ६. १४५ क. |
| (१३) संभवः अ | ७. २२ अ. |
| (१४) स्थवीयानुत्तमोत्तमः ब | ७. २६ ब. |

**नोट**—छठे सर्ग का १४८ वाँ श्लोक (व्यवहारात्मके स्यातां... ...आदि ) बड़ौदा वाली प्रति में नहीं है, मात्र अहमदाबाद वाली प्रति में ही पाया जाता है।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# OUR LATEST PUBLICATIONS

80. The Rāmāyana In Pahārī Miniature Paintings by Jutta Jaina-Neubauer pp. 2+58 + plates 28 (1981) 108/—
81. Padmasundara's Jnānacandrodayanāṭaka Ed. Nagin J. Shah pp. 4 + 58 (1981) 8/—
82. A Study of Cīvakacintāmaṇi by R. Vijailakshmy pp. 8 + 234 (1981) 54/—
83. Appointment with Kālidāsa by Prof. G. K. Bhat pp. 10 + 140 (1981) 24/-
84. Studies in Indian Philosophy (Pt. Sukhlalji Memorial Volume) pp. 22 + 323 (1981) Ed. by Pt. D. D. Malvania & Dr. N. J. Shah 60/-
85. Facetes of Jaina Religiousness in Comprative Light by Dr. L. M. Joshi pp. 4 + 78 (1981) 18/-
86. A Study of Tattvārthasūtra with Bhāṣya by Suzuko Ohira (1982) pp. 1 + 182 48/-
87. Hindī Gujarātī Dhātukośa by Raghuveer Chaudhari (1982) p. 12 + 230 45/-
88. Secondary Tales of the Two Great Epics by Rajendra I. Nanavati (1982) p. 12 + 795 50/-
89. Lakṣmaṇa's Sūktiratnakoṣa Ed. by Mrs. Nilanjana S. Shah (1982) p. 16 + 71 9/-
90. Sūrācārya's Dānādiprakaraṇa Ed. by Pt. Amrutlal M. Bhojak & Nagin J. Shah (1983) p. 12 + 64 9/-
91. Rāmacandra's Mallikāmakarananāṭāka, Ed. Muni Shri Punyavijayji, Eng. Intro. by V. M. Kulkarni (1983) pp 6 + 35 + 166 30/-
92. Ślokavārtika : A Study by Dr. K. K. Dixit (1983) pp. 8 + 120 27/-
93. Vardhamānasūri's Manoramākathā (Prakrit) Ed. by Pt. Rupendrakumar Pagariya pp. 16 + 339 + 32 (1983) 66/-
94. Haribhadra's Yoga and Psychosinthesis by Shantilal K. Desai pp. 94 (1983) 16/-
95. Narasiṁha Mehatānā Aprakāśit Pada (Gujarati) Ed. by Ratilal V. Dave 16 + 102 (1983) 10/-
96. Jinaratna's Līlāvati-Sāra (A Sanskrit Abridgement of Jineśvara Sūri's Prakrit Līlāvaī-Kahā) Ed. by H. C. Bhayani 8 + 58 + 443 (1984) 81/-
97. Jayanta Bhatta's Nyāyamañjarī (Tṛtīya Ānhika) With Gujarati Translation. Ed. and translated by Nagin J. Shah (1984) pp. 9 + 180. 21/-
98. Bhartṛhari's Vākyapadīya (with Gujarati translation and notes) Ed. by Dr. J. M. Shukla 46 + 720 (1984) 53/50

* SAMBODHI (The journal of the L. D. Institute of Indology Back Vols. I—10 (Per volume) 40/-Current Vol. 11 (1982–1983) 25/-

VIDUŚAKA (Gujarati) by G. K. Bhat (1981) 30/-

Sole Distributor—

+Aspects of Jaina Art and Architecture : Editors Dr. U. P. Shah and Prof. M. A. Dhakey (1976) 150/-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

+ Mahavira and his Teachings Ed. Dr. A. N. Upadhye 50/-